२०१६० धर्मशास्त्रम्

स्मृति टीका

अपरादित्य:

याज्ञवल्क्य स्मृति (धर्मशास्त्रनिबन्ध:)

ग्र० सं० [illegible] आचार्य ५४ — १६५।

अक्षर सं० (पंक्तौ) ३६. पंक्ति सं० (पृष्ठे) ११.

श्लोक सं०

आकार: १०.८" x ५.६" लिपि: दे.ना. आधार: का.

वि० विवरणम् अपू०

13677

नं. ६३६२,

पी० एम० गु० पो०--९८ एम० पी० ई०--१४४१--५०.०००

व्यवहाराध्याय:

Indira Gandhi National Centre for the Arts

लिखितं तथा। लेख्यं तु त्रिविधं प्रोक्तं भिन्नं तद्दृश्यपुनः भागदानक्रियादानसंविद्दासक्र
यादिभिः। सप्तधा लौकिकं लेख्यं त्रिविधं राजशासनं। भ्रातरः संविभक्ता ये स्वरुच्या
तु परस्परं विभागपत्रं कुर्वीत भागलेख्यं तदुच्यते। भूमिं दत्वा यत्तु पत्रं कुर्याच्चंद्रा
र्ककालिकं। अनाच्छेद्यमनाहार्यं दानलेख्यं तु तद्विदुः। गृहक्षेत्रादिकं क्रीत्वा
तुल्यमूल्याक्षरान्वितं। पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते। जंगमं स्थावरं बंध
दत्वा लेख्यं करोति यत्। गोप्यभोग्यक्रियायुक्तमाधिलेख्यं तु तत्स्मृतं। ग्रामो दे
शश्च यत्कुर्यान्मतं लेख्यं परस्परं। राजाविरोधिधर्मार्थं संवित्पत्रं वदंति तत्। वस्त्रा
न्नहीनः कांतारे लिखितं कुरुते तु यत्। कर्माहं ते करिष्यामि दासपत्रं तदिष्यते।
धनं वृद्ध्या गृहीत्वा तु स्वयं कुर्याच्च कारयेत्। तदृणपत्रं प्रोक्तं ऋणलेख्यं मनी
षिभिः। वसिष्ठः। लौकिकं राजकीयं च लेख्यं विद्याद्द्विलक्षणं। राजकीयं चतुर्भेद

Indira Gandhi National
Centre for the Arts

मष्टभेदं तु लौकिकं। शासनं प्रथमं ज्ञेयं जयपत्रं तथापरं। आज्ञाप्रज्ञापने या राजकीयं च
तुर्विधं। धीरकं च स्वहस्तं च तथोपगतसंज्ञितं। आधिपत्रं चतुर्थं तु पंचमं क्रयपत्रकं। ष
ष्ठं तु स्थितिपत्राख्यं सप्तमं संधिपत्रकं। विशुद्धिपत्रकं चैव अष्टधा लौकिकं स्मृतं। दत्वा
भोगान् द्विजातिभ्यो रत्नानि विविधानि च। राजा भूमिं च कुर्वीत तेषां तस्याश्च शासनं
क्रियाकारकसंबद्धं समासार्थक्रियान्वितं। समासासन्नदर्धाहान्वयनामोपलक्षितं प्र
तिग्रहीतृजात्यादिसगोत्रब्रह्मचारिकं। सत्रिविंशप्रमाणं च स्वहस्तेन तु लिखेत् स्वयं।
संधिविग्रहकारी च भवेद्यस्तत्र लेखकः। स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनं
स्वनाम चालिखेत्पश्चान्मुद्रितं राजमुद्रया। ग्रामक्षेत्रगृहादीनामीदृशं राजशास
नं। कात्यायनः। सुप्रशस्तं क्रियायुक्तं भक्तिशुद्धं सचिन्हकं। राजस्वहस्तसंशुद्धं माया
तिशासनं। नारदः। सकलं पूर्वपादं च सोत्तरं सक्रियं तथा। सावधारणकं चैवं ज

ज्ञेयं जयपत्रकं। नृपानुज्ञानलिखितः संव्योर्थिप्रत्यर्थ्योः सभ्यैर्निर्धारितः पश्चाद्राज्ञाप्यः सभा
स्तुतः॥ प्राड्विवाकगुणं दृष्ट्वा पुनस्ततः जयिने चापि देयं स्याद्यथावज्जयपत्रकं। मध्यस्थापितं
द्रव्यं बलं वा यदि वाधिकं। पश्चात्तत्सोदयं दद्याज्जयिने जयपत्रकं। कात्यायनः। सिद्धेनार्थेन
संयोज्यो वादी सत्कारपूर्वकं। लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः। बृहद्वसिष्ठः। यथोप
न्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियं। सावधारणकं चैव जयपत्रकमिष्यते। प्राड्विवाकादिहस्तां
कं मुद्रितं राजमुद्रया। सिद्धेर्थे वादिने दद्याज्जयिने जयपत्रकं। किंच। समासन्नदर्धाहो नामजातिसगो
त्रकैः सब्रह्मचारिकात्मीयपितृनामादिचिन्हितं। तल्लेख्यं समामासादिचिन्हितं कार्यं समा संवत्सरः
मासश्चैत्रादिः तदर्धं शुक्लकृष्णपक्षौ अहः प्रतिपदादिस्तिथिः। नामसंज्ञा जातिर्ब्राह्मणत्वादिः। क
श्यपादिना समानं गोत्रं सगोत्रं तदेव सगोत्रकं कठादिना समानमभिन्नं ब्रह्म वेदशाखा वा तदध्ययनरूप
वंशशीलः। सब्रह्मचारिणस्तद्भावः। सब्रह्मचारिकमात्मीयपितृनामादि। उत्तमाधमर्णसाक्षिणां
पितृनामादि। आदिशब्देन वर्धनस्य जातिसंख्यापरिमाणादीनां ग्रहणं। नामजातिसगोत्रसब

Indira Gandhi National
Centre for the Arts

त्वयेत्यादन्यत्रधनिकादीनामेव। व्यासः। जातिः संज्ञा निवासोर्थः संख्या वृद्धिश्च वत्सरः मासः पक्षोहि
नं चैभिर्लिखितं व्यक्तिकारकं। अपि च समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत्। मतं मेऽमुकपु
त्रस्य यदत्रोपरि लेखितं। धनिकाधमर्णयोर्यैरर्थैः संप्रतिपन्नं तत्तैर्व्यासमासैव ऋणी कोऽम
मामुकपुत्रस्यैतन्मतं यदत्र पत्रे उपरितनं यत्कार्यादौ लिखितमिति स्वहस्तेन निवेशयेदि
त्यर्थः। किंच साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकं। अत्राहममुकः साक्षी लिखेयुरि
ते समाः। न केवलमृणी साक्षिणोप्यत्रार्थेऽमुकपुत्रोऽहममुकनामा साक्षीति पितृनामपूर्व
कं स्वनाम हस्तेन प्रत्येकं लिखेयुः। ते चास्य समा विषमसंख्यका भवंतीत्यर्थः। समहतिन्नपप्रति।
तथा। वादिप्रतिवादिनोः प्रतिसमासत्त्वा भवंतीत्यर्थः। यद्यधमर्णः साक्षी वाऽलिपिज्ञो न भवति।
तदान्येन लिपिज्ञेन सर्वसाक्षिसमक्षं स्वमतं लेखयेत्। तदाह नारदः। अलिपिज्ञ ऋणीयः स्या
ल्लेखयेत्स्वमतं तु सः। साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः। साक्षिणान्येनेति लिपिज्ञमा
त्रप्रदर्शनार्थं। अन्यथा त्वदृष्टार्थं स्यात्। किंच। उभयाभ्यर्थितेनैतन्मयाह्यमुकसूनुना। लि

खितं ह्यमुकेनेति लेखकोंऽते ततो लिखेत्। उभाभ्यामुत्तमर्णाधमर्णाभ्यामभ्यर्थितेन मयाऽमुक
पुत्रेणामुकेनैतल्लेख्यं लिखितमिति लेखांते लेखको निवेशयेत्। साक्षिमल्लेख्यं कार्यमित्यु
क्तं। तस्यापवादविषये पवादमाह। विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्। तत्प्रमाणं
स्मृतं सर्वं बलोपधिकृतादृते। यदधमर्णः स्वहस्तेन लिखति तद्विनापि साक्षिभिः। लेख्यं प्रमाणं
भवति यदि न बलेनोपाधिना वा कृतं स्यात्। बलं हठः। उपाधिश्छद्म। अपिशब्दात्साक्षिकमपि प्र
पुनर्वर्ग स्वहस्तलिखितं तत्साक्षिमदेव सत्प्रमाणं लेख्यं तु द्विविधं प्रोक्तं स्वहस्तान्यकृतं तथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितिस्तयोः। तथा मत्ताभियुक्तस्त्रीबालबलात्कारकृतं तु
यत्। तदप्रमाणं लिखितं भयोपाधिकृतं तथा। भयादिकृतत्वमेवाप्रामाण्ये कारणं न त्वादि
कृतत्वमपि। तथा हि मत्तस्त्रीबालादिभिर्यथार्थमपि क्रियमाणं लिखितमप्रमाणं स्यात्। न च
यथार्थं प्रमाणं भवितुमर्हति। मत्तत्वादीनां पृथगुपादानं तेषां बाहुल्येन भयादिसंभवख्या
पनार्थं। कात्यायनः। साक्षिदोषाद्भवेद्दुष्टं पत्रं चैव लेखकस्य वा। धनिकस्योपधादोषात्तथा

Indira Gandhi National
Centre for the Arts

५० रणकस्य च। आशपदोषत एव। बृहस्पतिः। मुमूर्षुः शिशुभीतानत्तस्त्रीमत्तव्यसनातुरैः। लिखोपाधिब
लात्कारकृतं लेख्यं न सिध्यति। कात्यायनः। धनिकेन स्वहस्तेन लिखितं साक्षिवर्जितं। भवेत्कूटं न
चेत्कर्ताधिकं तद्धीनं विभावयेत्। यदुत्तमर्णाभिवक्तृम तेन मध्ये नाद्विलिखित प्रतिवादिना भवेत्
अंगीकारयेदित्यर्थः। दृष्ट्वा वा राजहस्तमुद्रया संदिग्धं क्रमवर्जितं। कृतमस्वामिना पश्चात्साध्यहीनं
च दुष्यति। बृहस्पतिः। दूषितो गर्हितः साक्षी यत्रैको विनिवेशितः। कूटलेख्यं तु तत्प्राहुर्लेख
को वा पिता दृष्टः। यद्युज्ज्वलविरुक्तं मलिनं स्वल्पकालिकं। भग्नाश्लिष्टाक्षरयुतं लेख्यं कू
टत्वमाप्नुयात्। स्थानभ्रष्टास्त्वकानि स्थाः संदिग्धालक्षणाच्युताः। पत्रैर्वस्तुः स्थिता वर्णा
लेख्यं दुष्टं तदा भृगुः। अपि च। ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु। आधिस्तु भुज्यते
तावद्यावत्तत्र प्रदीयते। लेख्यगतं लिखितमृणं त्रिभिः पुरुषैः ऋणग्राहकेन तत्पुत्रपौत्रा
भ्यां वदेयं पुत्रपौत्रैः। ऋणादेयमितिरुक्तत्वात्। अत एवायमनुवादः। आधिस्तु भुज्यते
तावदित्यादिविधानार्थं। न स्थाधिगः। न ऋणं पुरुषत्रयं स्याः नियमविषयभवति। एवंचयद्गृ
हीतेन लेख्यं यस्य भवेद्धृतिभोगं तस्याविनिर्दिष्टो हि तु। निरवधिकमुक्तं तदा धिविसंवर्ज्ञा

॥५६॥

ह्यो एतद्वचनमंतरेणापि। फलभोग्यो न नश्यतीति वाक्यं पुरुषत्रयविषयविषयस्यात्। ऋणीतन्निवृत्त्यर्थार्थवा
न च वाक्यारंभः। किं वा देशांतरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा। भिन्ने दग्धे तथा छिन्ने लेख्यमन्यं तु
कारयेत्। दुर्गदेश। स्थेदुरुच वा शाक्षार प्रध्वस्ते नष्टमिताक्षरे अपहृते विदीर्णे दग्धे द्विधा कृते लेख्ये वे लेख्या
न्तरं कारयेत्। नारदः। लेख्ये देशांतरन्यस्ते शीर्णे दुर्लिखिते हृते। सतस्तत्कालकरणमसतो द्रष्टृदर्शनं। अ
यमर्थः। सतो देशांतरस्थस्यानयनार्थं कालकरणमिपता कालेन त्वया तदाहरणीयमिति कालावधि
कारणं। असति तु पूर्वलिखिते लिखितांतरं कृत्वा तस्य दर्शयितव्यं। येन तत्पूर्वलिखितं दृष्टं हृती
यस्य लेख्यस्यान्यथाभावनिराकरणाय कात्यायनः। वर्णे पर्णे दितं दग्धं छिद्रितं वीतमेव वा। तदन्य
त्कारयेल्लेख्यं स्वैरेनाद्विलिखितं तथा। वीतं विगतं। अपि च। संदिग्धलेख्ये शुद्धिः स्यात्स्वहस्तलिखि
तादिभिः युक्तिप्राप्तिक्रियाचिह्नसंबंधागमहेतुभिः। लेख्ये प्रमाणं प्रमाणं निपासंदिग्धे स्वहस्तलि
खितादिभिः प्रमाणपालि गोर्यत्वादिभिश्च कारणैः शुद्धिः संशयनिर्वृत्तिः। प्रमाणावधारणाल
क्षणानस्या। एतच्चाधमर्णेन साक्षिरहितं स्वहस्तेन कृतं यद्वेख्यं तद्विषयं वचनं। तत्र गाथा द्यथम

Indira Gandhi National
Centre for the Arts

प्र० व्य० शीस्य नमयेत्तद्धि लिखितमिति प्रत्यवस्थानसंभवः। तत्र नैनैव यदन्यद्धेरवंकृतं तत्स्वहस्तलिखितं तेन
निर्णयः। आदिशब्देन च पितृनामगोत्रसब्रह्मचारित्वानां ग्रहणं। पुत्रादीनामपि तत्रैव प
त्रके स्वयं प्रमाणात्तया प्रमाणानां तदनुग्राहकतया वा निर्णायकत्वं युक्तिरर्थापत्तिः प्राप्तिरेक
त्रदेशे कालेव वादिप्रतिवादिनोः स्थितिः एतच्च प्रमाणानां तदनुग्राहकतया शुद्धिहेतुर्न स्वा
तंत्र्येण। यदि हि नैकत्रदेशादौ तयोः स्थितिस्तदालिखितमप्रमाणमेवेति निश्चिते स्वहस्तलि
खितादिषु लेख्यप्रामाण्यावधारके पुनर्विचारकारणं जिज्ञासैव न जायेत। क्रियते संव्यवहा
रो ययोः खलु नात्यीर्य द्रविड योर्विसंव्यवहारस्तत्र लेख्यप्रति प्रामाण्यमसंभवनिरस्तं हि चि
मुद्रसंबंधो वादिप्रतिवादिनोः प्राग्विवादात्परस्परविश्वासपूर्वकः। आदानप्रतिदानादिः
आगमो विवादास्पदीभूतस्य स्वस्वामिसंबंधोपायः क्रमादिः॥ अस्यार्थिनि राता वक्तुं कृपा
दिनोपायेनास्य संभवत्येतद्युक्तिरिति हेतुरनुवादः स्वहस्तलिखितादिकं सलेख्यस्य शुद्धोपु
नत्यादिनिरपेक्षं कारणं भवितुमेकान्तेनैकांतिकत्वात्। संति खलु पुरुषाः कुशलाः ये पुरुषां

॥५७॥

तरलिखिततुल्यं लेख्यमापादयंति पितृनामादीनां वा भेदः। तदाह व्यासः। लेख्यमालेख्यवत्केचि
ल्लिखंति कुशला नराः। तस्मात्तद्धि लेख्यसामर्थ्यात्सिद्धिर्नैकांतिकी मता। सा तु कालदेशकार्य
कुशलाः कूटकारकाः। कुर्वंति सदृशं लेख्यं तद्यत्नेन विचारयेत् स्त्रीबालानां लिपिज्ञानाद्ध्यपतिव
वांधवाः। लेख्यं कृत्वा स्वनामांकं ज्ञेयं युक्त्यागमैस्तु तत्। नारदः। लेख्यं पश्चादन्यनामांकं कृत्वांतर
कृतं भवेत्। विप्रत्यये परीक्ष्यं तत्संबंधागमहेतुभिः। विप्रत्ययो विसंवादः। एवमधमर्णलिखित
स्यसाक्षिरक्षितस्य प्रमाणस्य संभवेपि स्वहस्तलिखितादयः। प्रामाण्यशुद्ध्युपायाः कथिताः
साक्षिमतोपि लेख्यस्य संशये निर्णयोपायमाह। कात्यायनः। न लेखकेन लिखितं न दृष्टं साक्षि
भिस्तथा। एवं प्रत्यर्थिनो लेख्यं कूटलेख्यं प्रकीर्त्तितं। एवं दुष्टं तु यत्स्थाने यैः सिद्धिस्तद्विचार्यते।
विमृश्य ब्राह्मणैः सार्द्धं पत्रदोषान्निरूपयेत्। कृताकृतविचारेण साक्षिभिः पत्रनिर्णयः। प्र
त्यक्षमनुमानेन न कदाचित्प्रबाध्यते तस्माद्धि लेख्यस्य दुष्टस्य वचोभिः साक्षिणां भवेत्। निर्णयं
लब्धनार्थं हि पत्रं दूषयते स्वयं। स्वयं लिखितं पत्र — स्वयं दूषयते प्रत्यर्थिवादी साक्षिमतं

अ.प्र. प्राक्तदृष्टमितं। साक्षिवचनेनसकलदोषोद्धारणात् तथालिखितंलिखितेनैवसाक्षिमत्साक्षिहिरवे
त्यर्थीलिखितंसाक्षिरहितंलिखितान्तराणात्कृतेनसाक्षिसत्साक्षिभिरुद्धरेत् तथा। कू
टोक्तौसाक्षिणांवाक्याल्लेखकस्यचपत्रकं। नयेच्छुद्धिंनयःकूटसाक्ष्योरमुत्तमं। अ
स्यार्थः लेखकंप्रतिकूटोक्तौसाक्षिणांवचनात्। पत्रकंयोवादीशुद्धिंननयेत्। साक्षा
मसाहसंदद्यात्ः अथपंचायमापन्नोलेखकःसहसाक्षिभिः। तत्स्वहस्तादिभिर्लिखितविभ्रमे
ननसंशयः तथा। मुमूर्षुष्पिपयथालेख्यमतःसर्वेपितृत्त्वितः लिखितंतत्प्रमाणंतुमृतेष्वपि
हितेषुचे। समुद्रराजमुद्रासहितेशासनेइत्यर्थः। नारदः। दर्शितंप्रतिकालंयत्स्मारितंश्रा
वितंचयत्। लेख्यंसिध्यतिसर्वत्रमृतेष्वपिहिसाक्षिषु। एतच्चलेख्यसिद्धिसंभावनामा
त्रप्रतिपादकं। नपुनः परीक्षानिवारकंयथोक्तं। करणेस्वहस्तसंदेहेजीवतोवामृतस्यवा एत:
तत्स्वहस्तकृतैरन्यैः पत्रैस्तच्चलेख्यनिर्णयः। तथा। लिखितंलिखितेनैवसाक्षिमत्साक्षिभिर्न
येत्। साक्षिभ्योलिखितंश्रेयोलिखितान्नतुसाक्षिणः लिखितांनागरकसाक्षिविषमेततः।

॥५८॥

कात्यायनः। त्रिषुवर्षेष्वतीतेषुविद्यमानेषुसाक्षिषुलेख्यंवसतियादेशेनस्याक्षिणः यदानुसाक्षिरहितंलिखितं
नमयेनकृतमित्यथमर्ताविप्रलेनवस्वहस्तलिखितादितदुद्धारकारणमस्ति। तद्देशेनोद्धार्यमित्याह हारि
तः। नममेतत्कृतंलेख्यंकूटमेतेनकारितं। अधरीकृत्यतत्पत्रमर्थेदिव्येननिर्णयः प्रजापतिः यन्नामगोत्रैस्तं
तुल्याहृपत्रलेख्याङ्कविरुद्धेन अग्रहीतिधनेनत्र कार्येदिव्यनिर्णयः साक्षिणांस्वहस्तलिखिताद्यभावे
वेतत्। नारदः। दुष्टेपत्रेस्फुटंदोषंनोक्तवान्ऋणिकोयदि। ततोविंशतिवर्षाणिकांतंपत्रंस्थिरंभवेत्
यदिसदोषंपत्रंकथंविंशतिवर्षपर्यंतापत्रवतोभुक्तिरित्येवंसंदिग्धप्रामाण्यलेख्यादिव्यप्रतिसाध
नार्थस्थिरंभवतीत्यर्थः। व्यासः यश्चान्यस्यकृतंलेख्यमन्यहस्तेप्रदर्शयेत् अवधंपतेनवक्तव्यपत्र
स्यागमनंततः। अमुकस्येनलेख्यंततोमांप्राप्तंयेनोपायेनागतमितियस्यहस्तेदर्शितेतेनवक्तव्यं
साधनीयमित्यर्थः कात्यायनः। प्राक्तस्यसन्निधावर्थोयस्यलेख्येनभुज्यते। वर्षाणिविंशतियावत्त
त्पत्रंदोषवर्जितं। विनादिव्येनेत्यर्थः पूर्वत्रनुनाकृदुष्टलेख्यनभुज्यतेस्यानुसाविंशदोषस्याविंशा
तिवर्षयोभुक्तौदिव्यसाध्यतोक्तौदुष्टत्वदुष्टस्याविद्यमानसाक्षिस्वहस्तलिखिताद्यभावेवोक्तं

Indira Gandhi National
Centre for the Arts

कालयाप्रामाण्यसिद्धिरुच्यते इत्यविरोधः तथा। अथविभ्रान्तिवर्णालि अधिभुक्तः स्वनिश्चितः येन लेख्येन
नासिद्धं लेख्यं दोषविवर्जितं। पूर्वोक्तेन तुल्यविषयं। सीमाविवादे निर्णीते सीमापत्रं विधीयते। नस्य दोषाः
प्रयोक्तव्याया आधानसहितं यत्र ऋणं लेख्यं निवेशितं। सत्साक्षिप्रमाणं तु स्वल्पभोगोपि न हि दुः। आ
धानमाधिः सत्साक्षिमत् असाक्षिकं नारदः यदि लब्धं भवेत्किंचित्प्रलप्तिं वा कृता भवेत् प्रमाणमेव लिखि
तं सतायद्यपि साक्षिणः। यदि लिखितत्वलादुत्तमर्णो नाधमर्णात् किंचिल्लब्धं यदि वा लिखितं समेतं
जि दत्तं विद्यते तत्राविशेषेयं विरुद्धिमाधमर्णप्रतिप्रवर्तितदा लिख्यकृत्साक्षिसिद्धीणां सभावेपि लेख्यं प्रमा
णमित्यर्थः। लेख्यानामन्योन्यविरोधे यत्प्रमाणांतरं तदाह व्यासः स्वहस्तकाज्जानपदं तस्माद्राजपत्रकं सं
प्रमाणान्तरमिदं हि व्यवहारार्थमागतं। अत्रोपपत्तिमाह। द्वित्रिलिपिज्ञः स्वकृतेन स्वलेख्येन युक्ति
भिः कुर्याद्भिसदृशं लेख्यं तस्माज्जानपदं शुभं। स्वलेख्येन समानेन लेख्येन युक्तिभिश्चानेकलिपिज्ञै
नकृतं स्वलेख्यं शुद्धं नयातीत्यथार्थयतीसीसदृशमपि कर्तुमशक्तोति तस्माज्जानपदं वरमित्यर्थः राम
अप्रकाशात्साक्षियुतं लेख्यं कालाक्षरस्फुटं। लोकप्रसिद्धं संकृतादरमन्यकृतं शुभं द्विप्राण्मक्षादिना ले

॥५८॥

ख्यं यत्र जानपदं कृतं समकालं पश्चिमं वा तत्र राजकृतं शुभं समकालपश्चिमाभ्यां राजकृतमेव विशिष्य
ते संवर्त्तः लेख्ये लेख्यक्रियाप्रोक्ता वाचिके वाचिकी मता। वाचिकी तु न सिध्येत् स्मार्त लेख्यस्योपरि या क्रि
या। लेख्यस्योपरि यत्साक्ष्यं कृतं तदभिधीयते। अधमर्णस्य हि तद्धारमतो राजा विवर्जयेत्। वाचि
कैर्यदि सामर्थ्यमक्षराणां विहन्यते। द्वयाणां सर्वनाशः स्यादनवस्था च जायते लेख्यस्योपरि य
त्साक्ष्यं लेख्यविरुद्धं तद्वर्ज्यमित्यर्थः क्रियाणां लेख्याक्रियाणां। कात्यायनः। नादेयैः साक्षिभिर्वा
पि हीयेत लिखितं क्वचित् लेख्यधर्मः सदा श्रेष्ठो यतो नान्येन हीयते। तद्युक्तिप्रतिलेख्येन तद्वि
शिष्टेन वा सदा। लेख्या क्रिया निरस्येत न साक्षिप्रत्यर्थैः क्वचित्। बृहस्पतिः। आद्यस्याधिकरस्थस्य
मकृते नयाचितं शुद्धवर्णाङ्कयात्तत्र लेख्यं। दुर्बलतामियात् शुद्धदत्तं लेख्यं त्रिंशत्समाती
तमदृष्टाश्रावितं च यत् न तत्सिद्धिमवाप्नोति तिष्ठत्स्वपि हि साक्षिषु। प्रयुक्तेर्थे न लाभेन लिखि
तं योन दर्शयेत्। न याचते च ऋणिकं तत्संदेहमवाप्नुयात् प्रयुक्ते धनेऽशांत लाभे उपरतला
भे यो न यत्र दर्शयेत्तिन याधमर्णं याचते तल्लेख्यं संदेहं प्रामाण्यविषयमवाप्नुयादित्यर्थः नारदः

Indira Gandhi National
Centre for the Arts

मताः स्युः साक्षिणोऽप्यत्र धनिकर्णिकलेखकाः। तदप्यनर्थं लिखितं न येषाधिः स्थिरागमः। आधिस्तु भुक्त्या प्रमा
णतया प्रेक्ष्यमाणत्वात्। व्यासः। अदृष्टश्रावितं लेख्यं प्रमीतधनिकर्णिकं अवंध्यलग्नकं चैव बहुकालं
न सिध्यति। बहुकालीनं। बृहस्पतिः। उन्मत्तजडबालानां राजभीतप्रवासिनां अप्रगल्भभयार्तानां न लेख्य
हानिमाप्नुयात्। शनैर्यथोदयं दानं विषये पत्रकं पश्चात्कार्यं तदाह। लेख्यस्य पृष्ठेऽभिलिखेद्दत्वा दत्वर्णि
को धनं धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितं यदाधमर्णः स्वशक्त्यनुरोधेनाल्पमल्पं प्रतिददाति
तदा यावद्दत्तं तावल्लेख्यस्य पत्रकस्य पृष्ठेऽभिलिखेत् यद्वोत्तमर्णः स्वहस्तचिह्नितमुपगतमधमर्णाय
दद्यात् एतावदनेन प्रतिदत्तमिति लिखितांतरमुपगतमिष्यते नारदः। गृहीत्वोपगतं दद्यादृणि
कायोदयं धनी अददद्याच्यमानस्तु शेषहानिमवाप्नुयात् तदयं शनैर्दाप्यो यथोदयमित्यनेन यो
विहितो दत्वर्णं पाटयेल्लेख्यं शुद्ध्यै वान्यत्तु कारयेत् साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकं सवृद्धिकं धन एम:
मुत्तमर्णायाधमर्णो दत्वा लेख्यपत्रकं पाटयेत् दद्यात् यदि पुनर्नष्टं विप्रकृष्टं वेति न शक्यं पाटयितुं त
दा शुध्यर्थमधमर्णोऽन्यदुत्तमर्णात्ससाक्षिकं लेख्यं गृह्णीयात् यथा बहुभिरवस्थितं तरसा



क्षिसमक्षमृणमयाकुर्यात्। अत्र नारदः। लेख्यं दद्यादृणे शुद्धे तदभावे प्रतिश्रवं धनिकर्णिकयोरेवं विशुद्धिः स्यात्प
रस्परं। प्रतिश्रवशब्देन साक्षिश्रवणं विवक्षितं उक्तं त्रिविधमपि लिखितादि प्रमाणं तदभावे यद्दिव्यानि विहि
तानि तेषां स्वरूपमिदानीमाह। तुल्याग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। यानि विशुद्ध्यै अभियोगे विहि
तानि दिव्यानि तानि तुल्यादीनि वेदितव्यानि नवकोशादीन्यपि दिव्यानीत्याह पितामहः। धटोग्निरु
दकं चैव विषं कोशश्च पंचमः षष्ठं च तंदुलाः प्रोक्ताः सप्तमं तप्तमाषकं। अष्टमं फालमित्युक्तं नवमं धर्मजं भ
वेत् दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवा। नारदः। यदा साक्षी न विद्येत विवादे वदतां नृणां। तदा दिव्यैः परी
क्षेत शपथैश्च पृथक्पृथक्। व्यासः। स्याह नृपास्त्राणि गोबीजकनकानि च देवतापितृपादांश्च दत्तानि सुकृ
तानि च। एतानि दिव्यस्थाने वा व्यस्य शुद्धिव्यस्थाने प्रयोगात्। एवं शपथयाप्यपि। तथा च नारद एव
युक्तिष्वप्यसमर्थासु शपथैरेनमन्वियात्। अर्थकालबलापेक्षमग्न्यंबुसुकृतादिभिः। धटोग्निरुद
कं चैव विषं कोशश्च पंचमः। उक्तान्येतानि दिव्यानि विशुद्ध्यर्थं महात्मभिः। कात्यायनः। दिव्यनाम तुलारोह
हणं विधानमक्षप्रवेशो लोहधारणमिष्टापूर्तप्रदानमन्यांश्च शपथान्कारयेत्। मनुः। अस्साक्षि

केषुत्वर्थेषु मिथो विवदमानयोः । अविंदंस्तत्वतः सत्यं शपथेनापि लंभयेत् । अग्निं वाहारयेदेनमप्सु चै
नं निमज्जयेत् पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत् पृथक् ॥ यस्मादेवैः प्रयुक्तानि [illegible]कार्येषु मनीषिभिः पर
स्परविशुध्यर्थं तस्माद्दिव्यानि नासतः । अयं चाभियुक्तानां धटादीनि विनिर्दिशेत् तंदुलाश्चैव कोशं च
शंकास्वेव न संशयः तथा । धटोऽग्निर्विषमापश्च प्रमाणानि चतुर्विधं दैविकस्य प्रभेदोयं कोशः शंका
स्वपंचमः इति तदस्याभियोगे शंकायां च कोशं विधाय कं महाभियोगे त्वयं चाभियोगे च शी
र्षकस्थेऽभियोक्तर्येव कोशस्त्वविशेषः तथा योऽयं शंकाभियुक्तानां तत्प्रमाणं विधीयते ।
शंकाविश्वाससंधाने विभागे रिक्थिनां तथा । क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् । वित्त
भेसर्वशंकास्वसंधिकार्ये तथैव च । एष कोशः प्रदातव्यो नित्यं चित्तविशुद्धये ॥ ऽक्तानां तु तुला
दीनि दिव्यानां विशेषमभियोक्तृत्वक्रियाविशेषं विधानुमिदानीमाह । महाभिशीर्षकस्थेऽभि रामः
योक्तरि । यान्येतानि तु तुल्यादीनि कोशांतानि दिव्यानि विशुध्यर्थमुक्तानि तान्यभियोगविषये भव
न्ति नान्यत्रेत्येवोक्तं तथा शीर्षकस्थेऽभियोक्तरीति हि तौ वा अन्यतोश्च वा कयोरेतानीति साध्या



गाः शेषः सहस्रादिपरिमाणाद्द्रव्यविषयो महापातकविषयो वाक्षेपो महाभियोगोऽभियुक्तस्य दिव्यतो दोषाभा
वे हृदोषवाद्दोषानुरूपस्य दंडस्य दातेत्युपगमः शीर्षकं तदेव पूर्णीर्षकं । एवं चाभियोक्तरि शीर्षकास्थिते
विद्यानेर्णादभियुक्तस्य दिव्यकारित्वं निपद्यते इति संभाव्यं यदाह पितामहः अभियोक्ता शिरः
स्थाने दिव्येषु परिकल्प्यते अभियुक्ताय दातव्यं श्रुतिनिर्देशनादपि ननु चाभियोक्तैव साध्यार्थ
वक्ता पक्षसाध्यनिर्देशकः स एव साधनवादीति तेनैव दिव्यकार्यमिति न्याय्यं अत्रोक्तं श्रुतिनिर्दे
शनादित्ययमर्थः । यथा मानुषप्रमाणमभियोक्त्रा मिथ्योत्तरे कार्यं तथैव दिव्यस्य प्राप्तिः न्यायसि
द्धा वचनेनान्यथा क्रियत इति । कात्यायनोऽपि न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् अभि
शस्याय दातव्यं दिव्यं दिव्यविशारदैः ॥ इति इदानीमभियोगकर्तृकशीर्षकावस्थाननियमस्तान् कथयन्ति
मित्तेपवादमाह । रुच्या वान्यतरः कुर्यादितरो वर्तयेच्छिरः । स्वेच्छयान्यतरोऽभियोक्ता वादिव्य
कुर्यादितरोऽदिव्यकर्तुरन्यः शिरः स्थितिः यदभियोक्तुर्दिव्यकर्तृत्वानेन तात्पर्यतो विधीयते अत्र
वप्रपंचः शिरो वर्तयेद्धटादिषु । यदाह पितामहः शिरः स्थायिविहीनानि दिव्यानि परिवर्जयेत्
धटादीनि विषाणानि कोशश्चापि शिरः स्मृत इति । शंकाभियोगकोशविषयमेतत् । अत्राविशेषमा

हः कात्यायनः महापातकयुक्तेषु नास्तिकेषु विशेषतः नदेयं तेषु दिव्यं तु पापाभ्यासरतेषु च। भृगुः येषु पापे
षु दिव्यानि प्रतिषिद्धानि यत्नतः कारयेत्सज्जनैस्तानि नाभिशस्तं त्यजेन्मनुः अयमर्थः। यः पूर्वकृतमहा
पातकादिः स पुनर्विवादांतरे जातमहापातकाभियोगः सर्वत्रापि दिव्यं कुर्यात् अपि तु स्थानीयैः स
ज्जनैः कारयेत् न पुनरभिशस्तस्य दिव्यमकुर्वतो त्तिमोक्षः इति। मनुर्मन्यते इति घटाद्यपि दिव्यं शी
र्षकमंतरेणापि क्वचिद्दृश्यते भवतीत्याह विनापि शीर्षकात्कुर्यान्नृपद्रोहे च पातके राजद्रोहाभि
योगे महापातकाभियोगे चाभियोक्ता यद्यपि न शिरः स्थायी भवति तथापि दिव्यमभियुक्तः कुर्यात्
द्रोहो जिघांसा च नृपातिना प्रहारः शत्रुपक्षपातो मंत्रभेदो वा नृपद्रोहः पातकाभियोगविषय
मेतत् विष्णुः। राजद्रोहसाहसेषु विनापि शीर्षकवचनात् दिव्यं कुर्यादित्यर्थः पितामहः। अ
थवेदात्मशुद्ध्यर्थं दिव्यं प्रक्रमते नरः शिरस्तस्य दातव्यमिति शास्त्रस्य निश्चयः राजभिः शंकि
तानां च निर्दिष्टानां च दस्युभिः आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना चौराणामस्माकमनेन एम
संघातिनस्त्वेवं दस्युभिर्निर्दिष्टमपि शिरः कात्यायनः लोकापवाददुष्टानां शंकितानां च दस्
युभिः तुलादीनि नियोज्यानि न शिरस्तत्र वै भृगुः नरकास्तशिरः कौशिकस्य पातकादावनं



दिव्यविधिमाह। सचैलस्नातमाहूय सूर्योदये उपोषितं। कारयेत्सर्वदिव्यानि नृपब्राह्मणसंनिधौ। दे
यकर्तारं सूर्योदयसमये सचैलस्नातं पूर्वेद्युः कृतोपवासं चाहूय राज्ञो ब्राह्मणानां च संनिधौ
दिव्यानि सर्वाणि प्राड्विवाकः कारयेत्। नारदः। पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे घटो ध्रुवं। मध्या
ह्ने मध्याह्नात्परतो विषयो दिवसस्यैव पूर्वाह्णे कोशश्चाह्ने विधीयते। रात्रौ तु पश्चिमे याम्ये विषं दे
यं तु शीतले तथा अहोरात्रोषितेनात्र सार्द्रवाससि मानवे। पूर्वाह्णे सर्वदिव्यानां प्रदानमनुप
कीर्तितं। नित्यं दिव्यानि देयानि शुचये सार्द्रवाससे। घटकोशाग्नीनां पूर्वाह्णे नियतः अन्येषां वैकल्पिकः
पितामहः त्रिरात्रोपोषितायैव एकरात्रोषिताय वा। नित्यं दिव्यानि देयानि शुचये सार्द्रवाससे। दिव्येषु
सर्वकार्याणि प्राड्विवाकः समाचरेत्। अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञया। कात्यायनः साध्यस्य
पुनः साध्यं व्याघाते साधनस्य हि। दत्तान्यप्ययथोक्तानि राजा दिव्यानि वर्जयेत्। मूर्खैर्लिखितेष्वदुष्टे
श्च पुनर्देयानि तानि वै। साधनस्य दिव्यस्य व्याघाते साधनस्य हि। दत्तान्यप्ययथोक्तानि राजा दिव्यानि वर्जयेत्।
मूर्खैर्लिखितेष्वदुष्टेश्च पुनर्देयानि तानि वै साधनस्य दिव्यस्य व्याघाते निर्णायकाभावे पुनः साध्यदिव्ये
न साधयेत्। अन्यथा पाठश्चैवं दत्तान्यपि दिव्यानि राजा ज्ञात्वा वर्ययथोक्तानि दद्यादित्यर्थः। मूर्खादिभिर्नहरण

Indira Gandhi National
Centre for the Arts

मयथाशास्त्रदानोपलक्षणार्थं तथा। अदेशकालदत्तानि बहिर्वासकृतानि च। व्यभिचारं सदा भैषु कुर्वती ह न संशयः।
यासो निवासो ऽग्राम इत्येकोऽर्थः तस्माद्यथोक्तविधिना दिव्यं देयं विशारदैः। अयथोक्तप्रयुक्तं तु नैतत्तस्य साधने। पि
तामहः। चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव हि। एते साधारणाः सर्वदिव्यानामविरोधिनः। घटः सर्वर्तुकः प्रोक्तो
वाते वाति विवर्जयेत्। अग्निः शिशिरहेमन्तवर्षास्वपि च दापयेत्। ग्रीष्मे सलिलमित्युक्तं विषं काले हिमावहे
॥ नारदः नाशीते जलशुद्धिः स्यान्नोष्णकाले ऽग्निशोधनं। न प्रावृषि विषं दद्यात्प्रवाते न तुलां नृप। दिव्यमुत्तनि
यममाह। तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणां अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा। निगदव्या
ख्यातमेतत्। अत्र तुलासंबन्धित्वेन स्त्रीबालादयो विधीयन्ते। तेन स्त्र्यादिप्रमुखानामेव तुलेति नियमोपपत्तिः स
र्वत्राहृविधिना विधेयम्यत्ते। न चात्र तुला विधेया किं तद्देश्या प्राथम्यात् तदुक्तं यच्छब्दयोगः प्राथम्यमि
त्युद्देश्यलक्षणं इति। अतश्च प्रवातादिकाले ऽपि स्त्रीप्रभृतीनां धटाद्यसंभवे दिव्यान्तरमपि देयं। संभवे तु तु
लैव। तथा च कात्यायनः। राजन्ये ऽग्निं घटं विप्रे वैश्ये तोयं नियोजयेत्॥ सर्वेषु सर्वदिव्यं वा वर्जयित्वा द्विजोत्त
मे गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान्। प्रेष्यान्वार्धुषिकांश्चैव ग्राहयेच्छूद्रवद्द्विजान्।
नारदः ब्राह्मणस्य धटो देयः क्षत्रियस्य हुताशनः। वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्।

॥६३॥

पितामहः। साधारणः समस्तानां कोशः प्रोक्तो मनीषिभिः। विषवर्ज्यं ब्राह्मणस्य सर्वाण्यन्येषु च त्रिषु।
तोयमग्निर्विषं चैव दातव्यं बलिनां नृणां। बालवृद्धस्त्रियश्चैव परीक्ष्यन्ते घटे सदा। यत्तु जनैको कोशो ब्रा
ह्मणानां कृपणानां बालवृद्धतपस्विनां। स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्वपेक्ष्यते इति। न तुलाव्यति
रिक्तदिव्यविषयं रोगविशेषे दिव्यविशेषनिषेधं स एवाह। कुष्ठिनां वर्जयेदग्निं सलिलं श्वास
कासिनां पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत्। नारदः नमज्जनीयाः स्त्रीबाला धर्मशास्त्रविचक्षणैः
रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः। कात्यायनः। न लोहशिल्पिनामग्निं सलिलं नाम्बुसेवि
नां। मंत्रयोगविदां चैव नाग्निर्दिव्यं विधीयते। तण्डुलैर्न नियुञ्जीत व्रतिनं मुखरोगिणं। पिताम
हः। सर्पपत्नीव्यसनिनां कितवानां तथैव च। कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः। नार
दः। महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते। नास्तिके दष्टदोषे च कोशदानं विवर्जयेत्। महा
भियोगश्चैतानीत्युक्तं। तत्र कारणमादौ कियति धने महत्त्वमभियोगस्य भवतीत्याह। नासहस्रा
द्धरेत्फालं न विषं न तुलां तथा। नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा। नाग्निकं पशासह
स्रप्रभृतिविवादे दिव्याकारयितव्यानि। न पुनः सहस्रादूनसंख्येयकारणविषयविवादे अत्रापि

Indira Gandhi National
Centre for the Arts

वादेनत्यार्थेष्वित्यादि । न्यार्थेषु राजकार्येष्वाक्षिप्ताः तथाभिशापे प्राप्तस्यार्थेष्वयं परमार्थतो निर्दे
शो वेदितव्यः । पणो सहस्रमिति विषयं विनापि दिव्यानि धारयेयुरित्यर्थः । कोशोऽल्पविषयेऽपि भवतीति हा
पयितमिह तस्यामुष्णोदाय नारदः । कोशमल्पेऽपि दापयेदित्यर्थः । बृहस्पतिः संख्याः एषु सहस्रो
मूल्यानां तु नाशमुदाहृता । कार्यपिणां नाशादि स्त्रेनियोज्या विनयोत्तथा । विंशसहस्रे पद्गृत्ते
पादोनेव कृताशनः । त्रिपादोनेव सलिलमर्धे देयो धटः सदा । चतुःशताभियोगे च दातव्य
स्तप्तमाषकः । त्रिशतेनं तु लादेयाः कोशश्चैव तदर्धिके । शतेपकृते च दातव्यं धर्मसाधनं । गो
चोरस्य प्रदातव्यः सम्यक् फलः प्रयत्नतः । एकाशीत्यानि कृष्णलानां पञ्चानां द्विगुणा स्मृता ॥
चतुर्गुणोत्तमानां च कल्पनीया परीक्षकैः । सर्वेषां वर्णानामव्यवस्थया सर्वदिव्यकरणप्रसङ्गमाशङ्क्य
तद्व्यावर्त्यैनेषां संख्याव्यवस्थोक्ता वेदितव्याः यदा तु यथा वर्णविशेषेण दिव्यानि भवन्ति गौरवेण
वतः । तत्राह पितामहः । सहस्रे तु धटं दद्यात् सहस्रार्धे तु पावकं । अर्धस्यार्धे तु सलिलं तस्यार्धे तु
तु विषं स्मृतं । अत्पेनेति तमसङ्ग्रानं चतुरस्त्र विशेषेण कात्यायनः । दत्तस्यापहृतौ चापत्र प्रमाणं तु
प्रकल्पयेत् । तिपसाहस्र ये स्वल्पेऽप्यर्थे प्रदापयेत् । सर्वद्रव्यप्रमाणं तु ज्ञात्वा हे

॥६४॥

५२

मप्रकल्पयेत् हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत् ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतं अशीतेस्तु
विनाशे वै दद्याद्वै हुताशनं । षष्ट्या नाशे जलं देयं चत्वारिंशति वै धटं । विंशद् भविनाशे तु कोश
पानं विधीयते । पञ्चाधिकस्य वा नाशे ततोऽर्धार्धविनाशेन तण्डुलाः । ततोऽर्धार्धविनाशे तु स्पृशेत् पुत्रादिम
स्तकं । ततोऽर्धार्धविनाशे तु लौकिक्यश्च क्रियाः स्मृताः । एवं वर्णाद्यो ऽयमात्मकः । विद्युः । स
र्वेष्वेवार्थजातेषु मूल्यं फलकं कल्पयेत् । तत्र स्वर्णार्धनिष्कादेशः । भूद्रुत्स्पतः परं यथा
द्विपदा पदकं विभागानामन्यतमं द्विगुणार्थैर्यथाभिहितसमयक्रिया यावेयपस्या त्रिगुणार्थैर्यजन्य स्पृश्य कोश
शवर्जनं । चतुर्गुणार्थे प्रत्यस्त्राणामन्यकोश्याप्य । प्रागुक्तदेशं वस्वल्पेऽप्यर्थे दिव्यानामन्यतममेव कार्य
त । तत्र प्रथितमत्याचारे स्पर्शेऽपि तुलाप्रयोगविधिमाह तुलाधारणविधिज्ञैरभियुक्तास्तुला
श्रितः । प्रतिमानसमीभूतो रेखां कृत्वावतारितः । त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता । तत्स
त्यं वद कल्याणि संशयान्मां विमोचय । यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय । शुद्धश्चेद्गमयोर्ध्वं
मां तुलामित्यभिमन्त्रयेत् । अभियुक्तो दिव्यकर्ता तुलामाश्रितस्तुलां तुलामानकुशलैः सुवर्णका

Indira Gandhi National
Centre for the Arts

गादिभिः प्रतिमानेनमृदादिनासमीकृतस्तत्पात्रामापादितस्तुलाभिक्षोधामाः। प्रतिमानसमीकरणम
पवव्रपविशुसंयुक्ता ग्रासलत्रैरखां कृत्वातुल्यतोवतारितस्तुलेत्यादिनागमयोर्ध्वमामित्येतेनमंत्रेण
तुलामभिमंत्रयेत। तुलाभिमुखोभूत्वेमंत्रमुच्चारयेदित्यर्थः। पितामहः। छित्वतुयज्ञियंवृक्षंयूपवन्मं
त्रपूर्वकं। प्रणाम्यलोकपालेभ्यस्तुलाकार्यामनीषिभिः। मंत्राः सौम्योवानस्पत्यछेदनेनजप्य एवव
नारदः। खादिरीकारयेत तत्रनिर्वणां शुष्कां वर्जितां। शेशंपीतरलाभेतुमालाहाक्ष्मोटैरविना। एवंवि
धानिकाष्ठानियटार्थपरिकल्पयेत। अरत्नीधटतुलाकार्याअरत्नीत्वादिहीनेंदुरीतेंवकीतथा।
चतुरस्लाविभिः स्थानेः धटकर्ककटादिभिः। धरोमसंकर्कटकावर्तौ। पितामहः। प्राङ्मुखोनि
श्चलः कार्यः शुचौदेशेधटः सदा। इंद्रस्थानेसभायांवाधर्मस्थानेचतुष्पथे। अदागन्नोपिभवति
बदाहनारदः। धारयेदुत्तरेपार्श्वेपुरुषंदक्षिणेशिलां। अपोवित्याहुदग्रमुत्तरतः। सभाराज राम:
कुलद्वारिस्करायतनचत्वरे। निरयेनिश्चलः पुष्पगंधमाल्यानुलेपनेः। दध्यक्षतहविर्गंध
कृताध्ययनमंगलः। धर्मारक्षार्थमाहूतोलोकपालेरधिष्ठितः पितामहः। तत्रैवलोकपाला



न्सर्वदिक्षुनिवेशयेत। त्रिसंध्यंपूजयेदेनंधूपमाल्यानुलेपनेः। लोकपालास्तथादित्यारुद्राश्चसल
था। पूजाप्रभावयुक्ताश्चसान्निध्यंकल्पयंतिते विप्रालामुद्धितांशुभ्रांधटमालांतुकारयेत। यत्रस्थानेप
हन्यतश्चभित्रंदालंबायसैः। कवाटबीजसंयुक्तांपरिवारकरक्षितां। पानीयाग्निसमायुक्तामश्मभ्यां
कारयेत। घटंतुकारयेत्त्रिस्पपताकाध्वजशोभितं। वादित्रतूर्यघोषैश्चधूपमाल्यानुलेपनेः। तथा।
चतुरस्तातुलाकार्यादृढाऋज्वीतथैवच। कटकानिवदेयानित्रिषुस्थानेषुयत्नतः। चतुर्हस्ता
तुलाकार्यापादौचोपरितस्तमौ। अंतरंचतयोर्हस्तोभवेदध्यर्धएवच। कटकानिलोहवलयानि अध्य
र्धःसार्धः। व्यासः। हस्तद्वयंनिखेयंतुपादयोरुभयोरपि। धरादुच्चतुरस्तौतौतिर्यग्दशभिरंगुलेः। अवल
मौचकर्तव्यौतोरणाभ्यामधोमुखो। स्तंभयोस्तत्रसंवधोधर्ममस्तकचुंविनौ। प्राङ्मुखौनिश्चलःकार्यः शुचौ
देशेघटस्तथा। शिक्यद्वयंसमासज्यपार्श्वयोरुभयोरपि। प्राङ्मुखान्कल्पयेदेताशिक्ययोरुभयोरपि। पश्चि
मेतोलयेत्कर्तेनन्यस्मिन्मृत्तिकांशुभां। पिटकेकारयेत्तस्मिन्निष्टकायांतुलोष्टकैः। परीक्षकानियोक्तव्या।
स्तुलामानविशारदाः। वाणिजोहेमकाराश्चकांस्यकारास्तथैवच। कार्यःपरीक्षकैर्नित्यमवलंबसमोधटः

Indira Gandhi National
Centre for the Arts

उक्त्वा प्रहात्तयं धटस्योपरि मेङ्कितेः। यस्मिन्नस्य वैतैतायस्य विज्ञेयः समो धटः। तोलयित्वा नरं पूर्वं पश्चात्तमनार
येत्। धटं तु कारयेन्नित्यं पताका ध्वजशोभितं। ततः आवाहयेद्देवान्विधिनानेन मंत्रवित्। वादित्रतूर्यघोषैश्च गं-
धमाल्यानुलेपनैः। प्राङ्मुखः प्रांजलिर्भूत्वा प्राड्विवाकस्ततो वदेत्। एह्येहि भगवन्धर्म अस्मिन्दिव्ये समा-
विश। सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः। तस्यार्थमभियुक्तस्य लेखयित्वा तु पत्रके। मं-
त्रेणानेन सहितं कुर्यात्तस्यैव शिरोगतं। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च
अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तं। इमं मंत्रविधिं कृत्वा संपर्वदिव्येषु तोऽयात्
आवाहनं चाद्यानामर्थेन परिकल्पयेत्। धटं त्वं ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनां प्र-
कारात् त्वमसि त्वं कारणात्कुशीलानां धटो धारयसे यस्माद्धटस्तेनाभिधीयसे। विष्णुः।
त्वमेव धट जानीषे न विदुर्यानि देवताः। व्यवहाराभिशस्तोयं मानुषस्तोल्यते त्वयि। तदि- रामः
नं संशयापन्नाद्धर्मतस्त्रातुमर्हसि। ब्रह्मघ्नाये स्मृता लोका ये लोकाः कूटसाक्षिणः। तुला-
धारस्य ते लोकास्तुलां धारयतो मृषा। नारदः। समयैः परिगृह्याथ पुनरारोपयेन्नरं। नि-



वाते रुधिरे हिते शिरः स्वारोप्य पत्रकं तुलितो यदि वर्धेत शुद्धो भवति धर्मतः। समो वा हीयमानो वा
न शुद्धो वा भवेन्नरः। तुलितस्तोलितो यदि वर्धते ऊर्ध्वं गच्छति ततो न तु कुरुक्तस्तदा शुद्धः स-
त्यप्रतिज्ञो भवति। यदि समो धोगामी वा भवति। तदासौ नीम विशुद्धो सत्यप्रतिज्ञः यत्तु पिता-
महेनोक्तं। अल्पपापः समो ज्ञेयो बहुपापस्तु हीयते। धर्मगौरवमाहात्म्यादतिरिक्तो
विशुद्धिरिति। तदेतत् प्रायश्चित्ततयोरल्पत्वपरं व्यवहारे तु समस्यापि पराजय एव नादि
दोषाल्पत्वेन दानव्यवधानस्य संख्याल्पत्वविशेषः प्राक्तो व्यवस्थातं येन व्यवहारेपि दोषा-
ल्पत्वं प्रवृत्तिविषयावकाशमुपयात्। बृहस्पतिः। धटेभियुक्तस्तुलितो हीनश्चेद्धानिमा-
प्नुयात्। तत्समत्वे पुनस्तोल्यो वर्धितो विजयी भवेत्। एवं च सति प्रथमतोलेन पर्याप्तसमस्य पुनस्तोल्यमान-
स्यापि समत्वे भवति तदा नाम विशुद्धिर्यथा रत्नी वा न प्रथम एव पर्याप्ते स्वकारणान्तरसापेक्षदोषेण यथाबधी-
र्यः। नारदः नारदः। कक्ष्याच्छेदे तुलाभंगे धटकर्कटयोस्तथा। रज्जुच्छेदेक्षभंगे च मूर्छितः शुद्धिमाप्नु-
यात्। कक्ष्या शिक्यं। शिक्याधारवंशस्तम्भावकुंभौ ककौ। तुला प्रसिद्धा अक्षः स्तम्भद्वयोपरिस्थितं तु-
लाधारभूतं काष्ठं। तुलादीनां समुत्पाधटः। यदा तु दृष्टादेर्दहनोरिकच्छादि भवति तदा पुनः क्रिया

Indira Gandhi National
Centre for the Arts

तदाह कात्यायनः। शिक्यच्छेदे तुलाभंगे तथा चापि गुणस्य वा। शुद्धेरूसंशये चैव परीक्ष्येत पुनर्नरं। नारदः। तुलाशि
रोभ्योमुद्रां नैव चलेत् स्थल लक्षणं। यदा वायुप्रणेनेदाचलत्युर्ध्वमधोपि वा॥ मर्मज्ञः सहसा चापि तदा नैकेन
खंडेन। मध्याचतुलासाम्य पञ्चलादि लक्षणं। न्यस्तेन द्विचलति यदा वयायुनाप्रेरितोथ उर्ध्वमध
श्चकंपते यदा च तुलाआरके गसह सो कपटोविमुच्यते। तदा जयं पराजयं वाना वदेत्। किं च पुनस्तो
येत। एवं शिक्यछेदादादावपि क्रमप्राप्तमिदानीमग्निदिव्यप्रयोगमाह। करौ विमृदित व्रीहि लक्षयि
त्वा ततो न्यसेत्। सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत। उपवासादि साध्याभीलाविलंधारणां तत् कृ
त्वा ततः करौ विमृदित व्रीहि विमृदितौ विमर्दिता। व्रीहयो याभ्यां तौ विमृदित व्रीहि करौ लक्षयित्वा
तयोर्धस्तलादिकमुपलक्ष्य न तत्पक्षयेदंकयेत। अग्निधारणात्प्राक्तनमतीदिनिज्ञानार्थं। ततस्तयो
रंजलीभूतयोरश्वत्थस्य सप्तपत्राणि विन्यसेत्। ततस्तावन्ति देवहस्तैः सप्तभिर्वेष्टयेत। हारीतः। प्रा
ङ्मुखस्तु ततस्तिष्ठेत् प्रसारितकरांगुलि आर्द्रवासाः शुचिश्चैव शिरस्यारोप्यपत्रकं। पिताम हः॥ एतः
पश्चिमे मंडले तिष्ठेत् प्राङ्मुखः प्रांजलिः शुचिः लक्ष्यणेयुः क्षताधीनि हस्तयोस्तस्य कारिणाः।
करौ मृदित व्रीहि तस्यादावेव लक्षयेत् नारदः। लक्षयेत्तस्य चिह्नानि हस्तयोरुभयोरपि।



प्राकृतानि च गूढानि सव्रणान्यव्रणानि च। कृत्वैवमभियुक्तस्य प्रथमं हस्तलक्षणं। मंडलस्यार्धजद्रुद्या
नत्र घतमग्नेोप यथाविधि। तथा हस्तक्षतेषु सर्वेषु कुर्यात् हिंदुपदानि तु। तान्येव पुनरालक्ष्येत्तो
विंदुर्विविचित्रतो। सप्ताश्वत्थस्य पत्राणि त्वभियुक्तस्य हस्तयोः। कृत्वा वस्यानि यत्नेन सप्तभिस्त
न्तुभिः पितामहः। सप्तपिप्पलपत्राणि शमीपत्राण यथाक्षतान्। हस्तयोर्निक्षिपेत्तस्य तं
तन्तुभिः पितामहः। सप्तपिप्पलपत्राणि शमीपत्राणि यथाक्षतान्। वस्तितिर्हि ने हणभु दूल
तन्त्रा ऽत्रस्य सप्त च। बृहः। अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः। अत्र तर्हि नेह णभुद्दल
दग्धः सप्तमे पदे। किं च। त्वमग्ने सर्वभूतानामंतश्चरसि पावक। साक्षिवत् पुण्यपापेभ्यो ब्रूहि
सत्यं कवे मम। तस्मिन्मुक्तवतो लोहं पंचाशत्पालिकं समं। अग्निवर्णं न्यसेत् पिंडं हस्तयोरुभयो
रपि। त्वमग्ने इत्यादिकं कवे मम मेत्यंतं मंत्रमुक्तवतोभियुक्तस्य हस्तयो लौहमयं पंचाशत्पल
लपरिमाणमग्निवर्णमग्निरहितं पिंडं प्राड्विवाको विन्यसेत्। समं मनिम्नोन्नतं। पितामहः
तापयित्वा ततः पश्चादग्निमावाहयेद्बुधः। त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे। त्वंमुखं

ता

सर्ववेदानां त्वं स्तत्वं ब्रह्मवादिनां। उदरस्थोसि भूतानां ततो वेत्सि शुभाशुभं। पापं पुनासि वै यस्मात्तस्मा
त्पावक उच्यसे। पापेषु दर्शयात्मानमर्चिष्मान् भव पावक। अथवा शुद्धभावेषु शीतो भव म
हाबल। आयसं लोलिहानस्य जिह्वयापि समादिशेत्। तथा अग्निहीनं समं कृत्वा अष्टां
गुलमयोमयं पिंडं तु तापयेदग्नौ पंचाशत्पालिकं समं। संतापयेत्तु गंतिरित्यर्थः। नारदः।
जनस्यैव लोहकारेण यः कुशलश्चाग्निकर्मणि। दृष्टप्रयोगश्चान्यत्र तेनैवाग्नौ तु तोययेत् अ
ग्निवर्णमयः पिंडं सस्फुलिंगं स्वयंत्रितं। पंचाशत्पालिकं नृप कारयित्वा द्विजः शुचिः
ततोयतापि तं प्रष्टं ब्रूयात्सत्यपुरस्कृतः। प्राणिसंमानवं धर्मं लोकपालैरधिष्ठितः। त्वमग्ने
सर्वभूतानां हृदिस्थो वसि वेष्टितं। सत्यानृते वजिह्वायास्त्वत्तः समुपलभ्यते। वेदादिभि एभः
रिदं प्रोक्तं नान्यथा कर्तुमर्हसि। अनेनाद्यावि दंपोक्तं मिथ्या वेद समो वदेत् सर्वथा वक्तथा
मिथ्यानथाग्निं धारयाम्यहं सएव त्वां धारयति सत्येनानेन मानवः सत्यवाक्यस्य वाक्यस्य त्व

॥६७॥

शीतो भव हुताशन। मृषावाक्यस्य पापस्य दह हस्तौ च पापिनः असमर्थाव पत्रस्थामभियुक्तं यथो
र्थतः। संश्राव्य मूर्जितस्यैव स्वस्य देवस्य पुष्पाक्रियं। त्वं देवानां जितेंद्रियस्वयः। दिव्यः स पुष्पोदय
रस्पर्थः। सतमौदाय सप्तैव मंडलानि शनैर्व्रजेत षोडशांगुलिकं ज्ञेयं मंडलं तावदंतरं। सोभि
युक्तस्तमयः पिंडकमग्निवर्णं कराभ्यामादाय शनैरत्वरमाणः। सप्तसु मंडलेषु सप्त क्रमा
क्रान्त्वा व्रजेत। मंडलानि च प्रत्येकं षोडशांगुलपरिमाणानि मंडलानां चांतराण्यपि प्रत्ये
कं षोडशांगुलान्येव। पितामहः। अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितं। कार्ये
मंडलान्यष्टौ पुरस्तात्त्रमं तथा। आग्नेयं मंडलं त्वाद्यं द्वितीयं वारुणं तथा। तृती
यं वायुदैवत्यं चतुर्थं यमदैवतं। पंचमं त्विंद्रदैवत्यं षष्ठं कौबेरमुच्यते। सप्तमं सोमदैवत्यम
ष्टमं सर्वदैवतं। पुरस्तान्नवमं यत्तु तन्महत्पार्थिवं विदुः। गोमयेन कृतानि स्फटिकैः पर्युक्षि
तानि च हस्तिमात्रं गृह्णीयात् मंडलान्मंडलांतरं। कर्तुः पादसमं कार्यं मंडलं तु
प्रमाणतः। अत्र प्राक्संस्थानि मंडलपंक्तिलवती कायांत्र पश्चिमं मंडलीद्व्यक तुरीय

Indira Gandhi National
Centre for the Arts

स्थाने चैव अंजलिस्थितो गृह्णीयादभिमंत्र्य ह्यग्निं । यस्मादाह स एव पश्चिमे मंडले तिष्ठेत्प्राङ्मुखः
प्रांजलिस्थविधिरिति । नवमं तु मंडलमग्निक्षेपार्थं यस्मात्स एवाह । त्वरमाणो न गच्छेत्तु स्वस्थाग
च्छेच्छनैः शनैः ॥ न मंडलमतिक्रामेत्पादाग्रं तावदास्थापयेत्पदं । अष्टमं मंडलं गत्वा नवमे निक्षिपेद्बुधः
यत्तु । एकस्मान्मंडलाद्द्वितीयं मंडलं द्वात्रिंशदंगुलानि । पुनक्तं तदंतरालस्य मंडलस्य मिलितस्य
परिमाणमिति विदितव्यं । न तु केवलस्यांतरालस्य मंडलस्य वा । एवं हि षोडशांगुलमित्या
दिवचनाविरोधः ॥ तत्र यदि षोडशांगुलं मंडलं तदंतरालमपि षोडशांगुलकमेव । यदा तु कर्णपदेन
परिमितं मंडलं तदंतरालं च सप्तदशांगुलं कार्यं । नान्यथा मांतरालस्य मंडलस्य द्वात्रिंशदंगुलता स्यात्
नारदः ॥ अतःपरं प्रवक्ष्यामि विधिमग्नेस्तथोत्तरं । द्वात्रिंशदंगुलान्याहुर्मंडलान्मंडलांतरं । सप्तभि
मंडलैरेवमंगुलानां शतद्वयं । चतुर्विंशत्समारभ्य ताभूमस्य परिकल्पना । मंडलस्य प्रमाणं तु कुर्या गमः
त्पादसंमितं । पितामहः ॥ मंडले मंडले देयाः कुशाः शास्त्रप्रचोदिताः ॥ विन्यसेत्तु पदं कर्ता तेन
पुनिन्यमिति स्थितिः ॥ नारदः ॥ स्थित्वैकस्मिंस्ततोन्यानि व्रजेत्सप्त च जिह्मगः ॥ असंभ्रांतः संयोग

॥६॥

छेदकृद्भस्मोनलं प्रति । नयातपि तामप्राप्य याभूमिः परिकल्पिता ॥ मुक्त्वाग्निं मृदितव्रीहिरदग्धः
शुद्धिमाप्नुयात् । अंतरा पतिते पिंडे संदेहे वा पुनर्हरेत् सप्त मंडलानि गत्वाग्निं विमुच्य कराभ्यां वि
मर्दितं । व्रीहिरदग्धहस्तः शुद्धोन्यथा त्वशुद्धः ॥ यदि पुनर्मध्य एवायःपिंडः पतेत् । कारणांतराह
संदेहे जाते पुनर्हरेत् पितामहः ॥ ततस्तु हस्तयोः प्रास्य व्रीहीन्वा यदि वा यवान् । निर्विशंकेन
तेषां तु हस्ताभ्यां मर्दने कृते । निर्विकारौ दिने तस्यां ते शुद्धिं तस्य विनिर्दिशेत् नारदः ॥ तस्यैवं संस्कृत
येदस्य कुर्यात्करनिरीक्षणं । पूर्वदृष्टेषु चिह्नेषु तत्रान्यत्रापि लक्षयेत् । मंडलं क्रमसंकाश्य
त्रान्यहाग्निसंभवं । सोपि शुद्धस्तु विज्ञेयः सत्यधर्मव्यवस्थितः । यदा तु न विभाव्येत दग्धाविति क
रौ तदा । व्रीहीन्नतिप्रयत्नेन सप्तवारांस्तु मर्दयेत् । मर्दिते रेव नो दग्धः सम्यग्वेदविनिश्चितः
माप्यः शुद्धः समस्तकृत्स्नदग्धोदंडो यथाक्रमं । नारदः ॥ यत्त्वंतरापातयति । दग्धश्च न विभाव्यते
पुनस्तं हारयेदग्निमिति स्थितिरियमाह्निकृता । कात्यायनः । पालवल्लभयुक्तश्चैव तथानादस्तत्र च
ध्रुतं । नरदग्धं न विदुर्दत्तात्तस्य भूयोपि दापयेत् दारुणस्थानं हस्तेन नान्यत्रावयवे दग्धस्य पु

Indira Gandhi National
Centre for the Arts

नदीष्वपीत्यर्थः। अथ जलपरीक्षाप्रयोगमाह ह्येतत् दाहस्य स्थाने ह्लीनं ततोऽन्यत्रावयवेद्यमस्य पु
नदीष्वपीत्यर्थः। अथ। सत्येन माभिरक्षस्व वरुणेत्यभिशापकं। नाभिदघ्नोदकस्थस्य गृही
त्वोरुं जलं विशेत् समकालमिषुं मुक्तमानयेद्यो जवी नरः गते तस्मिन्निमग्नांगं पश्येच्चे
च्छुद्धिमाप्नुयात्। सत्येन माभिरक्षस्व वरुणेति मंत्रेण के जलमभिमंत्रयेत् अस्मि
न्नेव काले जलप्रवेशशरादिमुक्तः शरो यत्र निपतिष्यति तत्र बलवंतं पुरुषं स्थापयेत्। त
तो नाभिमात्रे जले यः स्थितस्तस्य पुरुषस्य पादौ गृहीत्वा शुद्धिकामो निमज्जेत्। अस्मिन्ने
व काले तिकुशलेन धान्विना विमुक्तस्तु स तत्र देशे निपतितं तं देशं यातिवेगवान्पुरु
षः सर्वेगान्वावेत् ततस्तत्र देशे यः प्राग्वस्थितः स तं सगृहीत्वा निजवेगेनागच्छे
त्निमग्नसर्वांगो सोऽप्यपश्यन्नेपश्यन्तिनो निमग्नः शुद्धिमाप्नुयात्। अशुद्धिमन्यथा। पिता
महः तोयस्यातः प्रवक्ष्यामि विधिधर्मं सनातनं मंडलं पुष्पधूपाभ्यां कारयेत्तु विचक्षणः एम:
शरान्संपूजयेन्मन्त्रान्वेणुं वंशमनुत्तथा मंडयेनेषु प्रविधुञ्चितः कर्मसमाचरेत्। कार्मा
पनः। शराद्भुनायसेरग्रैः प्रकुर्वीत विशुद्धेन। वेणुकांडमयो धन्वं प्रक्षेपस्तु क्षेपण।

॥७०॥

पितामहः। क्षेप्तानुक्षत्रियः कार्यस्तद्वृत्तिर्वा ब्राह्मणोपि वा अक्रूरहृदयः शांतः सोपवासः शराक्षि
पेत्। स्थूलं प्रक्षिपेद्धि हाम्याहतेवातिवाभकं। विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले।
नारदः। क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतं। मंदं पंचशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः।
सप्ताधिकं सप्तशतं एवं षट्शतं पंचशते। अंगुलसंख्यावेधा पितामहः। मध्यमेन तु चापे
न प्रक्षिपेच्छरत्रयं। हस्तानां तु शते सार्धं लक्ष्यं कृत्वा विचक्षणः। तेषां च क्षेपितानां तु श
राणां स्थाल बोदनात् मध्यमतः शरो ग्राह्यः पुरुषेणापवर्जीयसा। शराणां पतनं ग्रा
ह्यं सर्पणं परिवर्जयेत् सम्यक् सर्पति दोषायाति दूराद्दूरतरं तु यः। नारदः। नातिक्रूरेणाय
नुबाक्षेपयित्वा शरत्रयं। पानीयमज्जनं कार्यं शाकायत्र न जायते। उशनाः। शरांशाप्र
पितानां स्यात्समग्रांगनिमज्जनं कात्यायनः। क्षिप्तं तु मज्जनं कार्यं गमनं सर्वकालिकं।
गमने त्वागमे वाप्यः पुमान्सोजले विशेत्। पितामहः। स्थिरतोयेनिमज्जेत्तु न ग्राहिणि
नवास्यके। न गाभीबालरहिते जलकामास्यवर्जिते। देवतातेषु यत्तोयेनास्मिन् कुर्या

द्धिमोधनं। आहार्यवर्जयेन्नित्यं शीघ्रवेगं नदीषु यत्तोयं तस्मिन्कुर्याद्धिमोधनं आहार्यवर्ज
येन्नित्यं शीघ्रवेगां नदीषु वा। नदीषु नातिवेगासु तटाकेषु सरःसु वा। ह्रदेषु स्थिरतोयेषु कु
र्यात्सुसंनिमज्जनं। पितामहः स्यात्पयेत्सुहृत्पंतोयेतांभवस्वपसंहहे। आपिन्नित्यं नानिम
ज्जेयुर्मानवाः शुद्धिकांक्षिणः। नारदः ब्राह्मणः क्षत्रियो वैश्यो वा रागद्वेषविवर्जितः। नाभि
मात्रे जले स्थाप्यः पुरुषः स्तंभवत्ततः लीनस्यो प्रान्तिसंस्थ घनिमज्जेदभिशापवान्। शावंरुभं
प्रमाणस्थानायुबाजवसमन्वितः। गच्छेत्पारमेपाश्रुत्वाय ज्ञालोमध्यमं शरः। मध्यमं शरा
मादाय पुरुषो न्यस्ततथाविधः। प्रत्यागच्छत्तु वेगेन यतः स पुरुषो गतः। आगतस्तु शा
रग्राही न पश्यति समाप्य पुरुषो जले। अंतर्जलगतं सम्यक् तदा शुद्धं विनिर्दिशेत्। बृ
हस्पतिः। आनीते समं मध्यमे वाणे मग्नांगः शुचितामियात्। नारदः। अन्यथा न विशुद्धिः स्यात्
स्यादेकांगस्यापि दर्शने स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः। कात्यायनः। शिरोमा
त्रं न दृश्येत न कर्णौ नापि नासिका अप्सु प्रवेशने यस्य शुद्धं तमभिनिर्दिशेत्। निमज्जोत्प्लु

॥७१॥

वेतमत्स्यः दृश्येत् प्राणिनारदः। पुनस्तत्र निमज्जेत्सदृशं चिह्नविभावितः। अथ विषदिव्यप्रयोगमाह। त्वं
विष ब्राह्मणः पुत्रः सत्यधर्मे व्यवस्थितः। त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतं। एवमुक्त्वा
विषं शार्ङ्गं भक्षयेद्धिमशैलजं। यस्य वेगैर्विना जीर्णं शुद्धिं तस्य विनिर्दिशेत्। सर्वदिव्यसाधा
रणासाध्ये धर्मे विधानापर्यंते धर्मजाते कृते वक्ष्यमाणप्राड्विवाकमंत्रप्रयुक्ते वक्ष्यमाण
नवाभिशापप्रयोज्यमंत्रेण विषमभिमंत्रितेनैवं विषब्राह्मणस्त्वमनेन मंत्रेण विषं शार्ङ्गं हिम
वदुत्पन्नं सप्तयवपरिमाणमभिशस्तो भक्षयेत्। यस्य तद्भक्षितं वेगैर्विना जीर्णं भवति
परिणामयति सप्तधातून्विपरीतान्गुरुः। वेगास्त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः एते
ष्वेकस्मिन्धातौ वर्तमानस्य विषस्य शीघ्रं धात्वंतरप्राप्तिर्वेगः। न त्वचि वर्तमाने विषे रोगा
ख्यं जनयति न देहे लोहितं प्राप्य स्वेदं त्वङ्मांसं च मांसं प्राप्य वैवर्ण्यं मेदः प्राप्य कंपं दृष्ट्वा
स्थानं नेत्रपाववश्यं मज्जागतं तु विषादिमोहं च। तदेवं शुक्रगतं मरणं जनयति। नारदः। अतः
परं प्रवक्ष्यामि विषस्य विधिमुत्तमं। यस्मिन्काले यदा देयं यादृशं च प्रकीर्तितं। यवमात्राः स
मुहूर्ताद्धर्मतत्त्वार्थदर्शिभिः। तुलायां चैवच्छतः काले देयमतीतमागमे। नापराह्णे न मध्याह्ने न

Indira Gandhi National Centre for the Arts

संध्यायां च वर्मकिल । प्राज्ञोऽम्ब वसंते च सुवंचपिस्व वर्षविवर्जयेत । भग्नं च धारितं चैव धूपितं मिश्रितं तथा । का
कृटमस्लावुं च विषं यत्नेन वर्जयेत । वर्षासु षड्यवमात्रा ग्रीष्मे पंच यवाः स्मृताः । हेमंते तु यवाः
सप्त प्रोक्ताः स्वल्पाल्पतनापि हि । पितामहः । चारिजान्यभिजीर्णानि कृत्रिमाणि तथैव च । भूमिजानि
च सर्वाणि विषाणि परिवर्जयेत । श्रावणीन्मंत्रयोगांश्च मणीनर्थविषापहान् । कर्त्तुः शरीर
संस्थांश्च गृहीत्वान्यान्यरिक्षयेत् । कात्यायनः । भूजाशृंगनिभं यस्मात् पीतं शृंगसंभवं भंगेच
शृंगधीप्रभं ख्यातं तद्भंगिरणाविषं । ... कुर्यात्कीर्तितं चैव तत्क्षणात । अनेन विधिना ज्ञे
यं विषं दिव्यविशारदैः । वत्सनाभनिभं पीतं वर्णज्ञानेन निश्चयः । श्रुतिशृंगाकृतिशृंगी विषा
त्वत्सनाभकं मधुक्षीरसमायुक्तं खचं कुर्वीत तत्क्षणात । वायुसंवेसमाख्यातं लक्षणं धर्म
साधकैः । कुमसत्कृष्णेन संमर्षकुष्ठं कठिनं च तत्क्षणात् । वर्ति नच्छृंगिविषं ज्ञेयमित्यर्थः । पिता
महः । यवाः सप्त प्रदातव्याः शुद्धिहेतोः सशृंगिणो वत्सनाभस्य हिमजस्य विषस्य वा । का
त्यायनः । पूर्वान्हे शीतले देशे विषं दद्यात्तु देहिनां । घृतेन योजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणेन तु ।
त्रिंशद्गुणेन घृतेनेत्यन्वयः । नारदः । दद्याद्विषोपवासाय देवब्राह्मणसंनिधौ । धूपोपहारमंत्रैश्च

॥७२॥

पूजयित्वा महेश्वरं । द्विजानां संनिधाने च दक्षिणाभिमुखे स्थिते । उदङ्मुखः प्राङ्मुखो वा दद्याद्विषं
समाहितः । कात्यायनः । विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः । तमष्टभागहीनं तु शोध्ये
देयं घृतप्लुतं । पितामहः । नीयमानं करे कृत्वा विषं तु पायेरयेत । विषत्वं ब्राह्मणस्य
षः पोष्यार्थ दुष्टमनां । पापेषु दर्शयात्मानं शुद्धानाममृतं भव । विष्णुः । विषत्वाहिषमत्वा
श्च सर्वसत्वस्य देहिनां । त्वमेव विप्र जानीषे न विदुर्यानि मानवाः । व्यवहाराभिशस्तोऽयं मानु
षः शुद्धिमिच्छति । तदेनं संशयात्तस्माद्धर्मतस्त्रातुमर्हसि । अयं च मंत्रः सामर्थ्याच्छ्राद्धिथाके
न वाच्यः । पितामहः । भक्षितं यदि सम्यक्स्यामर्षच्छर्दिविवर्जितः । निर्विकारो दिनस्यांते
शुद्धं तमिति निर्दिशेत । नारदः । छायायां न वेगिनीरस्थो दिनम्यो च समभोजनः । विषवेगक्र
मापेतः शुद्धो सोमनुग्रमधीत । वृहस्पतिः । विधिदत्तं विषं येन जीर्णमिनोऽषधिविना । सशुद्धः
स्यात्तस्य चातदंत्योदाप्यश्च तद्धनं । पितामहः । त्रिरात्रं पंचरात्रं वा पुरुषैः स्वैरधिष्ठितं । कु
हिकां शंकयात्राजातार्थे हि मधारिणां । स्वयंकोश्मविधिमाह । देवानुग्रान्समभ्यर्च्य तेषां
नोदकमाहरे संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयं । सर्वदिव्यसाधारणं सर्वधर्मधर्मी

Indira Gandhi National
Centre for the Arts

कृत्वे उग्रानादिदेवान्सम्पूज्य गन्धपुष्पादिनाभ्यर्च्य तत्स्नानोदकमाहृत्य तस्मादुदकात्तसेनमाभिरक्ष्य
धर्मागोत्थभिमंत्रितात्प्रसृतित्रयं दिव्यकर्तारं पाययेत् । प्राड्विवाक इति शेषः । पितामहः । भक्तो
ऽयमस्मै देवस्य पापं चेत्तत्पतेन्नरः । समभावेन तु देवानामादित्यस्य तु पाययेत् । बृहस्पतिः । यस्तु
कः सोऽभियुक्तः स्यात्तदैकपुष्पमंडलं । प्रक्षाल्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयं । नारदः । पूर्वा
ह्ने सोपवासस्य स्नातस्याद्रपटस्य च । सशूकस्याव्यसनिनः कोशपानं विधीयते । वृद्धः । श्रद्द
धानस्य देवब्राह्मणसंनिधौ । यस्तु कः सोऽभियुक्तः स्यात्तद्देवस्य हापयेत् । सशूक आस्तिकः
कात्यायनः । स्वल्पेऽपराधे देवानां स्नापयित्वा युधोदकं । पाप्माविकारो वा शुद्धो नियमस्थः शुचिस्तथा
पाप्यः पाययितव्यः कोशमिति शेषः विकारेण निषिद्धनियम्योऽयं । पितामहः । दुर्गायाः पाययेत्
चौरान्ये च शस्त्रोपजीविनः । भास्करस्य तु यज्ञोपं ब्राह्मणं तत्तु पाययेत् । दुर्गायाः स्नापयेच्छू
लमादित्यस्य च मंडलं । इतरेषां तु देवानां स्नापयित्वा युधानि तु । मद्यपस्त्रीव्यसनि राभः
नाकितवानां तथैव च । कोशः प्राज्ञैर्न दातव्यो येवनास्तिकवृत्तयः । नारदः । महापराधे नि
र्धर्मे कृतघ्ने क्लीबकुत्सिते । नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेत् । तमाहृत्याभिय

॥७३॥

क्तं तु मंडलाभ्यंतरे स्थितं । आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयं । जयपराजयावधारणा
माह । अर्वाक्चतुर्दशादह्नो यस्य नो राजदैविकं । व्यसनं जायते घोरं स शुद्धः स्यान्न सं
शयः । कोशपानदिनप्रभृति चतुर्दशदिनानि यावद्यस्य राजदैवकृतं घोरं तीव्रं व्यसनं दुःखकारणं
न जायते स शुद्ध एवेति वेदितव्यं उक्तकालेन तु व्यसनोदये प्यशुद्धिर्नाशंकनीया । नारदः । दुर्व्यप
स्याहि सप्ताहाद्वैकृतं तु महद्भवेत् नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात् । विष्णुः । यस्य
पश्येद्द्विसप्ताहात्त्रिसप्ताहाद्वापि वा । रोगोऽग्निर्ज्ञातिमरणं राजदंडमथापि वा तमशुद्धं वि
जानीयात्तथा शुद्धं विपर्यये । पितामहः ॥ त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहात्तथापि वा ॥
वैकृतं यस्य दृश्येत पापकृत्स तु मानवः ॥ तस्यैकस्य न सर्वस्य जनस्य यदि तद्भवेत् ॥
रोगोऽग्निर्ज्ञातिमरणं सैव तस्य विभावना ॥ कात्यायनः ॥ अर्थं दैवविसंवादात्त्रिसप्ता
हात्तु दापयेत् ॥ अभियुक्तं तु यत्नेन तमर्थं दंडमेव च ॥ अत्र दिनसंख्याल्पत्वमहत्त्वे

Indira Gandhi National
Centre for the Arts

अभियोगविषयस्याल्पत्वमहत्वानुसारेणवेदितव्यं॥ तत्रात्यंतमहाभियोगेत्रिस
प्तादमहाभियोगमात्रेतुचतुर्दशाहइत्यादिकल्प्यम्॥ ॥पितामहः॥ तं
डुलानांप्रवक्ष्यामिविधिंभक्षणवर्जने चौर्येतुतंडुलादेयानान्यस्मिन्निति
श्चयः॥ तंडुलान्कारयेच्छुक्लाञ्शालेर्नान्यस्यकस्यचित्॥ मृण्मयेभाजने
कुर्यादादित्यस्याग्रतःशुचिः॥ स्नानोदकेनसंमिश्रान्रात्रौतस्यैववास
येत्॥ प्रभातेकारिणेदेया आदित्याभिमुखस्यतु॥ कारिणःशपथका
रिणः॥ आदित्याभिमुखस्यप्राङ्मुखस्येत्यर्थः॥ तंडुलान्भक्षयित्वातुपत्रे

॥२४॥

निष्ठीवयेत्ततः॥ भूर्जस्यैवतुनान्यस्यस्यालाभेपिलस्यतु॥ शोणितंदृश्यतेयस्यहनुस्तालु
चशीर्यते॥ गात्रंचकंपतेयस्यतमशुद्धंविनिर्दिशेत्। उपजिह्वातालुपानी
मुखरोगीतथैवच॥ तेषांनतंडुलादेयाःशंकयाशोणितस्यच॥ सर्वदिव्य
साधारणंधर्मजातमित्यपिकर्तव्यं। तप्तमाषस्यवक्ष्यामिविधिमुद्धरणेशुभं
॥कारयेदायसंपात्रंताम्रंवाथहिरण्मयं॥ चतुरंगुलमुत्सेधंमृण्मयंवापि
वर्तुलम्॥ पूरयेद्घृततैलाभ्यांपलैर्विंशतिभिस्ततः॥ सुवर्णमाषकंतस्मि
न्सुतप्तेनिक्षिपेत्ततः॥ अंगुष्ठांगुलियोगेनोद्धरेत्तप्तमाषकं॥ कराग्रंयोनधु
नुमाद्दिस्फोटोवानजायते॥ शुद्धोभवतिधर्मेणनिर्विकारकरांगुलिः॥ अथ

Indira Gandhi National
Centre for the Arts

कालविधिः॥ तत्र बृहस्पतिः॥ आपसं द्वादशापलं घटितं कालमुच्यते। अष्टांगुलं भवेद्
दीर्घं चतुरंगुलविस्तरं। अग्निवर्णं ततश्चोरो जिह्वया लेहयेत्सकृत॥ अदग्धश्चेद्वि
शुद्धिः स्यात् पादस्पर्शादनुमह्यते॥ अथ धर्मविधिः॥ पत्रद्वये लेखनीयौ धर्माधर्मौ सि
तासितौ॥ जीवदानादिभिर्मंत्रैर्गायत्र्याद्यैश्च सामभिः॥ आमंत्र्य पूजयेद्गंधैः कु
सुमैश्च सितासितैः॥ अभ्युक्ष्य पंचगव्येन मृत्पिंडान्तरितौ ततः॥ समौ कृत्वा ततः कुंभे
स्थाप्यौ चानुपलक्षितौ॥ ततः कुंभात्पिंडमेकं प्रगृह्णीताविलंबितः॥ धर्मे गृहीते
शुद्धः स्यात् सं पूज्यश्च परीक्षकैः॥ उक्तं मरणादानात्त्वं निक्षेपाख्यं चाध्य म
हारपदं तदंगतया प्रमाणान्यपि मानुष्याणि दिव्यानि च॥ शुभमस्तु भवतां राम

॥७५॥

॥श्रीः॥ अथेदानीं विभागाख्यं व्यवहारपदमारभ्यते उं विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ज्येष्ठं वा श्रेष्ठ
भागेन सर्वे वा स्युः समांशिनः १ पित्रादिधनस्य पुत्रादीनुद्दिश्य विविच्य भागकरणं विभागः तत्र पितृधनं पि
ता विभजेदित्युत्सर्गः हेतुविशेषे तु पुत्रा अपि विभजंते तदुपरिष्टाद्वक्ष्यते तत्र यदि पिता विभजेत्तदिच्छया
न्यूनाधिकविषयान्सुतानुद्दिश्य धनं विभजेत् अस्मद्धनस्यायमंशस्तवायमंशस्तवेति व्यवस्थापये
दितियावत् एवं यद्येकपुत्रः स्यात्तदा द्वौ भागौ वात्मनः कुर्यात् ननु इच्छयेति न वक्तव्यं विभागः क
र्तृत्वादेव तत्प्राप्तेः नहि चेतनस्य क्रिया सुस्वतंत्रा भवति नस्वतंत्र एव कर्तेत्युच्यते सत्यम् विभागकर्तृ
त्वादेव विभागविषये च्छाप्राप्ता अत एवासा विच्छया विभजेत्सु तानि त्यने न विधीयते किं त्वन्येन तस्मा
च्च कस्यचित्पुत्रस्य न्यूनो धनांशः कस्यचिदधिकः इत्येवं विषमो भागः विषयः तत इच्छया न्यूनाधि
क विभागैः सुतान्विभजेदित्यर्थः यद्यपि विभजेदित्यस्माद्विभाग एव प्रतीयते न वैषम्यविशिष्टः तथा
पि ज्येष्ठस्य विंशोद्धारः सर्वद्रव्याच्च यद्धनम् ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः इत्यादिभिरुद्धा
रशास्त्रैर्यावंत उद्धारप्रकारा विहितास्ते सर्वत्रोपलक्षिता भवंति ततश्च परिशेष्याद्विभागकर्तुरि

Indira Gandhi National
Centre for the Arts

पाविभागवैषम्यमिच्छयाविभक्ते स्वसुतानि समत्वविधीयते इति सिद्धं अत्र नारदः पित्रैव तु विभक्ता ये सम
न्यूनाधिकैर्धनैः तेषां स एव धर्मः स्यात्सर्वस्य हि पिता प्रभुरिति वचनात् न चैतद्दुर्बलवाक्यार्थविषया
मिति वाच्यम् पिता प्रभुरिति वचनात् न ह्युद्धारे पितुः प्रभुत्वं किंतु शास्त्रस्य बृहस्पतिः समन्यूनाधि
का भागाः पित्रा येषां प्रकल्पिताः तथैव ते पालनीया विनेयास्ते स्युरन्यथा अप्यवेच्छया विभजेत्सुतान्
नित्यनेन विभागकर्तृत्वे पितुरिच्छया विभागप्रयोजकत्वं प्राप्तमुच्यते इति वाक्यार्थोऽनर्थकः प्रसं
गपरिहारार्थं पुत्रेच्छया विभागं न प्रयुंक्ते इति परिसंख्यायते इत्याश्रीयते तथा च मनुः ऊर्ध्वं पितुश्च मा
तुश्च समेत्य भ्रातरः समम् भजेरन्पैतृकं रिक्थमनीशास्ते हि जीवते देवलः पितर्युपरते पुत्रा वि
भजेरन् पितुर्धनम् अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते अस्वाम्यमस्वातंत्र्यम् शंखलिखि
तौ पितुरूर्ध्वं रिक्थविभागः न जीवति पितरि पुत्रा रिक्थं विभजेरन् यद्यपि स्यात्स्वयमधिगतं क्षेत्रैर
नर्थ एव पुत्रा अर्थधर्मयोरस्वातंत्र्यम् नारदः विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते दायभाग
इति प्रोक्तं तद्विवादपदं बुधैः अत्र च पित्र्यस्य पुत्रैरिति च प्रदर्शनार्थम् विभागं चेत्पिता कुर्यादिति पि
तुः स्वार्जितविषयम् तत्पित्राद्यार्जितधनविषये तु समेव पितापुत्रयोर्विभागकर्तृत्वम् अत एवाह

॥७४॥

विष्णुः पिता चेत्पुत्रान्विभजेत्तस्य स्वेच्छया स्वयमुपार्जित पित्रार्जितेऽपि धने कदाचित्पुत्रा एव विभागकर्ता
रो भवंति अत एवाह नारदः अत ऊर्ध्वं पितुः पुत्रा विभजेरन्धनं समम् इति पितुरूर्ध्वं विभागकर्तृत्वं पु
त्राणां प्रतिपाद्यम् मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च निवृत्ते चापि मरणे पितर्युपरतस्पृहे
इत्युक्तवान् पुत्राः समधनं विभजेयुरित्यनुषज्यते शंखः अकामे पितरि रिक्थविभागः वृद्धे विप
धिकं शास्त्रेनेन पुत्राणां विभक्तधनानां स एव धर्मो यः पित्रादिकृतः अतोऽसौ नातिक्रमणीयः बृह
स्पतिः समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः तथैव ते पालनीया विनेयारीत चेत सिद्दि
र्घरोगिणि वा नारदः व्याधितः कुपितश्चैव विषयासक्तमानसः अन्यथाशास्त्रकारी च न विभागेऽपि
ता प्रभुः अन्यथाशास्त्रकारी विहितनिषेधातिक्रमकारी पित्रर्जितेऽपि धने पुत्राणां विभागे स्वातंत्र्य
म् पितुरकामत्वादौ निमित्ते भवति मतरि तुल्यमाणायामस्वातंत्र्या एव पुत्राः यदाह शंखः ज्येष्ठ एव
वा पुत्रान्वद्वर्षान्पालयेदितरेषां तु रिक्थमूलमेव कुटुंबमस्वातंत्र्यात्पितृमतो मातर्येव मवस्थितायां मा
तुः कुटुंबभरणासमर्थे संस्येतत् ज्येष्ठस्य यदनुजैः सहाविभक्तधनत्वमुच्यते तत्तेषां मध्ये केषांचिद्ध्ये

Indira Gandhi National
Centre for the Arts

तत्र वेदसतिद्रष्टव्यम् अधीतवेदेष्वधिगतवेदार्थेषु चाग्निहोत्राद्यनुष्ठानसमर्थेषु च विभाग एव श्रेयान्
यदाह मनुः एवं सह वसेयुर्वा पृथग्वा धर्मकाङ्क्षया पृथग्विवर्द्धते धर्मस्तस्माद्धर्म्या पृथक्क्रियाः व्यासः भ्रातृ
णां जीवतोः पित्रोः सहवासो विधीयते तदभावे विभक्तानां धर्मस्तेषां विवर्धते यदा त्वप्रगल्भया ज्येष्ठेन
सहाविभक्तधनाः कनीयांसो भवंति तदा तेषामावश्यकं वैश्वदेवाद्यपि न विभज्यते यदाह बृहस्पतिः
एकपाकेन वसतां पितृदेवद्विजार्चनम् एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे उक्ते पितृकर्तृके विभागे
पुत्राणां विषमोपि विभागो भवतीति तस्य विशेषापवादमाह मनुः भ्रातॄणामविभक्तानां यद्युत्थानं भवेत्स
ह न तत्र भागं विषमं पिता दद्यात्कदाचन किंच यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः नदत्तं स्त्री
धनं यासां भर्त्रा वा श्वसुरेण वा यदि पिता पुत्राणां कृते समं धनविभागं कुर्यात् तदा याभ्यः स्त्रीभ्यः स्त्रीध
नं भर्त्रा श्वसुरेण पित्रा वा न दत्तं ताः स्वपत्न्यः पुत्रसमांशाः कार्याः एकस्य पुत्रस्य यावानंशस्तावदंशामे
कैकां पत्नीं कुर्यादित्यर्थः विभागवैषम्ये कारणं तदमाह अशक्तस्यानीहमानस्य किंचिद्दत्वा पृथक्क्रिया
यः पुत्रो धनार्जनसमर्थतया पितृधनं नेच्छति यो वा धनार्जनसमर्थोपि शठतया न धनस्यार्जनरक्षणा

॥७७॥

नुकूलां चेष्टां न कुरुते तस्मै किंचिदसारमपि स्वकं धनं दत्वापि पृथक्क्रिया कार्या अन्यथा तेन तत्संतत्या वा
विवादः स्यात् पुत्रैः संभूयार्जिते धने एतत् पित्रादिधने तु समांशं लभते एव मनुः भ्रातॄणां यस्तु नेहेत धनं श
क्तः स्वकर्मणा स निर्भाज्यः स्वकादंशात्किंचिद्दत्वोपजीवनम् स्वकादंशात् भ्रातृभिः स्वयमर्जितादित्य
र्थः प्रसंगादन्यदप्युच्यते तत्र नारदः कुटुंबार्थेषु चोद्युक्तस्तत्कार्यं कुरुते च यः स भ्रातृभिर्बृहणीयो ग्रासाच्छा
दानवाहनैः अपपात्रः सर्वे हि धर्मसंयुक्ता भागिनः यस्त्वधर्मेण द्रव्याणि प्रतिपादयति ज्येष्ठोपि तमभा
गं कुर्वीत अधर्मेण द्यूतादिना द्रव्याणि सुवर्णगोवस्त्रादीनि प्रतिपादयति विनाशयति अन्यत्र नयति वा गौत
मः सर्वे वर्णापुत्रोप्यन्यायवृत्तो न लभेतैकेषाम् मनुः सर्व एव विकर्मस्था नार्हंति भ्रातरो धनम् शंखलिखि
तौ अपयात्रितस्य रिक्थं पिंडोदकानि निवर्तंते पतितस्याति भिर्वहिष्कृतोपपात्रितः रिक्थं पित्र्यधनम् पुत्रस्या
नीयस्यात्यतिधनमपि उक्तो विषमभागः स धर्मत्वादनतिक्रमणीय इत्याह न्यूनाधिकविभक्तानां धर्म्यः पि
तृकृतः ~~अतोसौनातिक्र~~ स्मृतः पुत्रैर्वार्जितधनस्य न्यूनाधिकांशदानेन पुत्राणां विभक्तानां स एव धर्म्यो
यः पित्रादिकृतः अतोसौ नातिक्रमणीयः बृहस्पतिः समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः तथैव ते पा

Indira Gandhi National
Centre for the Arts

त्तनीया विनेयास्ते स्युरन्यथा अधुना कर्तृकर्मकालप्रकारैर्विशिष्टं विभागांतरमाह विभजेरन्सुताः पित्रोरू
र्ध्वं रिक्थमृणं समं मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेन्वयः मातापित्रोर्मरणादूर्ध्वं तयोरेव रिक्थमृणं च
पुत्राः समं यावंतो भ्रातरस्तावंतो भागान्प्रत्येकमन्यूनमधिकान्नृणस्य धनस्य च कृत्वा विभजेरन् ततश्च
यो यावंतं धनस्य विभागं भजेत् तावंतमृणस्यापि भजेत् एवं च सति पञ्चतुस्त्रिद्व्येकभागाः स्युरिति तथा येन
चैषां स्वयमुत्पादितं स्यात् तत्सिद्धविषमविभागविधिषु ऋणस्य धनानुसारेण विभागविधिरवसेयः मातु
स्तु धनमृणापकरणोद्धृतेयद्वशिष्टं तत्तस्या दुहितरो विभजेरन् ताभ्य ऋते दुहितॄणामभावे तदन्वयो
दुहित्रोन्वयः दुहितॄणां तदन्वयस्य वा अभावे पुत्रा एव मातृधनं विभजेरन् यदाह कात्यायनः दुहितॄ
णामभावे तु रिक्थं पुत्रेषु तद्भवेत् बंधुदत्तं तु बंधूनामभावे भर्तृगामि तत् भगिन्यो बांधवैः सार्द्धं विभजेरन्सभ
र्तृकः स्त्रीधर्मस्येति धर्मोयं विभागस्तु प्रकल्पित इति मनुः जनन्यां संस्थितायां तु समं सर्वे सहोदराः भजेर
न्मातृकं रिक्थं भगिन्यश्च सनाभय इति अत्र च शब्दो विकल्पार्थः न समुच्चयार्थः विकल्पे च दुहितरः कु
मार्यः पूर्वमधिक्रियंते यदाह मनुरेव मातुस्तु यौतुकं यत्स्यात्कुमारीभाग एव स इति गौतमस्तु प्रजानामपि दु ॥७८॥

अ२

हितॄणामप्रतिष्ठितानां मातृधनमाहित्वमाह स्त्रीधनं दुहितॄणामप्रतिष्ठितानां चेति अप्रतिष्ठिता अनपत्या
निर्धना दुर्भगा वा बृहस्पतिः स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी अप्रत्ता चेत्समूढा तु लभते मानमात्रकं
यौतकं पृथक् धनम् मानमात्रकं स्वल्पमित्यर्थः वसिष्ठः मातुः पारीणह्यं स्त्रियो विभजेरन् पारीणह्यमलंका
रादि अनपत्यस्त्रीधनविषयेप्याह स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं कथंचन ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा
भवेत् पित्र्येत्युपलक्षणम् कन्या सापत्नी ब्राह्मणीति विशेषणोपरोधात् एवं च सति प्रत्तासु प्रतिष्ठितासु दुहितृषु
पुत्राणामपि मातृधनेधिकारो भवति अस्मिन्नेव विषये विशेषांतरमाह मनुः यास्तासां स्युर्दुहितरस्तासाम
पि यथार्हतः मातामह्या धनं किंचित्प्रदेयं प्रीतिपूर्वकम् विभजेरन्सुताः पित्रोरूर्ध्वमित्यस्यायमर्थः यदि पित्रो
र्मरणादूर्ध्वं विभजेरन् तदा रिक्थादि समं विभजेरन्निति एतद्भ्रातृकर्तृकविभागपरम् तेन जीवत्यपि पितरि
भ्रातरः सममेव विभजेरन् पितुस्तु विभजमानस्य नायं नियम इत्यर्थोऽवगम्यते न च पित्रोरूर्ध्वं विभजेरन्नेवेति
व्याख्येयम् यदाह मनुः एवं सह वसेयुर्वा पृथग्वा धर्मकांक्षया पृथग्विवर्द्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया यत्तु
नैवोक्तम् ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः शेषास्तमुपजीवेयुर्यथैव पितरं तथेति तदसमाप्तवेद

Indira Gandhi National
Centre for the Arts

ध्ययनेषु कनिष्ठेषु उन्मत्तादिना निरंशेषु अप्राप्तव्यवहारेषु वा वेदितव्यम् अत्र कात्यायनः संप्राप्तव्यवहा
राणां विभागस्तु विधीयते पुंसां च षोडशे वर्षे जायते व्यवहारिता अप्राप्तव्यवहारं च प्रदर्शनार्थम् अगृहीत
वेदत्वमपि ह्यविभागे कारणम् यदाह हारीतः यद्यसमाप्तवेदाः कनीयांसस्तदा सह वसेयुरिति नारदः विभज्या
द्रव्यतः सर्वो ज्येष्ठो भ्राता यथा पिता भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुलस्थितिः नारदः पैतृकऋणापाक
स्यैव रिक्थं विभजनीयमिति स एवाह यच्छिष्टं पितृदायेभ्यो दत्वर्णं पैतृकं च यत् भ्रातृभिस्तद्विभक्तव्यमृ
णी स्यादन्यथा पिता पितृदायानि नवश्राद्धानि तथा च गौतमः नवश्राद्धं सह दद्युः कात्यायनः भ्राता पितृ
व्यमातृभ्यां कुटुंबार्थं ऋणं कृतम् विभागकाले देयं तद्रिक्थिभिः सर्वमेव तु तदृणं धनिने देयं नान्यथैव प्रदाप
येत् भावितं चेत्प्रमाणेन विरोधात्परतो यदा विरोधाद्विवादस्त्परतऊर्द्धम् तथापि त्रापि पितृणां संभुक्तमात्मीयं
चात्मना कृतं ऋणमेवंविधं शोध्यं विभागे बंधुभिः सह धर्मार्थं प्रीतिदत्तं च यदृणं स्वनियोजितम् तदृश्य
मानं विभजेल्लब्धं नं पैतृकाद्धनात् धर्मार्थं यत्तत्कल्पितं यच्च प्रीतेन वा दत्तं तदा स्वस्मिन्पुत्रे त्वयैतदपाकर
णीयम् ऋणमिति पित्रा नियोजितं तद्दृश्यमानमुपलभ्यमानं विभजेत् न तु पैतृकाद्धनात्तदपाकृत्य धन ॥७८॥

४

विभागः कार्य इति दृश्यमानं विभाज्यं तु गृहक्षेत्रं चतुष्पदम् गूढद्रव्याभियुक्तं कार्यं प्रत्ययस्तत्र कीर्त्तितः
गृहोपस्करणार्थं मनुः अजाविकं सैकशफं न जातु विषमं भजेत् अजाविकं तु विषमं ज्येष्ठस्यैव विधीय
ते विषमं भ्रातृसंख्यापेक्षया अन्यसंख्यामविभज्यमाह पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम् मै
त्रमौद्वाहिकं चैव दायादानां न तद्भवेत् अविभक्तधनानां मध्ये येन पितृधनस्याविरोधेनानुपघातेनानु
जीवेन स्वयमेकाकिनैव यदन्यदधिकमर्जितं धनं यच्च मैत्रं मित्राद्वाप्तं यच्चौद्वाहिकमुद्वाहे श्वसु
रादिभ्यो लब्धं न तद्विभजनीयम् किंतु प्रार्जकस्यैव तद्धनमित्यर्थः मनुः अनुपघ्नन्पितृद्रव्यं श्रमेणाय
दुपार्जयेत् स्वयमीहितलब्धं तन्नाकामो दातुमर्हति श्रमो युद्धकृष्यादिः ईहा श्रमरहिता चेष्टा का
त्यायनः यल्लब्धं सामकाले तु स जात्या कन्यया सह कन्यागतं तु तद्वित्तं शुद्धं वृद्धिकरं स्मृतम् वैवाहिकं
तु तद्विद्याद्भार्यया यत्सहागतम् धनमेवंविधं सर्वं विज्ञेयं धर्मसाधकम् किंच क्रमादभ्यागतं द्रव्यं हृत
२ मभ्युद्धरेत्तु यः दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च यत्पूर्वपुरुषक्रमायातं क्षेत्रारामादिकं द्रव्यं कथ
मपि परेणापहृतं यो दायादानुमत्याभ्युद्धरेत्तत्सौ दायादेभ्यो न दद्यात् यत्तु न दायादानुमतिमन्तरेणोद्धृतं

Indira Gandhi National
Centre for the Arts

तस्य चतुर्थमंशमुद्धृत्य गृह्णीयात् शेषमुद्धारकेण सह सर्वे विभजेरन् यदाह कृष्णभङ्गः पूर्वं नष्टां तु यो भूमि
मेकश्चेदुद्धरेत्क्रमात् यथांशं तु लभन्तेन्ये दत्त्वांशं तु तुरीयकम् यच्च विद्ययोनिमित्तानुभूतया लब्धं त
दपि दायादेभ्यो न दद्यात् मनुः विद्याधनं तु यद्यस्य तत्तस्यैव धनं भवेत् मैत्रमौद्वाहिकं चैव माधुपर्किकमेव
च कात्यायनः परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते भक्तमनु
ज्ञानतः पितुरन्यतद्वित्यर्थः उपन्यस्ते न लब्धं यद्विद्यया पणपूर्वकं विद्याधनं तु तद्विद्याद्विभागे न नियुज्य
ते शिष्यादार्त्विज्यतः प्रश्नात्संदिग्धप्रश्ननिर्णयात् स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् वि
द्याधनं तु तत्प्राहुर्विभागे न विभज्यते शिल्पेष्वपि हि धर्मोयं मूल्याद्यच्चाधिकं भवेत् विद्यायणकृतावेवया
ज्यतः शिष्यतस्तथा एतद्विद्याधनं प्राहुः सामान्यं यदतोन्यथा परं निरस्य यल्लब्धं विज्ञानाद्यूतपूर्वकं वि
द्यादानं तु तद्विद्यान्न विभाज्यं बृहस्पतिः विज्ञानप्रतिरूपात्लब्धं शिष्यादानं च यद्भवेत् ऋत्विङ्न्यायेन यल्ल
ब्धमेतद्विद्याधनं भृगुः आरुह्य संशयं यत्र प्रसह्य कर्म कुर्वते तस्मिन्कर्मणि तुष्टेन प्रसादः स्वामिना कृतः
तत्र लब्धं तु यत्किंचिद्धनं शौर्येण तद्भवेत् व्यासः विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् विभागकाले त

॥८०॥

त्सर्वं नान्वेष्टव्यं स्वरीक्थिभिः कात्यायनः ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तद्भवेत् संग्रामादाहृतं यत्तु वि
द्राव्य द्विषतां बलं स्वाम्यर्थे जीवितं त्यक्त्वा तद्ध्वजाहृतमुच्यते मैत्रादीनां धनानां पितृद्रव्यानुपयोगेना
र्जितानां विभागः तदुपयोगार्जितविषये तु व्यास आह साधारणं समाश्रित्य यत्किंचिद्वाहनायुधम्॥
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः तस्माद्भागद्वयं देयं शेषाः स्युः समभागिनः कात्यायनः अविद्या
नां तु वैद्येन देयं विद्याधनं क्वचित् समविद्याधिकानां तु देयं वैद्येन तद्धनम् नारदः वैद्यो विद्याय नाकामो
दद्यादंशं स्वतो धनात् पित्र्यं द्रव्यं समाश्रित्य न चेत्तेन तदाहृतम् कुटुंबं विभृयाद्भ्रातुर्यो विद्यामधिग
च्छतः भागं विद्याधनात्तस्मात्स लभेताश्रुतोपि सन् यत्किंचित्पितरि प्रेते धनं ज्येष्ठोधिगच्छति भागोय
वीयसां तत्र यदि विद्यानुपालिनः यदि विद्यानुपालिनो विद्याभ्यासवतः कानीयांसः अपरमप्यविभ
ज्यमाह मनुः वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः योगक्षेमं प्रचारं च विभाज्यं न प्रचक्षते अत्र पित्र
प्राच्छन्नेन यानमुच्यते इति केषांचिद्व्याख्यानं तत्कात्यायनवचनविरुद्धम् तथाहि धनं यत्र निविष्टं तु धर्मा
र्थं च निरूपितम् उदकं चैव दासाश्च निर्वंधो यः क्रमागतः धनं वस्त्रमलंकारो वानुरूपं तु यद्भवेत् यथाकालो

Indira Gandhi National
Centre for the Arts

पयोग्यानि तथायोग्यानि बंधुभिः गोप्रचारश्चरक्ता च वस्त्रं यच्चांगयोजितं प्रयोज्यं न विभज्येत धर्मा
र्थं बृहस्पतिः ननु रूपं विभागानुरूपं विभाक्तभिः सह विषमसंख्याकीम् तद्यथा कालविभक्तसंख्यानुरू
प्येणाकालोपयुक्तकार्यम् यच्च वस्त्रादीनामविभाज्यत्वमुक्तम् तत्स्वरूपतो मूल्य-विभजनीयमेव य
दाह बृहस्पतिः वस्त्रादीयो विभज्यायैरुक्तं तैर्न विचारितम् धनं भवेत्समृद्धानां वस्त्रालंकारसंश्रि
तम् मध्यास्थितमनाजीव्यं दातुं नैवास्य शक्यते युक्त्या विभजनीयं तदन्यथानर्थकं भवेत् विक्रीय वस्त्रा
भरणं धनमुद्धारलेखितम् कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यते उद्धृतकूपवाप्यस्तु त्वनुसारेण
गृह्यते यथा भागानुसारेण क्षेत्रं तु क्षेत्रे विभज्यते एकां स्त्रीं कारयेत्कर्मा यथांशेन गृहे गृहे वस्त्वः समां
शतो देयास्तन्नामव्यर्थं विधिः योगक्षेमवतो लाभः समत्वेन विभज्यते प्रचारश्च यथांशेन कर्तव्यो रि
क्थिभिः सदा एकां स्त्रीमिति अनुपभुक्तदासीविषयम् उपभुक्तायां तु गौतम आह उदकक्षेमकृता
न्नेष विभागः स्त्रीषु चासंभुक्तास्विति योगक्षेमवतो लाभ इति योगक्षेमवाश्शजादिरीश्वरो यः पित्रा
दिभिः स्वकुटुंबनिर्वाहकत्वेनोपार्जितः ततो यो लाभो लब्धं धनं तत्समं विभाज्यमित्यर्थः प्रचीरः प्र ॥८९॥

घ्रानिर्गमभूः शंखलिखितौ न चास्ति विभागो ओदकपात्रालंकारसंयुक्तस्त्रीवाससामुपचाराच्च निंक्रियागश्चे
तिप्रजापतिः सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः अनेकपितृणां तु पितृतो भागकल्पना अप्रयतं
सुत्थानमर्थोर्जने सति समो विभागः कार्यः एतस्मिन् विषये पितापि सममेव विभजेत् दाह मनुः भ्रातृणामवि
भक्तानां यद्युत्थानं भवेत्सह न तत्र भागं विषमं पिता दद्यात्कथंचन एवं च सति विषयांतरे पितृकर्तृको वि
भागो विषमोऽपि स्यादिति गम्यते अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत् समास्तत्र विभागः स्यादपित्र्य इ
तिधारणानवो हारणे वृद्धमेत द्वैषम्यम् अविद्यानामिति विशेषणात् अविभक्तधना ये भ्रातरः परेतास्ते
षां कस्यचिदेकः कस्यचिद्द्वौ कस्यचिद्बहवः पुत्राः स्युः तत्र तेषां पितृधने भागकल्पना पितुर्यावा
वान् भागस्तावंतमेव द्वौ वा बहवो वा गृह्णीयुः न तेषां न समो विभाग इत्यर्थः बृहस्पतिः समवेतैस्तु यत्
प्राप्तं सर्वे तत्र समांशिनः तत्सुता विषमसमाः पितृभागहाराः स्मृताः कात्यायनः अविभक्तेनुजेप्रेते तत्सु
तं रिक्थभागिनम् कुर्वीत जीवनं ये न लब्धं वै पितामहात् लभेतांशं हि पित्र्यं तु पितृव्यात्तस्य वा सुतात् स ए
वांशस्तु सर्वेषां भ्रातृणां न्यायतो भवेत् लभेतांतत्सुतो वापि निवृत्तिः परतो भवेत् अविभक्तधने भ्रातरि

Indira Gandhi National
Centre for the Arts

...तसुत्रः पितामहाद्विभागः पितृव्यात्तत्पुत्राद्वा निजपितृभागं लभेयात्। एवं च तत्पुत्राः तत्पौत्रास्तु नल
भंते सर्वे। अयं देवलोक्तो विशेषः अविभक्तविभक्तानां कुल्यानां वसतां सह भूयो दायविभागः स्यादाचतु
र्थादिति स्थितिः तावत्कुल्याः सपिंडास्तु पिंडभेदस्ततः परम् समम् इच्छंति पिंडानां दायार्थस्य विभाजनम् वि
धिरेष सवर्णानां बहूनां समुदाहृतः एक एव सवर्णः स्याद्दायो न न विभज्यते विष्णुः अत्र भ्रातॄणां दायविभा
गः याश्चानपत्याः स्त्रियः स्युस्तासां चापुत्रलाभाद्विभागः भ्रातॄणां स्त्रियो भार्या अनुत्पन्नापत्यास्तासां गृहीतभा
गाम् न तु भर्तृकालात् तासां पिंडदायो देयः आपुत्रलाभात् पुत्रानुत्पत्तौ तु भागोध्यावर्तते अपुत्रलाभादिति वच
नात् यदुक्तम् विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतानिति तस्यापवादमाह भूयोपि तामहोपात्ता निबंधो
द्रव्यमेव वा तत्रस्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः पितामहधनेपौत्रस्य स्वपित्रा तुल्यं स्वाम्यं तेन विभा
गमनिच्छन्नपि पिता स्वपितृधनं पुत्रविभागेच्छया विभजेत् समश्च विभागः न स्वार्जितधनवदिच्छया मः का
र्यः निबंधो नाम अस्मिन् भागे प्रतिक्षेत्रं प्रतिगृहं चैतावद्धनममुष्मै देयमिति कात्यायनः पैतामहं समानं स्यात्
पितुः पुत्रस्य चोभयोः स्वयं तूपार्जिते पित्रा न पुत्रः स्वाम्यमर्हति एतत्पितामहधनानुपजीविते न पितर्युपार्जि

॥८२॥

ते द्रष्टव्यम् व्यासः क्रमागते गृहक्षेत्रे पितृपुत्राः समांशिनः पैतृके न विभागार्हाः पुत्राः पितुरनिच्छतः बृहस्पतिः
द्रव्ये पात्ते स्थावरे जंगमे पि वा समम् अंशित्वम् आख्यातं पितुः पुत्रस्य चैव हि पैतामहं दत्तपित्रा स्वशक्त्या यदुपा
र्जितम् विद्याशौर्यादिना वा तत्तत्र स्वाम्यं पितुः स्मृतं यत्पैतामहं धनं परैरपहृतं तत्पित्रा पुनस्तत्स्वसामर्थ्येनो
पार्जितं विद्यादिना च तेनैव यद्रव्यार्जितं तत्र पितुरेव स्वाम्यं न पुत्राणाम् अत एवाह प्रधानं स्वेच्छया कुर्याद्भोगं चै
व ततो धनात् तदभावे तु तनयाः समांशाः परिकीर्तिताः कात्यायनः स्वशक्त्या यदुत्तं नष्टं स्वयमाप्य च यद्भवे
त् एतत्सर्वं पिता पुत्रैर्विभागे नैव दाप्यते यदपहृतं नष्टं च पिता स्वशक्त्यार्जयेत् तद्विभागकालेपि पिता पुत्रैर्न दा
प्यत इत्यर्थः एवं ता वत्पितामहे धने पौत्रस्य स्वपित्रा सह सदृशं स्वाम्यं स्मृतयो वदंति न चैतावता अग्नीनादधा
ते त्यादि श्रुतिर्विरुध्यते येन तद्विरोधपरिहाराय सति पुत्रे पिता स्वपुत्रधनं न सर्वं दद्यात् भुंजीत वा किंतु
पुत्रार्थम् अवशेषयेदित्योपचारिकार्थपरतया व्याख्येयेरन् यद्यपि एतद्धनं स्वस्य पुत्रस्य च साधारणं तथा
च पुत्रानुमत्या पुत्रविभागकरणे न द्रव्यांतरार्जनेन वा शक्य तए वाग्निहोत्रादि कर्तुम् न च स विभागस्वाम्यो
त्पत्तिर्येन प्राग्विभागात्पिता न स्वामी स्यात् स विभागो हि साधारणधनानां स्वामिनाम् एकैकभोगे स्वामिनए

कैकस्य स्वाम्यं व्यवस्थापयति नापूर्वमुत्पादयति यथा लोके संभूयसमुत्थायिनां वेदे च सत्रिणां स्वाम्युत्थाने च
यदि विभागः स्वामित्वे हेतुस्तदा हठादिना क्रियमाणोपि तज्जनयेत् यदा वियोगो तमेनोक्तम् स्वामी रिक्थ
क्रियार्थं विभागपरिग्रह इति गमे स्थितिसंविभागे स्वयमवस्थितस्य स्वामिभावजनकत्वपरम् विभक्तेषु सुतो
जातः सवर्णायां विभागभाक् दृश्यवाताद्विभागः स्यादायव्ययविशोधितात् विभक्तधनेषु पुत्रेषु यः सवर्ण
यां पुत्रो जातः स पितृविभागं लभते पितृविभागाभावे तु यदि विभक्तेभ्यो भ्रात्रादिकं ते विभागे पश्चाद्दृश्यते त
दुत्पन्नात् विशोधितायव्ययाद्विभागः कार्यः मनुः ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हि तत् धनं संसृष्टास्तेन हरे
वा ये स्युर्विभजेत स तैः सह विभक्तेषु जातः पित्र्यं धनमेव हरेत् न भ्रातृधनम् पितुर्भ्रातृणां चापित्र्यास
ह विभक्ता ये सापत्ना वा सहोदराः जघन्यास्ते वयेतेषां पितृभागस्तु हरास्तु ते अत्र यदि पूर्वं विभक्ता ना
महानुभागः जघन्यानां तु पितृभागमेव विभज्य गृह्णताम् अस्य तथापि पूर्वविभक्तैः भ्रातृभागान्तैर्भाह्य
मिति एवाह अनीशः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम् विभ
क्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः यदा तु न विभक्तजः कुतश्चित्पूर्वोक्तेन प्रकारेणासमपि विभागेल

॥८३॥

भते तदा भ्रातृभागं गृह्णीयादित्यर्थः विष्णुः पितृविभक्तविभागानन्तरोत्पन्नस्य विभागं दद्युः प्रकारान्तरेण
विभज्य विशेषमाह पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् प्रागूर्ध्वं वा विभागान्मात्रा पित्रा वा यस्मै पुत्राय
यत्स्नेहतो वित्तं दत्तं तत्तस्यैव न पुत्रान्तरैर्विभाज्यमित्यर्थः नारदः शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः मात्रा च स्वधनं दत्तं यस्मै स्यात्प्रीतिपूर्वकम् तस्याप्येष विधि
र्दृष्टो माता पित्रोर्यथा पिता व्यासः पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकम् तस्य तन्नापहर्तव्यं मात्रा दत्तं च यद्भ
वेत् स्थावरे पर्युदासमाह नारदः मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः स्थावरस्य तु सर्वस्य न पिता न पि
तामहः। पितृप्रसादाद्भुज्यन्ते वस्त्राण्याभरणानि च स्थावरं तु न भुज्येत प्रसादे पैतृके सति किंतु पितुरूर्ध्वं
पितुर्विभजतां माताप्यंशं समं हरेत् पितुर्मरणादूर्ध्वं विभजतां पुत्राणां विभागे स्वविभागे माताऽपि लभेत्
बहुवचनमविवक्षितम् तेनैकस्य सुतस्याप्यनुभागसत्तावाने वमातुर्भवतीत्यर्थः मातृग्रहणं तत्सपत्न्यादि
प्रदर्शनम् व्यासः असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः
अदत्तस्त्रीधनमेतत् पुत्राणां विभजतां कार्यमितरमाह असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भ

Indira Gandhi National
Centre for the Arts

ग्निन्यश्च निजान्नंशाद्दत्वांशंतुतुरीयकम् येकनीयांसो भ्रातरः पित्राजातकर्मादिभिर्भ्रातृभिः पूर्वसंस्कृतै
र्भगिन्यश्च निजेना नसंस्कृतास्तेज्येष्ठैः संस्कृतैः संस्कार्याः भगिन्यश्चाकृतविवाहसंस्कारएकस्यपुत्रस्य
यावान्तिजोंशस्तमस्माच्चतुर्थमंशंप्रत्येकंप्रदायसंस्कर्याविवाहितव्याः नारदः येषांचनकृताःपित्रासं
स्कारविधयःक्रमात्कर्तव्याभ्रातृभिस्तेषांपैतृकादेवतद्धनात् अविद्यमानेपित्र्येंशेस्वांशादुद्धृत्य
वापुनः अवश्यकार्याः संस्कारा भ्रातृणांपूर्वसंस्कृतैः व्यासः असंस्कृतास्तुयेतत्रपैतृकादेवतेधना
त् संस्कार्याभ्रातृभिर्ज्येष्ठैः कन्यकाश्चयथाविधिः मनुः स्वेभ्योंशेभ्यस्तुकन्याभ्यःप्रदद्युर्भ्रातरःपृथ
क् स्वात्स्वादंशाच्चतुर्भागंपतितास्युरदित्सवः अत्रापिस्वेभ्योंशेभ्यइतिपदद्वयंपुत्रांशस्यात्रविवक्षेया
बहुवचनंकन्याबहुत्वाभिप्रायम् स्वात्स्वादितिवीप्सानेकजातीयकन्याभिप्राया एतदुक्तंभवति यस्य
ब्राह्मणस्यसवर्णानासवर्णाभार्याभवति तासांप्रत्येकंकन्यकाःसंति तत्र ब्राह्मणीयाकन्याका
साब्राह्मणस्यपुत्रस्ययावानंशोभवति तस्यचतुर्थांशंलभते एवंचब्राह्मणस्यैवपितुःक्षत्रियादिकन्यकाःक्षत्रि
यादिसुतांशाच्चतुर्थभागमाहरयन्तीतिनान्वयंदायः ततश्चार्हतिस्त्रीस्वनुक्तेीयदुक्तंबौधायनेन नदा

॥८४॥

दायंविरिंद्रियाणांनाहंतादायाःस्त्रियोमताइतिश्रुतिरिति तेनसहास्याविरोधः असवर्णानांदायभागमाह च
तुस्त्रिद्व्येकभागाविद्वोतुद्व्येकभागिनो ब्राह्मणस्यब्राह्मण्यादिशूद्रांतासुचतसृषुभार्यासूत्पन्नानांपुत्राणांमध्ये
पितृधनस्यदशधाविभक्तस्यचतुरोभागान्ब्राह्मण्याःपुत्राःगृह्णीयुः त्रीन्क्षत्रियायाः द्वौवैश्यायाः एकंशूद्रायाः
वैश्यस्यपितुर्धनंत्रेधाविभाज्यं तत्र द्वौभागौवैश्यायाःपुत्राणाम् एकःशूद्रायाः शूद्रस्यनासवर्णास्तिभार्या अ
त्रविशेषमाह बृहस्पतिः नप्रतिग्रहभूर्देयाक्षत्रियादिसुतायवै यद्यप्येषांपितादद्यान्मृतेविप्रासुतोहरेत् प्र
तिग्रहणदुपायांतरप्राप्तानदीयेवसापिनशूद्रापुत्रायतथाचस्मृत्यंतरम् शूद्रोद्विजातिभिर्जातोनभूमेर्भा
गमर्हति यत्तुस्मरंति ब्राह्मणक्षत्रियविशांशूद्रापुत्रानीरक्थभाक् यदेवास्यपितादद्यात्तदेवास्यधनंभवेदि
ति तत्पितृप्रसादलब्धेधनेसतिविभागंप्रतिनिषेधति अन्यथाशूद्रापुत्रंप्रतिविभागोविधिरनर्थकः स्यात्वि
भजनीयेधनेभ्रातृणांपहेतेदृष्टेयत्कार्यंतदाह अन्योन्यापहृतंद्रव्यंविभक्तैर्यद्दृश्यते तत्पुनस्तेसमैरंशैर्विभ
जेरन्नितिस्थितिः विभजनीयंधनंकेनचिद्भ्रात्रापहृतंसद्विभागादूर्ध्वंयद्युपलभ्यते तदातत्सर्वैःसमैरंशैर्वि
भजनीयम् नतूद्धारपद्धमाविषमैः एतावत्यर्थप्रमितेवचनमिदंमुपपन्नमिति नापहर्तुर्दोषाभावंप्रतिप्रमाणंता

Indira Gandhi National
Centre for the Arts

पति अथोच्यते विभक्ता ये ब्राह्मणा विभजनीयं सुवर्णं ततश्च ब्राह्मणसुवर्णापहारे पहर्त्तुः पातित्ये सति तस्य
न स्तेसमेरं श्रौरितिवचनमनुपपन्नं स्यात् पतितस्यानंशत्वादिति तत्रद्रव्यांतरविषयत्वेन वचनोपपत्तेः न च
सामान्यवचनविषयत्वे वचनस्य विशेषोपसंहारो विरुध्येत भवतु नाम ब्राह्मणसुवर्णविषयमप्येतद्वाक्यम्
तथापि नापहर्तुर्दोषाभावं गमयति प्रायश्चित्ते नव्यवहार्यस्य सतः समांशविभागविधानोपपत्तेः अथवापि
हर्त्तुर्व्यतिरेक्त दोषाभवविषयम् तस्य तु नस्तेशमेरं श्रौरित्येतद्वचनं न च वाच्यं प्राग्विभागात्तन्नकस्यापीति यतउ
क्तं स्वमेव साधारणं तद्विभज्यते न विभागात्स्वत्वमुत्पद्यते इति कात्यायनः प्रच्छादितं च यद्येनं पुनरागत्य
तत्समं भजेरन् भ्रातृभिः सार्द्धमभावे हि पितुः सुताः तथा अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत् प
श्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः विभक्तस्यैव यत्प्राप्तं धनस्यैव तद्भवेत् दत्तं नष्टं च यल्लब्धं
प्रागुक्तं च पुनर्भजेत् प्रागुक्तं दुर्विभक्तमयदुक्तं वा औरसपुत्रविषयो धन[illegible]विभाग उक्तः क्षेत्रजविशेषविष
यमिदानीमाह अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसौ रिक्थी पिंडदाता च धर्मतः प्रथमेऽध्या
ये प्रतिपादिता नियोगोत्पादितः सुतः गुर्वनुज्ञात इत्यत्र तेन नियोगविधिना योऽपुत्रेण देवरादिना परस्या



पुत्रस्य क्षेत्रे भार्यायामुत्पादितः स्वार्थं परार्थं च द्व्यामुष्यायणः संज्ञकः स उभयोर्बीजक्षेत्रिकयोर्द्रव्य
हरः पिंडदश्च शास्त्रतो वेदितव्यः यत्तु नारदेनोक्तम् द्व्यामुष्यायणको दद्यात् द्वाभ्यां पिंडोदके पृथ
क् रिक्थादर्धांशमादद्याद्बीजिक्षेत्रिकयोस्तयोरिति तत् क्षेत्रजे जाते पश्चादौरसोत्पत्तौ सत्यां वेदित
व्यम् कात्यायनः उत्पन्ने चौरसे पुत्रे चतुर्थांशहराः सुताः सवर्णा असवर्णास्तु ग्रासाच्छादनोनोजनाः
ततश्चौरसे नुत्पन्ने क्षेत्रजः उभयोः पित्रोः सकलमेव रिक्थं गृह्णाति उत्पन्ने च चतुर्थांशं पितृधनेष्विति
स्थितिः यत्तु मनुनोक्तम् षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् औरसो विभजन् दायं पित्र्यं पंच
ममेव वा तत्र षष्ठपंचमांशदानमसगुण क्षेत्रजविषयम् तथा औरसे[illegible] क्षेत्रजौ पुत्रौ पितृरिक्थ
स्य भागिनौ दशापरे तु क्रमशो गोत्ररिक्थांशभागिनः तदौरसस्य निर्गुणत्वे क्षेत्रजस्य च सगुणत्वे वे
दितव्यम् समविभागाभिधानात् औरसक्षेत्रजपुत्रिकापुत्रव्यतिरिक्तेषु दशसु पुत्रेषु जातेषु औरसो
त्पत्तिर्यथा स्यात् तदौरसस्यैव सकलं रिक्थम् इतरेषां तु तदंशहरत्वमेव गोत्रं तु तेषामौरसस्य च
समानम् नारदः क्षेत्रकानुमते बीजं दास्य क्षेत्रे प्रसिध्यति तदपत्यं द्वयोरेव क्षेत्रिबीजिकयोर्मतम्

Indira Gandhi National
Centre for the Arts

हारीतः जीवति क्षेत्रिणि बीजमाहुरस्वातंत्र्यान्न तेषामामुष्यायणम् अनुप्तबीजत्वात् नाबीजं क्षेत्रं फलति नाक्षे
त्रे बीजं रोहति उभयदर्शनादुभयोरपत्यम् अनुप्तबीजत्वादिति क्षेत्रिकानुप्तबीजत्वादित्यर्थः मुख्यानां
पुत्राणां दायभागमाधाय गौणानामभिधास्यं तेषां लक्षणानि मुख्यलक्षणपुरःसरमाह औरसो धर्मप
त्नीजस्तत्समः पुत्रिकासुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः
स्मृतः कानीनः कन्यकाजातो मातामहसुतो मतः अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः दद्यान्माता पि
ता यं स पुत्रो दत्तकः स्मृतः क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः स
होढजः उत्सृष्टो गृह्यते यस्तु सोपविद्धः सुतो भवेत् यो धर्मपत्नीजः स औरसो ज्ञेयः यया सह धर्मश्चर्य
ते सा धर्मपत्नी यद्यपि पत्नीशब्देनैव सहधर्मचारिणी कथ्यते तथापि धर्मशब्दोपादानात्पत्नीशब्दो भा
र्यामात्रपरः धर्मपत्नीशब्देन च शूद्रा व्यावर्त्यते तस्याः सहधर्मचारित्वाभावात् यदाह वशिष्ठः कृष्णव
र्णा या रामा रमणायैव न धर्मायेति एवं च तत्सुतो नौरसः अत एव पुत्रप्रतिनिधिषु न तमाह मनुः
पुत्रान्द्वादश यानाह नृणां स्वायंभुवो मनुः तेषां षड्बंधुदायादाः षडदायादबांधवाः औरसः क्षेत्रजश्चैव



दत्तः कृत्रिम एव च गूढोत्पन्नोपविद्धश्च दायादा बांधवाश्च षट् कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा स्वयं
दत्तश्च शौद्रश्च षडदायादबांधवाः क्षेत्रजादिसुतानेतानेकादश यथोदितान् पुत्रप्रतिनिधीनाहुः क्रिया
कार्ये ३ लोपान्मनीषिणः औरसाभावे तं क्रियालोपाद्बिभ्यतो मनीषिणः क्षेत्रजादीनेकादश पुत्रप्रतिनिधीनाहु
रित्यर्थः यद्यपि शौद्रेयः प्रतिनिधिस्तथाप्यौरसेषु सत्स्वपि तस्य दायभागोऽस्तीति पूर्वमेव तद्विभाग उक्तम्
अत एव योगीश्वरः प्रतिनिधिषु तं नोक्तवान् न च वक्तव्यम् कथं तर्हि दायादः शूद्रापुत्र इति पित्रा प्रसाददत्ते
स्य धने सति दायविभागरहितत्वमुक्तं मनुनैव ब्राह्मणक्षत्रियविशां शूद्रापुत्रा न रिक्थभागिनः अथ चापि पि
त्रा धनस्य दशमादंशादधिकं दायं न लभन्ते इत्येवंपरं तस्य दायादत्ववचनम् तदुक्तं मनुनैव यद्यपि स्या
त्तु सत्पुत्रोऽपि वा भवेत् नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मत इति अधिकं तु दशमांशादानपत्यस्य ध
नमपिंडनामेवेत्याह बृहस्पतिः अनपत्यस्य शुश्रूषुर्गुणवाञ्छूद्रयोनिजः लभेताजीवनं शेषं सपिंडा
समवाप्नुयुः प्रकृतमुच्यते यथाशास्त्रं परिणीतायां द्विजातिस्त्रियामुत्पन्न औरसः पुत्रः अन्वर्थसंज्ञा चै
षा तेन उरसि भव औरसः तेन सिद्धमितरेषामौरसस्य लक्षणम् अत एवाह वशिष्ठः स्वयमुत्पादितः स्वक्षे

Indira Gandhi National Centre for the Arts

त्रसंभूतां प्रथमः प्रथमो मुख्यः तेन स एव पुत्रशब्दस्य मुख्योऽर्थः क्षेत्रजादिस्तु गौणाः ततः परिपूर्णमिदमौर
सस्य लक्षणम् औरसो धर्मपत्नीज इति पदद्वयेनोक्तः तत्समस्तेनौरसेन समस्तुल्यः पुत्रिकापुत्रः पुत्रिके
पुत्रः पुत्रिकापुत्रः स हि पुत्त्वातिरिक्तौरसलक्षणायुक्तत्वाद्भवत्यौरससमः अत एव बृहस्पतिः पु
त्रास्त्रयोदश प्रोक्ताः मनुना येन पूर्वकाः संतानकारणं तेषामौरसः पुत्रिका तथा आज्यं विना तथा तै
लं सद्भिः प्रतिनिधी स्मृतम् तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना पुत्रिकायाः पुत्रोऽपि पुत्रिकाशब्दे
नोच्यते अत एव वशिष्ठः अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् अस्यां यो जायते पुत्रः स मे
पुत्रो भविष्यति गौतमः पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वा अस्मदर्थमपत्यमिति संवा
द्याभिसंधिमात्रात्पुत्रिकेत्येषाम् तत्संशयान्नोपयच्छेदभ्रातृकाम् जाबालः पुत्रिकायाः प्रदाने तु स्थाली
पाकेन धर्मवित् अग्निं प्रजापतिं चेष्ट्वा पुत्रदाने तथैव च यस्य क्षेत्रे कलत्रे क्षेत्रस्वामिना समानगोत्रेणो
तरेण वा संबंधिनोत्पादितः क्षेत्रजसंज्ञकः पुत्रः स्वामिनो भवति यस्य गृहे भार्यायां प्रछन्नो ज्ञायमान
जनकविशेष उत्पन्नः स तज्जननीस्वामिनो गूढोत्पन्नो नाम भवति पुत्रः अयं च स्वभार्यायामन्योत्पादित

॥८७॥

त्वेन क्षेत्रजतुल्य इति तदनंतरमुक्तः यस्तु कन्यायामनूढायां जातः स कानीनसंज्ञको मातामहपुत्रोऽभि
न्वादिसंमतः अयमपि कथंचित्स्वसंबंधिनि दुहितृरूपे क्षेत्रे जात इति गूढोत्पन्नसादृश्यात्तदनंतर
मुक्तः वशिष्ठः अप्रत्ता दुहिता यस्य पुत्रं विंदेत तुल्यतः पुत्री मातामहस्तेन दद्यात्पिंडं हरेद्धनम् या वाग्दत्ता
न भवति सा त्वप्रत्तेति विशेषणस्य दानादूर्ध्वं प्राग्विवाहदुत्पन्नः कानीनो वोढुरेव भवति तदभि
प्रायेण हि मनुः पितृवेश्मनि कन्यां तु यं पुत्रं जनयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमि
ति अक्षतायां क्लीबादिना यो यां विधवायामविधवायां वा स्वभार्यायां तु क्षतायां परैरुपभुक्ता
यां पुनः परिग्रहसंस्कृतायां यो जातः स पौनर्भवसंज्ञकः पुनर्भूप्रथमेऽध्याये कथिता एते च स्वसं
बंधिक्षेत्रोत्पन्नत्वात्सन्निकृष्टत्वात्पूर्वमुक्ताः क्षेत्रतोऽपि नास्ति येषां संबंधस्ते इति पश्चादुच्यंते तत्र
यो मातापितृभ्यां पित्रैव मात्रा वा भर्त्रनुमतया यस्मै दत्तः स तस्य दत्तको नाम पुत्रो भवति मनुः माता
पिता वा दद्यातां यमद्भिः पुत्रमापदि सदृशं प्रीतिसंयुक्तौ स ज्ञेयो दत्त्रिमः सुतः अद्भिरिति सकलस्य
न धर्मोपलक्षणार्थम् आपदीति दुर्भिक्षादौ अथवा ग्रहीतुरापदि सुता भवे सदृशं दातुर्ग्रहीतुश्च सवर्णा

Indira Gandhi National Centre for the Arts

तु प्रीतिसंयुक्तो न भयादिसंयुक्त इत्यर्थः। तथा गोत्ररिक्थे जनयितुर्न हरेत्कृत्रिमः सुतः गोत्ररिक्था
नुगः पिंडो व्यपैति ददतः स्वधा ततश्च दत्तकपूर्वस्य पितुर्गोत्ररिक्थं च न गृह्णीयात् पिंडं च तस्मै न दद्या
त् किंतु द्वितीयस्यैव पितुर्गोत्रादिग्राहकः पिंडदश्च भवेत् पिंडश्राद्धोत्सकलौर्ध्वदैहिकोपलक्षणा
र्थः एवं कृत्रिमदत्तात्मापविद्धन्यायसाम्यात् त्रयोदशविधं पुत्रं निरूप्य तद्व्यवस्थां वर्णक्रमेणाह ब्रह्मपु
राणे दत्तकश्च स्वयंदत्तः कृत्रिमः क्रीत एव च अपविद्धश्च ये पुत्रा भरणीयः सदैव हि भिन्नगोत्राः
पृथक्पिंडाः पृथग्वंशकरास्तथा सूतके मृतके चापि त्र्यहाशौचस्य भागिन इति अथ वर्णानि दा
रणां वीजक्षेत्रवतां तथा शूद्रो दासः पारशवो विद्यानां विद्यते क्वचित् राज्ञां तु शूद्रगधानां नित्यं क्ष
संग्राम यवतां तथा अर्थशीलानां कर्दचिन्न भवंतिते औरसो यदि वा पुत्रस्त्वथवा पुत्रिकासुतः विद्यते न हि ते
षां तु विज्ञेया क्षेत्रजादयः एकादश पृथग्गोत्रा वंशमात्रकरास्तु ते आद्यादि दासवत्सर्वे तेषां कुर्वंति
नित्यशः गूढोत्पन्नश्च कानीनः सहोढः क्षेत्रजस्तथा पौनर्भवश्च वैश्यानां राजदंडभयादपि वर्जि
ताः पंचबलिनः शेषास्तेभवंत्यपि शूद्राणां दासवृत्तीनां परपिंडोपजीविनाम् पाण्यत शरीरेण [illegible]



चित्पुत्र इष्यते तस्माद्दासस्य दास्यां च जायते दास एव हि वशिष्ठः शोणितशुक्रसंभवः पुरुषो मा
तापितृनिमित्तकः तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीया
द्वा स हि संतानाय पूर्वेषां न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्तुः पुत्रं प्रतिगृहीष्यन्बंधू
नाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरेबांधवं सन्निकृष्टमेव प्रतिगृह्णीया
त् संदेहे चोत्पन्ने दूरेबांधवं शूद्रमिव स्थापयेत् विज्ञायते ह्येकेन बहूंस्त्रायत इति न त्वेकं पुत्रं
दद्यादिति ददातिप्रदर्शनार्थः तेन विक्रयादावप्ययं निषेधो भवति तथा पुत्रं प्रतिगृहीष्यति
स्वस्यापि प्रदर्शनार्थत्वाद्बंधूनाहूयेत्यौद्धिधर्मे जातक्रयादावपि कार्यं न्यायसाम्यात् अदूरेबां
धवा यस्य सो दूरेबांधवः बांधवा नाम दूरदेशस्थत्वेन तस्य कुलीनताशंकया त्यक्तुम् तेन दूरेबांध
वं विदिताभिजनं पुत्रं प्रतिगृह्णीयादित्यर्थः न पुनर्बंधुसन्निधौ गृह्णीयादिति बंधूनाहूयेत्यनेनै
व तत्सिद्धेः असन्निकृष्टमसंविदितमेव प्रतिगृह्णीयात् जातिसंदेहे चोत्पन्ने दूरेबांधवं व्यवहि
तदेशावर्त्तिबांधवं शूद्रमिव स्थापयेत् आनिश्चयात्तमहतायत्नेन निश्चयं कुर्यादिति तात्पर्यार्थः अ

Indira Gandhi National
Centre for the Arts

-अत्र हेतुत्वेन श्रुतिमुपन्यस्यति विज्ञायते ह्येकेन बहूंस्त्रायत इति एकेन पुत्रेण बहून्पूर्वजांस्त्रायत इ
ति तस्मात्स्वजातीयमिच्छन्नेव गृह्णीयात् नेतरमिति तात्पर्यार्थः क्रीतनामा पुत्रो भवति यो मातापितृभ्यां
क्रीतः प्राप्यते कृत्रिमसंज्ञस्तु पुत्रो भवति यः स्वयमेव त्वं मे पुत्रो भवेति पुत्रः क्रियते यस्त्वहं ते पुत्रो
भवामीति आत्मानमेवाप्रार्थितो ददाति स स्वयंदत्तसंज्ञकः पुत्रो भवति यस्तु परिणीयमानायां गर्भे
विन्नो लब्धः स पुत्रः सहोढज उच्यते मनुः क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् स क्रीत
कस्सुतस्तस्य सदृशोऽसदृशोऽपि वा सदृशोऽसदृश इति गुणापेक्षं वचनं न जात्यपेक्षं सदृशं तु प्रकुर्या
द्यं गुणदोषविचक्षणम् पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः अत्र सदृग्रहणं जात्यपेक्षं मा
तापितृविहीनो यस्तु त्यक्तो वास्याद्कारणात् आत्मानं स्पर्शयेद्यस्मै स्वयं दत्तस्तु स स्मृतः त्यागकारण
याति समस्पर्शयेद्यात् पाणिभिर्गौ संक्षिप्यते ताताभ्यामपि वा सती वोढुः स गर्भो भवति सहोढ इ
ति चोच्यते मातापितृभ्यामुत्सृष्टः पतितत्वादिकारणमन्तरेण सत्यक्तो येन गृह्यते तस्यापवि
द्धसंज्ञकः पुत्रो भवति मनुः मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा यं पुत्रं प्रतिगृह्णीयादपविद्धः स

॥८९॥

उच्यते पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः एषामुक्तानामौरसादीनां मुख्यामुख्यपुत्राणां
मध्ये पूर्वस्य पूर्वस्याभावे उत्तरः उत्तरः [illegible] नेऽधिक्रियते पुत्रप्रतिनिधीनां मध्ये क्षेत्रज एव
कलियुगे ग्राह्यः अत एव कल्यो निवर्त्तते इत्यनुक्तत्वौ शौनकेनोक्तः दत्तौरसौ तरेषां तु पुत्रत्वेन परि
ग्रह इति यदा तु पुत्रिकायामौरसो जायते तदाह मनुः पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते सम
स्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः क्षेत्रजं प्रति विशेषमाह मनुरेव यद्येकरिक्थिनौ स्यातामौ
रसक्षेत्रजौ सुतौ यस्य यत्पैतृकं रिक्थं तत्स गृह्णीत नेतरः एनं तत्क्षेत्रजस्य दामुख्यापेक्षया वी
जिय नेऽधिकारी स्वविधते वसिष्ठस्तु दत्तके पुत्रे सति औरसोत्पत्तौ विशेषमाह तस्मिंश्चेत्प्रतिगृ
ह्णीते औरसः पुत्र उत्पद्यते चतुर्भागभागी स्याद्दत्तकः सर्वे च न्यूनाधिकविकल्पाः सगुणनिर्गुण
पेक्षया व्यवस्थापनीयाः सर्वेषां च पुत्रप्रतिनिधीनां पूर्वाभावे परे षां दायहरत्वे सत्यपि केचिद्दाय
दाः केचिन्नेति यदुच्यमते न्वादिभिस्तत्रायमभिप्रायः पितृसपिण्डस्य पुत्रदायहाराः [illegible] एव पुत्र
प्रतिनिधयो भवंति ये दायादत्वेन निर्दिष्टा नेतरे इति सर्वेषामेव पूर्वोक्तानां पुत्रप्रतिनिधिलक्षणा

Indira Gandhi National
Centre for the Arts

नांशोषमाह सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः शूद्रोत्पन्नाद्यग्रात्मनः सजातीयास्वसवर्णा
ए वंपुत्रात्वे नग्राह्या नेतरे इति तात्पर्यार्थः शूद्रापुत्रः स्वक्षेत्रे स्वयमुत्पादित इति न प्रतिनिधिः किंत्वौरसः
तथापि प्रतिनिधिषु नुनापठितस्त्वयमभिप्रायः अन्येष्वनुलोमजेष्वौरसेषु सत्सु न प्रतिनिधिरस्ति
शूद्रापुत्रस्त्वौरसेष्वपि पुत्रप्रतिनिधिः कार्य एवेति मनुः यद्यपि स्यात्तु सत्पुत्रोप्यपुत्रोपि भवेत् नाधिकं दश
मद्द्याच्छूद्रापुत्राय धर्मतः अपुत्रास्य दशमांशाद्धिकं पश्चाद्योग्यतेत्यर्थसिद्धम् जातोपि दा
स्यां शूद्रेण कामतोंशहरो भवेत् मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिकम् अभ्रातृको हरेत्सर्वं दुहितॄ
णां सुताहृते शूद्रेण दास्यामुत्पन्नः पितुरिच्छातोंशहरो भवेत् पितायावंतमंशं ददातु मिच्छति तस्ये ताव
तस्य भवतीत्यर्थः मृते भर्तरि पितरि तत्पुत्रास्तदीया भ्रातरः एकस्य यावान् भागो भवति तदर्धं दद्युः
अभ्रातृको हरेत्सर्वं पित्र्यं हरेत्तस्यास्तु भागार्धमेव अतः शूद्रस्य हरणान् द्विजोत्पन्नस्य दासीपुत्रस्य पि
तृधनांशहरत्वं नास्तीति गम्यते पुत्रतत्प्रतिनिधिरहितस्य मृतस्य धनभाक्क्रममाह पत्नी दुहितर
श्चैव पितरौ भ्रातरस्तथा तत्सुता गोत्रजो बंधुशिष्यः सब्रह्मचारिणः एषामभावे पूर्वस्य धनभागुत्त

॥६०॥

त्र१

रोत्तरः स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः अपुंस्त्वाविद्यमानमुख्यगौणपुत्रस्य स्वर्यातस्य धनभाग्ध
नग्राही पत्न्यादीनां क्रमेण निर्दिष्टानां पूर्वस्य पूर्वस्याभावे उत्तर उत्तरो वेदितव्यः एष एव विधिः सर्ववर्ण
साधारणः बृहस्पतिः आम्नाये स्मृतितंत्रे च लोकाचारे च सूरिभिः शरीरार्धं स्मृता भार्या पुण्यापुण्य
फले समा यस्य नोपरता भार्या देहार्धं तस्य जीवति जीवत्यर्धशरीरेर्थं कथमन्यः समाप्नुयात् स
कुल्यैर्विद्यमानैस्तु पितृमातृसनाभिभिः असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी पूर्वं प्रमीताग्नि
होत्रं मृते भर्तरि तद्धनम् विदेत्पतिव्रता नारी धर्म एष सनातनः जंगमं स्थावरं हेम रूप्यं धान्यं रसां
बरम् सादाय पयेच्छाद्धं मासषाण्मासिकादिकम् पितृव्यगुरुदौहित्रान्भर्तृस्वस्रीयमातुलान् पूजये
त्कव्यपूर्ताभ्यां वृद्धानाथातिथीन्स्त्रियः तत्सपिंडा बांधवा वा ये तस्याः परिपंथिनः हिंस्युर्धना
नि तान् राजा चौरदंडेन शासयेत् विष्णुः अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि तदभावे पि
तृगामि तदभावे सकुल्यगामि तदभावे बंधुगामि तदभावे सहाध्यायगामि तदभावे ब्राह्मणधनवर्जं
राजगामि बृहस्पतिः मृतो नष्टो भार्या चेद्भ्रातृपितृमातृकाः सर्वे सपिंडास्तद्दायं विभजेरन्यथांश

Indira Gandhi National
Centre for the Arts

तः शंखः पुनरन्यथा क्रममाह अथापुत्रस्य स्वर्यातस्य भ्रातृगामि द्रव्यं तदभावे मातापितरौ लभेतां पत्नी वा ज्येष्ठेति देवलः ततो दायमपुत्रस्य विभजेरन् सहोदराः तुल्या दुहितरो वापि ध्रियमाणः पितापि वा सवर्णा भ्रातरो माता भार्या चेति यथाक्रममिति नारदोपि भ्रातॄणामप्रजः प्रेयात् कश्चिच्चेत् प्रव्रजेत् वा विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना भरणं चास्य कुर्वीरन् स्त्रीणामाजीवितक्षयात् रक्षन्ति शय्यां भर्तुश्चेदाच्छिंद्युरितरासु तत् तथान्यत्र ब्राह्मणात्कि तु राजा धर्मपरायणः तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृत इति एवमेषां वाक्यानामापाततः प्रतिभासमानविरोधानां विरोधपरिहारेण प्रामाण्यसिद्ध्ये भिन्नविषयता वाच्या तत्र केचिदाहुः या देवराद्न्यस्माद्वा सपिंडाद्गुरुश्वसुरादिवचनात्पुत्रमिच्छति तद्विषयं पत्नी दुहितरश्चेत्यादिवचनं इति तद्युक्तं दुष्परिहरो हि बहुतरस्मृत्यंतरविरोधोत्र तथा हि रिक्थलोभान्नास्ति नियोग इति वसिष्ठः अनेन हि रिक्थग्राहिण्या नियोगनिषिकार उच्यते ननु मा भूत्तस्मान्नियोगः पूर्वमेव नियुक्ताया पश्चाद्धनलाभार्थं पत्नी दुहितरश्चेत्यनेन विधीयतां तदसत् तथा हि सति तेनैव जातेनिष्पन्नेन क्षेत्रजेन पुत्रेण धनस्वामिनोतीतस्य पुत्रवत्त्वं स्यात् अपु-

॥८९॥

त्रस्य धनं पत्नी भजते इति पत्नी दुहितरश्चेत्यादिना विधीयते अत एवाह मनुः धनं यो बिभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा सोपत्यं भ्रातुरुत्पाद्य दद्यात्तस्यैव तद्धनमिति तस्यैव तत् न तु तज्जनन्या इत्यर्थः संस्थितस्यानपत्यस्य सगोत्रात्पुत्रमाहरेत् तत्र यो रिक्थभागः स्यात्तत्तस्मै प्रतिपादयेत् तस्मै तत्तत्त्वे अपत्यायेत्यर्थः तच्च नियोगार्थित्वं रिक्थग्राहित्वविरुद्धात्कथमिव हेतुः विरोधमेव गौतमः स्पष्टयति पिंडगोत्रार्षिसंबंधा रिक्थं भजेरन् स्त्री वानपत्यस्य बीजं वा लिप्सेतेति अनेन ह्यनपत्यभर्तृधनग्राहित्वस्य बीजलिप्सायाश्चित नियोगार्थित्वस्य च विकल्पः प्रतिपाद्यते अतः स्पष्टो विरोधः वृद्धमनुरपि अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेतेति चेति वदन्नियोगार्थिन्या नास्ति रिक्थग्राहित्वमिति स्पष्टयति न पाहि सति भर्तुः पालयंतीति न वाच्यं स्यात् तस्मान्नेयं व्यवस्था युज्यते कथं तर्हि विरोधपरिहारः अपुत्रा शयनं भर्तुरित्यादिमनुवाक्योक्तगुणपत्नी पितृभ्रातृसद्भावेपि स्वयमेव पतिधनं समग्रं गृह्णाति पत्युश्च श्राद्धादि करोति अनेनैवाभिप्रायेण बृहस्पतिनाप्युक्तम् पितुः पुत्रेण कर्त्तव्या पिंडदानोदकक्रिया पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदर इति तथा या पितृधनानुपघातेन स्वयमर्जयितुः

Indira Gandhi National
Centre for the Arts

भर्तुः परिचर्या यथावत्कृतवती संयतेन्द्रिया च सा भर्तुः सकलमेव धनं देवरेषु विद्यमानेष्वपि गृह्णाति
या तु तारुण्यादिना संभावितव्यभिचारा तस्यां विद्यमानायामपि मृतकस्य भ्रातुर्भ्रातृगाम्येव वित्तं न तु प
त्नीगामी तत्रापि द्वैविध्यावस्थिता यदि तद्भ्रातृभिः स्वपितृधनानुपघातेन संभूयसमुत्थानेन धनमर्जि
तं तदा पित्र्ये सङ्क्रामेऽपि भ्रातरो वै धनेऽग्राहिणः यदा तु पितृपितामहाद्युपार्जितं धनं तदा न भ्रातृणां ध
नभागित्वम् किं तु पत्न्या इति एवं च विषयव्यवस्थायां सर्ववाक्याविरोधः न च वाच्यम् एकाकिनी स्त्रीय
त्नेनाधिकृताः कथं यज्ञार्थतयोत्पन्नं गृह्णीयादिति सर्वस्यापि वा धनोत्पत्तेर्यज्ञार्थत्वे प्रमाणाभावात्
ये वहिर्हाद्ग्राणत्रिर्दीक्षितोऽन्तं च न्यीत्यस्यैवमादिवचनविहिताः सैव धनोत्पत्तिः क्रत्वर्था अन्यथा तु पु
रुषार्थैव यदपि चार्थवादवचनं तस्मात्स्त्रियो निरिन्द्रिया अदायादा इति तदपि यथाप्राप्तिवचनीयमनु
वादकत्वादिति पुत्रसद्भावविषयत्वेन व्याख्येयं अस्ति च स्त्रीणामेकाकिनामपि धूर्ते धनाधिकारस्ते
न तत्र धनं तासु पयोक्ष्यते यत्तु नारदेनोक्तम् भ्रातृणामप्रजः प्रेयादित्याभिधायोक्तं भरणं चास्य कुर्वी
स्त्री रन्स्त्रीणामाजीवितक्षयादित्यादि तत्पुनर्भूस्वैरिण्यादिविषयं वेदितव्यं स्त्रीशब्दमात्रप्रयोगात् पत्नीशब्दस्तु

॥८२॥

विवाहयज्ञसंयोगिन्यामेव वर्तते पत्युर्नो यज्ञसंयोगेतिस्मृतेः एवं पत्न्यामसत्यां पितुः समानवर्णा दुहि
तरो पुत्रधनस्वामिन्यः नारदः पुत्राभावे तु दुहिता तुल्यसंतानदर्शनात् पुत्रश्च दुहिता चोभौ पितुः संतानकारकौ
तथा यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् बृहस्पतिः॥
अङ्गादङ्गात्संभवति पुत्रवद्दुहिता नृणाम् तस्यां पितृधनं त्वन्यः कथं गृह्णीत मानवः सदृशो नोढा सा
ध्वी शुश्रूषणे रता वापुत्रस्य पितुर्धनहारी तु सा सदृशी सवर्णा अतोऽसवर्णाया दुहितुरनधिकारो धन
ग्राहित्वे कृताकृतापुत्रिकेत्यर्थः अत्र च कृताकृतविकल्पेन पुत्रिकाद्दृष्टांततयोपादीयते न पुनस्तस्य
नहि पुत्र इति वा अपुत्रपितृधनग्राहित्वविधीयते तेन वक्तुम् पुत्रिकाया अपि पुत्रत्वं तथा च वशिष्ठः तृतीया पुत्रिका वि
क्य५ ज्ञायते इति एतेन यदुक्तं केनचित्पत्नी दुहितरश्चेत्यत्र दुहितृशब्देन पुत्रिकोच्यते इति तन्निरस्तं वेदितव्यं
माता च पिता च पितरौ तौ पुत्रस्य पत्न्या दुहितृभिश्च रहितस्य धनग्राहिणौ बृहस्पतिः भार्यासुतविहीनस्य
तनयस्य मृतस्य तु माता तारिक्थहारी स्यात् भ्राता वा तदनुज्ञया मनुः अनपत्यस्य पुत्रस्य माता दायमवाप्नुया
त् मातर्यपि च वृत्तायां पितुर्माता धनं हरेत् पित्रोरभावे भ्रातरः ते तु सोदरा एव प्रत्यासन्नतरत्वात् ते हि म

Indira Gandhi National
Centre for the Arts

तभ्रात्रपेक्षयैकस्मात्वर्गस्यश्राद्धकारिणो नतुसापत्नाः यत्तुशंखलिखितपैठीनसिव
चः अपुत्रस्यस्वर्यातस्यभ्रातृगामिधनंतदभावेमातापितरौलभेतांपत्नीवाज्येष्ठेत्यादि
तत्सितृधनानुपघातेनार्जितविभक्तधनेषुद्रष्टव्यम् तादृशभ्रातृभावेचपित्रोर्लिप्सा
वस्पत्नी उक्तलक्षणाभ्रातृविलक्षणास्तुभ्रातरोयाज्ञवल्क्योक्तक्रमातिक्रमेणरिक्थ
भाजोमंतव्याइतिसर्वमविरुद्धम् यदपिदेवलेनोक्तम् ततोदायमपुत्रस्यविभजेरन्सहो
दराः तुल्यादुहितरोवापिध्रियमाणःपितापिवा सवर्णाभ्रातरोमाताभार्याचेतियथाक्र
मम् तत्रापिशंखवचनव्यवस्थाप्रकारेणसोदराणांपूर्वंदायग्राहित्वंमंतव्यम्॥
भ्रातृभावेतत्सुताः तदभावेमोत्रजाः तत्रप्रत्यासन्नःपूर्वंधनभाक् यथाहमनुः अ
नंतरःसपिंडाद्यस्तस्यतस्यधनंभवेत् इति अनंतरताचतेनैवोक्तात्रयाणामुदकंक
र्यंत्रिषुपिंडःप्रवर्त्ततेचतुर्थःसंप्रदातैषांपंचमोनोपपद्यते संप्रदानकारकीभूतानामपि
त्रादीनांत्रयाणांपिंडोदकादिदातायश्चतत्संततिजोन्योपितेषामेवोदकादिदातासतस्य

॥९३॥

प्रत्यासन्नः सपिंडः तदत्रसोदरोभ्रातातिशयेनप्रत्यासन्नःसमानसंप्रदानोदकादिदातृत्वात्
तत्सुतः पुनरीषद्व्यवहितः पितृपिंडसंप्रदानान्यत्वात् तत्पौत्रस्तुततोपिव्यवहितः पितृपि
तामहपिंडयोर्भिन्नसंप्रदानकत्वात् तत्पौत्रस्त्वत्यंतव्यवहितःपिंडत्रयेपिपिंडप्रदानभेदा
त् एवंभ्रातातत्सुतः तत्पौत्रइतिपितृसंततौत्रयःप्रत्यासन्नाः सपिंडाः एवंपितामहसंततौ
प्रपितामहसंततौच एषामभावेपित्रादित्रयस्ययेप्रपौत्रास्तेषांपुत्रादित्रयंसापिंड्याद्धन
ग्राहकम् गोत्रजाभावेबंधुःपितृष्वसामातृष्वसामातुलसुतादिः तदभावेशिष्यःउपनी
यवेदमध्यापितोधनभाग्भवतितदभावेसब्रह्मचारीएकाचार्यकः यत्तुकात्यायनेनोक्त
म् विभक्तेसंस्थितेद्रव्यंपुत्राभावेपिताहरेत् भ्राताचाजननीवाथमातावातत्पितुःक्रमात्
इतितत्रपुत्राभावइत्येतत्प्रदर्शनार्थम् तेनपत्नीदुहित्रणामभावेइतिद्रष्टव्यम् पितुरभा
वेभ्रातामात्रानुमतः अननुमतेनवामातैव मातारिक्थहारिण्या भ्रातावातदनुज्ञयेतिव
चनात् एषामभावेस्तस्यपितामहीदुहितृदौहित्रानंतरम् बृहस्पतिः तदभावेभ्रातरस्तु

Indira Gandhi National
Centre for the Arts

भ्रातृपुत्राः सनाभयः सकुल्या बान्धवाः शिष्याः श्रोत्रियाश्च धूर्नार्हकाः नारदः अभावे
च दुहितॄणां सकुल्या बान्धवास्तथा ततः सजात्याः सर्वेषामभावे राजगामि तत् अन्य
त्र ब्राह्मणात् किंतु राजा धर्मपरायणः तत्स्त्रीणां जीवनं दद्यादेष दायविधिः स्मृतः अत्रा
भावे दुहितॄणामिति पित्रोरप्यभाव उपलक्ष्यते तत्स्त्रीणामपरिणीतानां स्वैरिणीनां पु
नर्भ्वां वा सर्वेषामप्यभवितु ब्राह्मणा रिक्थहारिणः त्रैविद्याः शुचयो दान्तास्तथा धर्मो न
हीयते अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः इतरेषां तु वर्णानां सर्वाभावे हरे
न्नृपः नृपो जन्मपरस्य भ्राताः बृहस्पतिः ये पुत्राः क्षत्रविट्शूद्राः पत्नीभ्रातृविवर्जि
ताः तेषां धनहरो राजा सर्वस्याधिपतिर्हि सः पैठीनसिः परिषद्गामि वा श्रोत्रियं द्रव्यमन
राजगामि न हार्यं राज्ञा देवस्वागमस्य संस्थितत्वम् न निक्षेपोपनिधि क्रियाक्रमागतं न वालस्त्री
धनान्येवं ह्याह नहार्यं स्त्रीधनं राज्ञा तथा बालधनानि च नार्यापतित्रिपुरुषमित्यभावा राम·
स्याश्रद्धाभिप्रायात् विष्णुः पुत्रः पितृवित्तालाभे पिण्डं दद्यात् पत्नीदुहितरद्स्तत्र वाचे



केचिदर्थं नुयुंजते यथा स्त्रियाः सभर्तृकायाः एतेष्वपूर्वयोरधिकारः ननु केयं पत्न्या
स्तस्या भर्तृरहितत्वादेव च तत्पानकामः सेवनीयः किंतु तपस्त्रीत्वं न च धर्मकामयोरनुप
युज्यमानो र्थो भवति पुरुषार्थः तस्मात्पित्राद्युद्दिधर्मकामोपयोगि धननार्जनेषु सत्सु नय
त्याधनभाक् च च नन्म यस्य तु पत्नीरहितस्य धनं विवाहमात्रपर्याप्तं तद्विषयं दुहितृ
णां धनग्राहित्वमनेनोच्यते अतोधिकस्य मृतकधनस्य पत्नीदुहितृसद्भावे पि सपिंडाः
पित्रादय एव ग्राहकाः धूर्त्वादिवाक्यसामर्थ्याद्भवतीति मंतव्यमिति यदुक्तं मधनस्वा
मिनः प्रमये सति तद्धनेन्यस्य स्वामित्वोत्पत्तौ विधेयायां यथाह भगवान् यत्पादुहितॄणां
स्वामितोस्य नैव नत्स्वाधा याणिग्रहणाद्धि सह स्वमिसादिनो यस्त व वा केन भर्तृधने
स्त्रीणां स्वामिग्रहणा स्वसाधयतीति विधीयते दुहितॄणां तु पुत्रवज्जन्मनैव पितृधनस्वा
मित्वसिद्धिरिति वेदितव्यम् न तस्य पत्न्या दुहितरिस्स्यां तस्याः स्वामित्वं बाधित्वा पित्रादिस्वा
म्यत्वविधिरनेन वा केनन कार्यः अभावे तु पत्नीदुहित्रोर्वा धनिरपेक्षं विधाय कत्वमस्येतिवे

Indira Gandhi National
Centre for the Arts

..ष्यमायघते ततस्तत्परिहारार्थं पत्न्याद्यभावे एव पित्रादीनां धनधनभाक्त्वमिह प्रमेयम् यत्तु
शंखादिभिः पित्राद्यभावे पत्न्या धनग्राहकत्वमुच्यते तत्कारणान्तरेणाभर्तृधने पत्न्या अधिका
रादिपदास्पदस्वामित्वमयेतत्तद्विषयं द्रष्टव्यम् उक्तं च कारणान्तरम् दृताधिकारमलिनामित्यत्र
भर्तृधने पत्न्याः स्वामित्वमप्रतिपादिततस्माद्धुक्तेव वध्यवस्थापुक्तापदुक्तम् स्त्रीणां स्वनिर्वाह
समर्थादधिकोर्थो निरर्थक इति तदपि नैव युक्तम् उक्तं हि स्त्रीणामभावात्कारणं मंत्राग्नि
साध्यधर्मादन्यत्र धर्मेद्दानादावस्त्यधिकार इति तेन स्वभर्त्रौर्ध्वपुण्यमावेर्थेनासामुपयोगः अ
थम इस्यव्यतिरिक्तानामाश्रमिणां परेतानां धनग्राहकान्सक्रमकानाह वानप्रस्थयतिब्र
ह्मचारिणां रिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः वानप्रस्थादीनामन्यत
मस्यान्त तस्य रिक्थमाचार्यादयः क्रमेण गृह्णीयुः पूर्वस्य पूर्वस्याभावे उत्तर उत्तरो गृह्णीया
दित्यर्थः सन्नुगुणवांश्शिष्यः सच्छिष्यः धर्मभ्रातासमानाचार्यः एकतीर्थी एकसिद्धान्तः एकवा
राणसीप्रभृतितीर्थनिवासी वा वानप्रस्थधनमस्तीति वचनात् स्वर्जेदाथ्यपुत्रे मासिउस्यन्ते ॥८५॥

..८०॥

पूर्वसंचितमिति अग्राह्यमन्ते यतिब्रह्मचारिणोः पिकंप्यादि किंचिद्स्त्येव अपुत्रस्य तु भ्रातुः पत्नी
दुहितृणां पित्रोश्चाभावे भ्रातृहरणं भवतीत्युक्तम् तत्र विशेषमाह संसृष्टिनस्तु संसृष्टी सोदरस्य तु सो
दरः दद्यादपहरेच्चांशं जातस्य च मृतस्य च अन्योदर्यस्तु संसृष्टिनान्योदर्यधनं हरेत् असंसृ
ष्ट्यपि चादद्यात्सोदर्यो नान्यमातृकः विभक्तधनस्य विभक्तेनैव धनान्तरेण मिश्रणं संसृष्टं त
द्यानू संसृष्टी तस्य मृतस्य धनं संसृष्टेनैव भ्रातात्रहरेत् भ्राता त्वत्र सोदरेणैव न पुनरन्योदर्यः संसृ
ष्टपि संसृष्टिनस्तु जातस्य तन्मरणोत्तरकालमुत्पन्नस्य पुत्रस्य तदंशं तत्पुत्राय पत्नीव न्संसृष्टी
दद्यात् एतच्चात्र प्रसंगादुक्तम् अत्र बृहस्पतिः विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः पितृ
व्येनाथवा प्रीत्या स तत्संसृष्ट उच्यते अनेन त्रिविधाः संसृष्टिनो भवंति स्यन्दपतेतेषां मध्या
दपुत्रस्य पत्न्यादिसद्भवितद्विपर्ययेति जिज्ञासायामाह यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथंच
नः न लुप्यते तस्य भागः सोदरस्य विधीयते या तस्य भगिनी मातुस्ततो भागं लभन्तु सेति अनपत्य
स्य धर्मोयमभार्यापितृकस्य चेति अतश्च संसृष्टिनोपि यदि पत्न्यादयः संति तदा पत्नीदुहितरड
यमेव पक्षः पत्र भ्रातृणां रिक्थग्राहित्वे प्राप्ते संसृष्ट सोदरात्वसंभवे तद्विसृष्टस्यैव भ्रातुर्धनं

Indira Gandhi National
Centre for the Arts

स्कं नियम्यते भगिन्यां सोदराः न्यात्रभावे धिकारितामतव्या अन्यथा तस्माल्लिरिद्विपाल्लियो वा
दरेतिश्रुतिविरोधः स्यादिति उक्तमेतत् संसृष्टिनाम तकस्यांशं सोदर्यः संसृष्टी हरेदिति।
एतदेव व्यतिरेकतः स्पष्टयितुमाह अन्योदर्यस्तु संसृष्टी नान्योदर्यो हरेत् निगदव्याख्यात
मेतत् यदा पुनरन्योदर्यः संसृष्टी न सोदरश्च तदा कोऽत्र हरेदित्यपेक्षायामाह असंसृष्ट्यपि चाद
द्यात् सोदर्यो नान्यमातृजः सोदर्योऽपि संसृष्टी तथापि स एवाददीत पुनरन्योदर्यः संसृष्ट्यपि अ
न्योदर्यत्वसंसृष्टित्वविशेषणाम् असंसृष्ट्यपि इतिशब्दादनुमीयते तेनायमर्थः सिद्धः यदि सोदरत्व
संसर्गित्वं च विद्यते तदा स एव तादृशस्यांशं हरति यदा पुनः संसृष्टित्वमन्योदर्यस्य तदा सोद
रत्वनिमित्तं नेतरदिति मनुः विभक्ताः सह जीवन्तो विभजेरन्पुनर्यदि समस्तत्र विभागः स्यान्ज्ये
ष्ठ्यं तत्र विद्यते अनेन ज्यैष्ठनिमित्तविभागवैषम्यं निषिध्यते नान्यनिमित्तं तेन संसर्गसमये यदी
यं यावद्धनं संसृष्टं विभागसमये तदनुसारेणैव भागं लभन्ते अत्रैव विशेषान्तरमाह बृह
स्पतिः संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिसाधनम् प्राप्नोति तस्य दातव्यो द्व्यंशः शेषाः
समांशिनः मनुः येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः म्रियेतान्यतरो वापि तस्य भागो न

॥६४॥

लुप्यते सोदर्या विभजेरंस्तं समेत्य सहिताः समम् भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः
अंशाप्रदानं विभागः ततो हानिः पातित्याद्यपपातित्यादिना नाधिकारः तस्य भागो न लुप्यते कल्प
नीय इत्यर्थः तं भागं सोदरा यदि संसृष्टास्तदा त एव गृह्णीयुर्नासंसृष्टाः सोदर्या अपि संसृ
ष्टानां सोदराणामभावे सर्वे सोदराः समेत्य मिलित्वा सहिताः समं प्रधानाभावे न समन्यूना
धिकं विभजेरन् सोदराणामभगिन्यः सनाभयः सोदर्या विभजेरन्निति शेषः तासामप्यभावे
अन्योदर्या भ्रातरः सर्वत्र विभागानधिकतामाह क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः अ
न्धोऽचिकित्स्यरोगाद्या भर्तव्यास्तु निरंशकाः क्लीबादिनिरंशका भर्तव्याः अंशभागस्तद्दुहिताः कार्याः
केवलं तु भर्तव्याः एते भवन्ति क्लीबः पङ्गुः पतितोऽचक्ष्यते तत्र पतितोत्पन्नः तस्य यद्यपि पतितोत्पन्न
ग्रहणेनैव ग्रहणं सिद्धम् उक्तं वशिष्ठेन पतितेनोत्पन्नः पतितो भवतीत्याहुरिति तथापि तस्य
पृथग्ग्रहणं कार्यम् अन्यथा औरसक्षेत्रजासेषु धर्मितिवा व्यवलाद्भागार्हतास्यात् पङ्गुश्चरण
रहितः उन्मत्तक उन्मादी उन्मादो रोगविशेषः जडो मूकः अन्धोऽचक्षुः अचिकित्स्यरोगः अप्रति

Indira Gandhi National
Centre for the Arts

समाधेयथाधिः आद्यशब्दः भ्रात्रंतरोक्तानांभागानर्हाणांसंग्रहार्थः तत्रनारदःपितृद्विट्पति
तःषंढोयश्चस्यादौपपातिकः औरसाअपिनैतेंशंलभेरन्क्षेत्रजाःकुतः पितृद्विट्पितृद्वेषीउ
पपातकमुपपातः तद्युक्तऔपपातिकःमनुः सर्वेएवविकर्मस्थानार्हंतिभ्रातरोधनम् दी
घातीव्रामयग्रस्ताजडोन्मत्तांधपंगवः अनंशौक्लीवपतितौजात्यंधबधिरावपिउन्मत्तज
डमूकाश्चयेचकेचिन्निरिंद्रियाः वसिष्ठः अनंशास्त्वाश्रमांतरगतागृहस्थापेक्षमाश्रमांतर
त्वम्कात्यायनः अक्रमोढासुतश्चैवसगोत्राद्यश्चजायते प्रव्रज्यावसितश्चैवनरिक्थंतेषुचा
र्हति अक्रमेणवर्णक्रमजन्मक्रमातिक्रमेणयाऊढातस्यासुतः अक्रमोढासुतः सगो
त्रोत्स्वप्यपेक्षयासमानगोत्रासपिंडातुर्योजायते तेषांचवाचनिकमंशानर्हत्वंनपुनर्धर्मान
धिक्कारित्वहेतुकम् धर्मानधिकारित्वापादित्वभावात् यद्यपिपतितस्यधर्मानधिकारस्त
थानांधर्मवादीनांतेषामवेक्षणाद्यौगवत्स्येवधर्मविशेषेणाधिकारः नसामान्यतोधर्मपात्रे
अस्तिहितेषामिष्टधर्मेगृह्याद्युक्तेधिकारः कृतदाराहिते तथाहिमनुः यद्येपितास्तुदारैः ॥८७॥

स्यात्क्लीववद्धीनांकथंचन तेषामुक्थःपरोदायःस्त्रियेदेयःपरःपरमःवोपतइतिदायः त
स्मिंदायंनत्तंदत्तंवा निषिद्धेनमार्गेणायाकामदेवरादेरनुमितिमंतरेणाप्याप्नुयात्॥
अतोधिकेतुदेवराद्यनुमतिरपेक्षणीयेत्यपोक्तस्यते मनुः पत्यौजीवतियः स्त्रीभिरलंकारोधृ
तोभवेत्नतंभजेरन्दायादाभजमानाः पतंतितेसततद्धृतालंकारविषयमेतत् नभर्त्तानै
वचपितानपुत्रोभ्रातरोनच आदानेवाविसर्गेवास्त्रीधनेप्रभविष्णवः यदिस्येकतरोप्येषांस्त्री
धनंभक्षयेद्बलात् सवृद्धिंप्रतिदाप्यः स्याद्दंडंचैवसमाप्नुयात् कात्यायनः जीवंत्याः पतिपुत्राद्या
देवराःपितृबांधवाः अनीशास्त्रीधनस्योक्ताधनस्योक्तादंड्यास्त्वपहरंतिये मनुः जीवंतीनां
तुतासांयेतद्धरेयुःस्वबांधवाः तांश्छिष्याच्चौरदंडेनधार्मिकः पृथिवीपतिः मृतानांस्त्रीणांध
नेबांधवानामप्यधिकारोविवाहविशेषोपाधौविधत्तेइत्यभिप्रायेणोक्तम् जीवंतीनामितियद
र्थंस्त्रीधनलक्षणमुक्तंनदिदानीमाह बंधुदत्तंतथाशुल्कमन्वाधेयकमेवच अप्रजायामती॥
यांबांधवास्तदवाप्नुयुः बंधुभिःपितृव्यमातुलादिभिर्यद्दत्तं यच्चशुल्कंयच्चान्वाधेयकमित्यनेन

Indira Gandhi National
Centre for the Arts

सर्वमेव स्त्रीधनमुपलक्षितं तस्त्रियामनपत्यायामतीतायां बांधवा अप्याप्नुयुः बांधवसंबंधित
द्रव्यतीत्यर्थः उक्तं सामान्येन बांधवा अप्याप्नुयुरिति इदानीं यस्मिन् विषये बांधवा अधिक्रिय
न्ते तदुनयमाह अप्रजस्त्रीधनं भर्तुर्ब्राह्मादिषु चतुर्ष्वपि दुहितॄणां प्रसूतानां चेत्तोघ्वेषु पितृगा
मितत् अनपत्यायाः स्त्रिया ब्राह्मदैवार्षप्राजापत्यविवाहप्राप्तायाः धनं तद्भर्तुर्भवति आ
सुरगांधर्वराक्षसपैशाचविवाहलब्धायास्तु तदीयं धनं पितृगामि भवति प्रसूतापत्यवतीवे
दुहितॄणामेव एतच्च सर्वविवाहविषयम् पुत्रसद्भावेपि दुहितृगामि मातृधनमित्येतदर्थमिद
मिति अतो मातुर्दुहितर इत्यनेनेगतार्थम् नहि तत्राधिकार एकमत उक्तः अत एव कात्यायनः दु
हितॄणामभावे तु रिक्थं पुत्रेषु तद्भवेत् बंधुदत्तं तु बंधूनाम् अभावे भर्तृगामितत् उत्तरार्द्धमासु
रादिविवाहचतुष्टयोढाहविषयम् मनुः स्त्रियास्तु यद्भवेद्वित्तं पित्रादत्तं कथंचन ब्राह्मणी
तद्धरेत्कन्या तदपत्यस्य वा भवेत् यच्चैतेनैवोक्तम् ब्राह्मदैवार्षगांधर्वप्राजापत्येषु यद्वसु
अतीतायामप्रजसि भर्तुरेव तदिष्यत इति तत्र गांधर्वविवाहोढाया धनस्य भर्तृगामित

॥६८॥

याविकल्प इति मंतव्यम् यतः स एवाह यत्तस्यै स्याद्धनं दत्तं विवाहेष्वासुरादिषु अतीतायाम
प्रजसि मातापित्रोस्तदिष्यत इति आसुरविवाहकन्याशुल्कमात्रं कुपोदरभ्रातृणां तदभावे
मातुः यदाह गौतमः भगिनीशुल्कः सोदर्याणामूर्ध्वं मातुः बौधायनः रिक्थं मृतायाः कन्या
याग्रहीयुः सोदराः स्वयम् तदभावे भवेन्मातुस्तदभावे पितुर्भवेत् मनुः अप्रजायामतीता
तु पुत्रिकायां कथंचन धनं तत्पुत्रिकाभर्ता हरेदेवाविचारयन् अस्या यो जायते पुत्रः।
स मे पुत्रो भवेदिति इत्येवं कृतार्थायां पुत्रिकायामेतत् या पुनरियं मे पुत्र इति क्रियते तद्विषय
माहतुः शंखलिखितौ प्रेतायाः पुत्रिकाया न भर्त्ता धनमर्हत्यपुत्रायाः पैठीनसिः प्रेताया
पुत्रिकायां न भर्ता धनमर्हत्यपुत्रायाम् मात्रा मातृष्वसा वा तद्ग्राह्यम् बृहस्पतिः मातुः स्वसा मा
तुलानी पितृव्यस्त्री पितृष्वसा श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः यदासामौरसो न
स्यात्सुतो दौहित्र एव वा तत्सुतो वा धनं तासां स्वस्त्रीयाद्याः समाप्नुयुः पूर्वजस्य ज्येष्ठस्य पत्नी पूर्व
जपत्नी स्त्रीधनविभागप्रसंगाद्दत्ता विषयं किं विवाह दत्ताक[illegible]हरनूवं ज्ञाम्यपंदघस्त

Indira Gandhi National
Centre for the Arts

हीदयम् मृतायां सर्वमादद्यात्परिशोध्योभयव्ययम् वाचा वरायपश्चै व्याधिदोषरहिताय कन्यां
दत्वा यस्तस्माद्धरति न ददाति स राजा दण्ड्यः यावतो धनस्य वरेण व्ययः कृतस्तावत्सवृद्धिकं धनं
वराय च दद्यात् राज्ञा दण्ड्य इत्यर्थः ज्ञै व्याधिदोषसहिताय तु यस्तस्माद्धरति न ददाति स राज्ञा न दण्ड्यः
अन्यथा दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत् इति पूर्वोक्तवचनविरोधः स्यात् तथा प्रा
ग्विवाहात्कन्यायां मृतायां धनं विवाहनिमित्तं पित्रे वरेण दत्तं तेन कन्यापितुर्धनस्य च विवाहनि
मित्तं धनं व्ययं परिशोध्य शेषं वर आददीत उक्तम् मृतायाधनविशेषे भर्ता गृह्णीयादिति इदा
नीं दुर्भिक्षादौ गृहीतं स्त्रीधनं न भर्ता स्त्रियै दद्यादित्याह दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोध
के गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति दुर्भिक्षमन्नाभावः धर्मकार्यं च यदावश्यकं न तु का
म्यं व्याधिश्च रोगः तत्प्रतिक्रियार्थं संप्रतिरोधो निगडादिबंधः एतेषु निमित्तेषु स्वीकीयधनाभावे स्त्री
धनं गृहीत्वा एतानापदस्तरेत् प्रतिदानसमर्थे धनाभावे च तत्तस्यै न दद्यात् कृपणाद्यन्नाद्युपाय
द्विषयमेतत् अत एव देवलः वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् भोक्त्री तत्स्वयमेवेदं पतिर्नार्हि ॥६८॥

स्यनापति अध्यामोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकं तत् पुत्रार्त्तिहरणे वापि स्त्रीधनं भोक्तुमर्हति यू
तगीतादिप्रयोजनो ध्यनप्योमोक्षः भोगस्तु स्वन्नपानाद्युपयोगः पुत्रार्त्तिहरणे स्त्रीधनमुपभोग्यम्
ग्राह्यम् इत्यर्थः कात्यायनः न भर्ता नैव च सुतो न पिता भ्रातरो न च आदाने वा विसर्गे वा स्त्रीधने प्र
भविष्णवः यदि ह्येकतरो ह्येषां स्त्रीधनं भक्षयेद्बलात् सवृद्धिं प्रतिदाप्यः स्यात् दण्डं चैव समाप्नुयात् तदेवा
यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् मूलमेव प्रदाप्यः स्याद्यदासौ धनवान्भवेत् व्याधितं व्यसनस्थं च ध
निकैर्वा प्रपीडितम् ज्ञात्वा निसृष्टं यत्पत्न्या दद्याद्यत्नेन कुर्यात् सः यत्स्त्रिया व्याधिव्यसनेप्वोमोचयितुं ध
नं निसृष्टं दत्तं तदात्मेच्छया तस्यै व दद्यात् अथ चेत्साद्विभार्यः स्यान्नैनां तां भजेत्पुनः प्रीत्या निसृष्टं चेत्प्र
तिदाप्यः स तद्बलात् ग्रासाच्छादनवासानामच्छेदो यत्र योषितः तत्र स्वमाददीत स्त्री विभागं रिक्थिनां
तथा लिखितस्येति धर्मोऽयं प्राप्ते भर्तृकुले वसेत् लिखितस्य महर्षेर्मतोऽयं धर्मः यदा भर्ता देयस्य स्त्री
धनस्य पुत्रनिविष्टस्यायं धर्मः प्राप्ते च धने स्त्री भर्तृकुले वसेत् नान्यत्र व्याधित प्रेत कार्ये तु गच्छेद्बन्धु
कुले ततः अपकारक्रियायुक्ता निर्लज्जा चार्थनाशिका व्यभिचाररता या च स्त्रीधनं सा च नार्हति यत्रार्थ

Indira Gandhi National
Centre for the Arts

दृष्यमुत्पन्नं तस्माद्दत्वं नियोजयेद्योषित् स्थानेषु धर्मनिष्ठेषु न स्त्रीधर्मेष्वपि धर्मेसु भर्त्रा प्रतिश्रुतं देयमृणा
वत्स्त्रीधनं सुतैः तिष्ठेद्भर्तृकुले या तु तथा पितृकुले वसेत् अधिवेदनविषयमाह अधिविन्नस्त्रियै देय
माधिवेदनिकं समम् न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम् यस्यां भार्यायां सत्यामन्या परिणी
यते सा अधिविन्ना सा चासौ स्त्री अधिविन्नस्त्री तस्यै आधिवेदनिकम् अधिवेदननिमित्तं अधि
विन्नेति कृत्वा यद्दीयते तदित्यर्थः तच्च समम् केनेत्यपेक्षिते प्रकृतत्वादधुना परिणीतायै यद्दत्तं तेने
ति गम्यते एतच्च यस्यै स्त्रीधनं न दत्तं तस्यै देयम् दत्ते तु तस्मिन्नर्द्धमेव देयम् न समम् अर्धशब्देन
न समत्वमविभागश्रुतिः एतच्च दत्ते स्त्रीधने तावद्दद्यात् यावदाधिवेदनिकसमं भवतीद
मर्थः विन्यासदसद्भावे विवादे तत्सद्भावनिर्णयकारणमाह विभागनिह्नवे ज्ञातिबन्धुसाक्ष्य
भिलेखितैः विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः नास्त्यावयोर्धनविभाग इति विभागस्य
निह्नवे पलापे ज्ञात्यादिभिः प्रमाणैस्तत्सद्भावनाविभागप्रतिपादना ज्ञेया तथा यौतकैः पृथ
गकृतैर्गृहक्षेत्रादिभिर्विभागभावना ज्ञेया ज्ञात्यादयः साक्ष्यादयः विभागे ज्ञातीनां साक्ष्यत्वात्



गृहक्षेत्रग्रहणं च शास्त्रान्तरोक्तविभागप्रमाणप्रदर्शनार्थम् नारदः दायग्रहणं पृथक्कल्पगृहक्षेत्रपरिग्र
हः विभक्तानां पृथक्क्रियाः पाकधर्मागमव्ययाः साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च विभक्ता भ्रा
तरः कुर्युर्नाविभक्ताः परस्परम् येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु विभक्तानवगच्छेयुर्लेख्य
मप्यन्तरेण तानिति बृहस्पतिः पृथगायव्ययधनाः कुसीदं च परस्परम् वणिक्पथं च ये कुर्युर्विभक्ता
स्तेन संशयः वणिक्पथो वाणिज्यं नारदः यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः पृथक्कर्म
गुणोपेता न चेत्कार्येषु सम्मताः स्वभागान्यदि दद्युस्ते विक्रीणीयुरथापि वा कुर्युर्यथेष्टं तत्सर्वं
मीशास्ते स्वधनस्य वै अस्यार्थः यदि भ्रातरः पृथक् परस्परानुमतिमन्तरेण धनसाध्यकर्मिणः यदि च
तथैव पृथक् स्ववित्तव्ययात्मककृष्यादिक्रियाकारिणः तथा च कर्मगुणो लाभः क्षयो वा तेनोपेताः
स्युः तथा कार्यान्तरेष्वपि पर्षद्ग्रामादिविषयेष्वपि विरुद्धास्तु विभक्ता इति ज्ञेयम् अथ ते स्वभा
वान्क्रियादिकम् यथेष्टं कुर्युः बृहस्पतिः येनांशो यादृशो भुक्तस्तस्य तं न विचालयेत् तथा स्व
त्वाहृतविभागो यः पुनरेव विसंवदेत् स राज्ञांशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृत् अनुबंध

Indira Gandhi National
Centre for the Arts

ऽग्रहः कात्यायनः वसेयुर्यदशाब्द्यानि यत्र धर्माः पत्न्यश्चियः विभक्ता भ्रातरस्ते च विज्ञेयाः पि
तृके धने तथा विभक्ता वा विभक्ता वा दायादाः स्थावरे समाः एको ह्यनीशः सर्वत्र दानाधाय
नविक्रये विभक्त धना अविभक्त धना वा दायादाः स्थावरे समा भवति तेषां मध्ये एकैको दाना
दौ समर्थो न भवतीत्यर्थः इति श्री विद्याधरवंशप्रभव श्री शिलाहार नरेन्द्र जीमूतवाहनान्वयप्र
सूत श्रीमदपरादित्यदेव विरचितेयाज्ञवल्की धर्मशास्त्र निबंधे दायविभाग प्रकरणं समाप्तम्॥
॥ॐ श्री गणेशाय नमः ॐ अथ सीमाविवादे निर्णय देतुनाह ॐ सोमो विवादे क्षेत्रस्य सा
मंताः स्थविरादयः गोपाः सीमाकर्षाणश्च ये चान्ये वन गोचराः नयेयुरेते सीमां तं स्थलांगा
रतुषद्रुमैः सेतुवल्मीक निम्नास्थि चैत्याद्यैरुपलक्षिताम् क्षेत्रस्य स्थावरस्य ग्रामरमादेः
सीम्नोमर्यादाया विवादे सामंताः समंतात्परितो नंतरग्रामादि भोक्तारो हि स्थावराद्याः ग्रा
दिप्रवेदनशास्त्रातरोक्ताः अन्येपि सीमा निर्णायकाः कथ्यंते गोपाः पशुपालाः सीमाकर्षाणाः
सीमायाः कर्षकाः आकारांतोपि सीमाशब्दोस्ति वनगोचरा वनो यजीविनः एते सर्वे स्थूलादि मि ॥१०१॥

र्निन्तै रूपलक्षितामवधन्तां सीमानं तद्विवादेन येयुर्निर्णयुः स्थलमुन्नता भूः निम्नं परिखा चैत्यः
संप्रतिपन्नक्षेत्र द्वयस्वामिक स्थितो लिंगविशेषः प्रसिद्धमन्यत् सीम्नो भेदानाहनारदः घजि
नी मत्स्यिनी चैव नैधानी भयवर्जिता राजशासननीता च सीमा पंचविधा स्मृता घजिनी वृक्षादि
लक्षिता मत्सिनी मत्स्यधारजललक्षिता नैधानी भूमध्यनिहित तुषांगारा दिकुंभोपलक्षिता॥
भयवर्जिता अर्थिप्रत्यर्थिकृतलिंगगम्या नृपेण सर्वाभावे स्वयं कल्पितेति वा राजशासनिका
राजाज्ञाकृतामनुः सीमां प्रतिसमुत्पन्ने विवादे ग्रामयोर्द्वयोः ज्येष्ठे मासि नयेदेतां सुप्रकाशेषु से
तुषु ग्रामशब्दः प्रदर्शनार्थः तेन जनपदयोः क्षेत्रयोर्गृहयोश्च मर्यादा विवादसंग्रहः एवं च
तुर्विध एव सीमा विवादो भवति ज्येष्ठ मास ग्रहणं तियमार्थम् किंतु लोकार्थ प्राप्तम् सुकरं हि
तदा सीमालिंग प्रदर्शनम् सेत्वादयः सीमां हेतवः निवेश काले कर्तव्यः सीमावध विनिश्च
यः प्रकाशोपांशु चिह्नैश्च लक्षितः संशयापहः निवेशो ग्रामादि प्रवेशारंभः सीमावंधः सीमा
नानिवंधनं नियामकम् उपांशुअप्रकाशकम् बृहस्पतिः कूपवापीतडाकं निचेसारम सुरा

लया: प्राकारविकृतान्येतानि सीमायां कारयेत्सदा निहितानि तथान्यानि यानि मन्येत मक्ष
येत् नारदः ग्रामेयत्सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम् गृहं गृहस्य निर्दिष्टं समंतात्परि
भावयेत् ग्रामादिपूर्वेग्रामादिषु ग्रामादिनोक्ता उपलक्षिता: समंततोयेउपलक्ष्यंते ता
न्सामंतान्विवादविषयस्य ग्रामस्य समंततः सर्वतः स्थितान् परिभावयेत् नन्वेकस्यामेव
दिशि स्थवि रादपायस्यादिप्रावेमान्येपि त्रास्तातरोक्ता कथ्यंते आधिक्यनूनतांवंपोग्र
स्ति नास्तित्वमेव वग्रभोगभुक्तिः सीमाचषड्वादसा हेतवः इति स्थावरस्य षड्प्रकार
ता तत्र कात्यायनः तेषामभावे सामंता मूलवृद्धतादयः स्थावरेषट्प्रकारेपिनात्रका
र्यविचारणा तेषामिति साक्षिभिर्निर्दिष्टा: अतएव मनुः यदि संशय एव स्याल्लिंगाना
मपि दर्शने साक्षिप्रत्यय एवस्यात् विवादे सीमनिर्णयः कात्यायनः तस्मिन्भोगः प्रयोक्त
व्यः सर्वैः साक्षिषु तिष्ठति लेख्याद्दृष्टः साक्षी मार्ग ब्रूयान्वितः मनुः मनु: ग्रामी
यककुलानां तु समक्षं सीमसाक्षिणः प्रष्टव्याः सीमलिंगानि तयोश्चैव विवादिनोः तेष्व ॥१७०२॥

ष्यास्तु यथा ब्रूयुः सामंताः सीमनिर्णयम् तथा तांचनिबध्नीयात्समस्तांतांश्च साक्षिणः सा
क्ष्यभावे तु चत्वारो ग्रामाः सीमांतवादिनः सीमाविनिर्णयं कुर्युःप्रयताराजसन्निधौ मौलाना
ह कात्यायनः येतत्र पूर्वसामंतायश्चाद्देशांतरंगताः तन्मूलत्वात्तु ते मौलाऋषिभिः परिकी
र्तिताः उद्धृतानपि सएवाह उपश्रवणसंभोगकार्याख्यानोपचिह्निताः उद्धरंतितोयस्मा
दुद्धृतास्ते ततः स्मृताः उपश्रवणं परस्परप्रसिद्धिः कार्याख्यानं तत्कर्म ग्रहणवार्त्ता उद्धृताद
यस्त्वत्रादिशब्देन येषां परिग्रहस्तेषां निर्देशं स्वयमेव करोति संसक्तास्त्वथ सामंतास्त
त्संसक्तास्त्वथोत्तराः संसक्तसक्तसक्ताश्च पद्माकाराः प्रकीर्तिताः क्षेत्रादेर्विप्रतिपन्न
सीमकस्य सर्वासु दिक्षु येऽनंतरं क्षेत्रादिभोक्तारस्ते संसक्ताः ये तु तदनंतरास्ते सामं
तायेपि तदनंतरास्ते संसक्तसंसक्ता तेषामपि येऽनंतरास्ते संसक्तसक्तसंसक्ताः ए
वं पद्माकाराः षोडशसंख्याका भवंति तथा सामंतभावे सामंतं कुर्यात् क्षेत्रादिनिर्णयम्
न सामान्तु च तथा तद्वन्नगरदेशयोः स्वार्थसिद्धौ प्रदुष्टेषु सामंतेष्वर्थगौरवात् तत्संसक्ते

कर्त्तव्य उद्धारो नात्र संशयः संसक्तसक्तदुष्टेषु तत्संसक्ताः प्रकीर्त्तिताः कर्त्तव्या न प्रदुष्टा
स्तुएसाधर्मविज्ञानता स्वस्कादुष्टास्तु सामंतानन्यान्मौलादिभिः सहसंमिश्रांकारयेत्सी
मामेवं धर्मविदो विदुः मौलादिमिश्रानन्यान्सीमाप्रतिनिर्णयप्रान्कारयेदित्यर्थः तथाः सा
मंताः साधनं पूर्वमनिष्टोक्तौ गुणान्विताः द्विगुणास्त्वत्तरा ज्ञेयास्ततोमेत्रिगुणामताः प्रति
वादिनः सामंतान्प्रतिप्रनिष्टोक्तौ दोषोद्भावने इत्यर्थः उत्तराः संसक्तादयः सामंतादीनाम
साक्षित्वेपि सीमालिंगानि वृक्षतुषादीनि प्रदर्श्य तांसीमानिर्णयकत्वमुपपद्यत्तेएव ताव
वहित तदभिस्तायघपिवृक्षादिस्वरूपमन्येपि जानीयुः तथाप्ययं वृक्षः सीमालिंगमयं नेति
विवेको न्येषां नास्ति तथात्र प्रदेशे तुषांगारादि निखातविद्यत्ते इति सामंतादिभिरेव प्राकं
ज्ञातुम् अत एव बृहस्पतिः करीषास्थितुषांगारभस्मकपालिकाः सिकतेष्टकगोवालुका
योसास्थीनि भस्म च प्रक्षिप्य कुंभेष्वेतानि सीमांतेषु निधापयेत् ततः पौगंडबालानां प्रदर्शये
न प्रदर्शयेत् वार्द्धके च शिशूनां तेदर्शयेयुस्तथैव च एवं परंपरासा ने सीमाभ्रांतिर्न जायते। य

॥१०३॥

तएवैषां लिंगप्रदर्शकत्वेन निश्चायकत्वमतएव यापनिरतयाव्याधशाकुनिकव्यालग्राहीप्रभृ
तीनां साक्षिभावानर्हाणामपि सपरिग्रहाः केचित्सन्ति सामंताः स्युः विराधागणाइति तस्मिन्पक्षे
गणप्राबल्येन ब्राह्मणादिसम्बन्धवाचिनो गणिनोलक्ष्यंते अस्तिबसीमितिनेषां प्रामाण्यम् यदा
ह नारदः क्षेत्रसीमाविवादेषु सामंतेभ्यो विनिश्चयः नगरग्रामगणो यो च वृद्धस्तमानग्रामसीमा
सु च बहिर्येष्सुस्तत्कपिनीविनः नयेयुः सीमानमिस्यतुहतो आह नारदः निम्नगापहृतोत्सृष्ट
निष्ठचिह्नासु भूमिषु तत्प्रदेशानुमानैश्च प्रमाणैर्भोगदर्शनैः बृहस्पतिः अन्यग्रामात्समाहृ
त्य दक्षान्यस्य पदा महीं अन्यथा न भवेच्छोभो नराणां राजदैविकः क्षयोदेशाद्वीवनं च राजव
श्रेन्नृणाम् तस्मात्सर्वेषु कार्येषु तत्कृतं न विचालयेत् ग्रामयोरुभयोर्यत्र मर्यादा कल्पि
ता नदी क्षयोदयेन बाध्यासा चालयन् दंडमर्हति कुरुते दानहरणं भागाभाग्यवधानसा
त् एकत्र कूलपातांतु भूमेरन्यत्र संस्थितिः नदी तीरं प्रकुरुते तत्स्थं तां न विचालयेत् क्षेत्रं
पस्य मुल्लंघ्य भूमिस्थिन्नायदा भवेत् नदी स्रोतः प्रवाहेहेण क्षेत्रस्वामी लभेत तां पूर्वस्वा

Indira Gandhi National
Centre for the Arts

स्यं वापकोऽलभेत यावत्सस्यमिति शेषः याएतान्क्रोधलोभेन वदत्यप्रत्ययेन वानृतामप्रहस्तान्य
स्यतुष्टेनन साक्ष्यद्विम वाप्नुयात् प्रमाणरहितां भूमिं भुंजतो यास्य पाहतागुणाधिकस्य दत्ताशातस्य
तांनैव चासयेत् बृहस्पतिः प्रापय्यैः श्रापिताः स्वैः स्वैः कर्मभिः सीम्नि विनिश्चयम् दर्शयेयुर्निधाना
नि तत्समाराणामिति स्थितिः निधानानि हितानि तुषांगारादीनि सीमलिंगानीत्यर्थः यत्र न संति सीमनिर्णय
समर्थाः साक्षिणः सामंताश्चैव न शक्नुवंति लिंगानि प्रदर्शयितुं तत्र कार्यमित्यपेक्षायां प्राह सामंता वा
समाग्रामाश्चत्वारोऽष्टौ दश वापि वा रक्तस्रक्समा सीमां नयेयुः क्षितिधारिणः विवादविषयीभूतस्य ग्रामा
देः समंतात्सर्वतो वर्तमाना ग्रामाद्यो ग्रामादिस्थाः पुरुषाः सामंतास्ते च समाः समसंख्याकाः ताम
वसमसांख्याः प्रदर्शयति चत्वारोऽष्टौ दश वापि वा अनेन द्वयोः पक्षयो चव्याकृतिः ते वै लोहितकुसुम
स्रग्विणो लोहितवसनाः क्षितिं लोष्टं च मूर्ध्नि साधारयंतश्च क्रम्यमाणाः सीमांतं नयेयुः निर्णयेयुः
मनुः शिरोभिस्ते गृहीत्वोर्वीं स्रग्विणो रक्तवाससः सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समंजसम् ना
रदः नैकः समुन्नयेत्सीमां नरः प्रत्ययवानपि गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता एकोऽप्युभ ॥१०४॥

येत्सीमां सोपवासः समुन्नयेत् कात्यायनः एकोऽप्युन्नयेत्सीमामुभयोरीप्सितः क्वचित् मतस्केहि
ति मारोप्य रक्तवासाः समाहितः बृहस्पतिः ज्ञात्वा चिह्नैर्विना साधुरेकोऽप्युभयसंमतः रक्तमाल्यां
बरधरो भूस्मादाय मूर्द्धनि सत्यव्रतः सोपवासः सीमांतं दर्शयेन्नरः ज्ञात्वा चिह्नैर्विना ज्ञातु भि
हूस्य चाभावइत्यर्थः मिथ्याकारिणां दंडमाह अन्नतुष्य परं प्रायज्ञाम मध्यमसाहसम् सामंता
दयोपदनं तं मिथ्याभूतं सीमानिर्णयं कुर्युः तदा मध्यमसाहसकार्षापणानां चत्वारिंशदधिकानि
पंचशतानि दंडनीयाः यत्तु कात्यायनेनोक्तम् बहूनां तु गृहीतानां न सर्वे निर्णयं यदि कुर्युर्भयाद्वा लो
भाद्वा दाप्यास्तूत्तमसाहसम् तदाशयदोषगौरवे सति द्रष्टव्यम् यद्यप्ययं तेनैवोक्तम् राज्ञाने नाहि
मुच्यंते सामंता निर्णयं प्रति अज्ञानोक्तौ दंड्याः स्यात्पुनः सीमां विचारयेत् कीर्तिते प्रतिभेदः स्याद्दं
डः स उत्तमसाहसम् इति तदपि कथितविषयम् नारदः शेषाश्चेदनृतं ब्रूयुर्नियुक्ता भूमिकर्मणि जघ
न्यास्तेपि प्रत्येकं विनेयुः पूर्वसाहसम् शेषाः सामंतेभ्यो जन्ये जघन्याभोलसंसक्तादयः पूर्वसाहसं
प्रथमसाहसम् तथागणाश्च ज्ञादयस्ते न्ये दंडनीयाः पृथक् पृथक् विनेयाः प्रथमेनैव साहसेनान्ते

Indira Gandhi National
Centre for the Arts

या गणाश्च वृद्धा व यश्च ते गणवृद्धादयः आदिशब्देन मौलोद्धृतनराणामागमन्ते एते
च साक्षिधर्ममतिक्रामंतः प्रथमसाहसं दंडनीयाः अनृतं त्वं मिथ्या त्वं च तेषां सीमलिंगानां
निखातानामप्रदर्शने स्थलवृक्षादीनां चान्यथादर्शने वेदितव्यम् कात्यायनः सीमाचंक्र
मणे कोशे पादस्पर्शे तथैव च त्रिपक्षपक्षं स साहं देवराजकमिष्यते इति लिंगानां ल
क्षणां चाभावे यत्कार्यं तदाह अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तकः ज्ञातृणां सा
क्षिसामंतादीनां चिह्नानां स्थलवृक्षादीनां चासंभवे राजैव स्वातंत्र्येण सीमानं प्रवर्त
येत् नारदः यदा च न स्युर्ज्ञातारः सीमायां न च लक्षणम् तदा राजा द्वयोः सीमामुन्नयेदि
ष्टतः स्वयम् इष्टतः इच्छया तदा पुनर्विवादविषयीभूतां सीमानं भिरेकस्य क्षेत्रादेरसंतोष
कारिका तया विना तद्ग्रामादि न भवं स्यात् इतरस्य तु न तथा तथाह मनुः सीमायामविष
ह्यायां स्वयं राजैव धर्मवित् प्रदिशेद्भूमिमेकेषामुपकारादिति स्थितिः अविषह्यायां ज्ञात्
लोपकस्त्वाप्रविष्टो स्वेप्सायोदिलर्पः उपकारात् उपकारहेतोः उक्तं क्षेत्रसीम्नो निर्णा ॥१०५॥

यकारणं तदेवान्येषामप्याराम्यादीनां सीमनिर्णयकारणमाह आरामायतन
ग्रामनिपानोद्यानवेश्मसु एष एव विधिर्ज्ञेयो वर्षांबुप्रवहादिषु आरामादिषु सीमा
विवादविषयेषु अयमेव साक्षिसामंतादिको विधिर्निर्णयविधायको ज्ञेयः वर्षाप्रभावजलप्र
वाहमर्यादविवादेष्वप्येष एव विधिः आराम आम्रादिवनं आयतनं देवालयः उद्यानं क्रीडावनं प्रसिद्ध
मन्यत् आदिशब्दः सर्वेषामेवभूमर्यादाविवादानामुपसंग्रहार्थः अत एव बृहस्पतिः सर्वस्मिन्स्थाव
रे वादे विधिरेष प्रकीर्तितः तथा निवेशकालादारभ्य गृहवाटीपणादिकम् येन यावद्यथा भुक्तं तस्य तं
न विचालयेत् वातायनप्रणालीस्तु तथा निर्यूहवेदिकाः चतुःशालस्यंदनिकाः प्राक्प्रविष्टा न चाल
येत् वातायनं गवाक्षः काष्ठादियोजलनिर्गमनोपायः प्रणाली निर्यूहो द्वारनिर्गतः काष्ठविशेषः गृहस्यो
णीति यावत् वेदिका प्रागनादिन्यः चतुःशालं चतुर्द्वारं गृहस्यंदिका पटलप्रांते कात्यायनः मेखला
भ्रमनिष्कासगवाक्षान्नोपधारयेत् प्रणालीं गृहवास्तु च पीडनं दंडभाग्भवेत् निवेशनमर्यादूर्ध्वं नेते
ऽज्याः कदाचन दृष्टपातं प्रणालं च न कुर्यात्परवेश्मसु मेखलाकुड्यमूलबंधः भ्रमो मलनिर्गमः नि

Indira Gandhi National
Centre for the Arts

कासोहर्म्यादिभित्तिषु निर्गतं काष्ठादिनिर्मितं मस्पष्टभूमिकमुपवेशनस्थानं नोपधारयेत् न
नेहंध्यात् गृहवास्तुः वासभूमि दृष्टिपातो गवाक्षः बृहस्पतिः वर्चःस्थानं वह्निमयं गर्त्तोच्छ्रितं भुसे
वन अत्यरुकुअस्य न कर्त्तव्यं कदाचन वर्चः पुरीषं गर्त्तः भुग्नं अरत्यरत्निसमीपे कात्यायनवि
एमूत्रोदकं चक्रं च वह्निश्च तत्र निवेशनम् अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् बृहस्पतिः
यांत्यापांति यन्नायेचापथाचक्रानिवारिताः तदुच्यंते संसरणं नरोरुध्यं तु केनचित् यस्तत्र संकरं
श्वभ्रं च द्वारोपरोधमेव च कामात् कुर्यात् तस्य दंडस्तु माषकः मनुः समुत्सृजेद्राजमार्गेय
स्त्वमेध्यमनायदि स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत् आपद्गतोथवा वृद्धो गर्भिणी वाल
एव वा परिभाषणमर्हंति न त्वशोध्यमिति स्थितिः परिभाषणं धिग्दंडः कात्यायनः ताडागोद्यान
तीर्थानि योमेध्येन विनाशयेत् अमेध्यं शोधयित्वा तु दंडयेत् पूर्वसाहसम् दूषयेत्सिद्धतीर्थानि स्थापि
तानि महात्मभिः पुण्यानि यावनीयानि दंडयेत् पूर्वसाहसं मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा क्षेत्र
स्य हरणे दंडः अधमोत्तममध्यमाः क्षेत्रादिसीम्नोल्लापकं सेत्वादिकं मर्यादा तस्याः प्रभेदे विनाशे सी
मातिक्रमे रोक्षेत्रस्यापहारे यथाक्रममधमोत्तममध्यमदंडो भवति एतच्च प्रदर्शनार्थम्



तेनापराधनृपस्त्वापेक्ष्य यावधः सर्वस्वहरणं पुरान्निर्वासनांकने इत्यादि प्राप्ता
न्तरं पर्यालोच्य दंडांतरमधिकोपि भवति मनुः गृहं तडागमारामं क्षेत्रं वा भीषया हरन्
शतानि पंच दंड्यः स्यादज्ञानाद्द्विशतो दमः इह मनुः स्थापितां चैव मर्यादामुभयोर्ग्रा
मयोस्तथा अतिक्रामंति ये पापास्ते दंड्या द्विशतं दनम् कात्यायनः सीमामध्ये तु जाता
नां वृक्षाणां क्षेत्रयोः फलपुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत् अन्यक्षेत्रेषु जातानां
शाखा यत्रान्यसंस्थिताः स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संस्थिताः संस्थिता उत्पन्नाः किं
च न निषेध्योल्पवाधस्तु सेतुः कल्याणकारकः परभूमिहरन्कूपः स्वल्पक्षेत्रो वहूद
कः स्वक्षेत्रे परे साक्षिप्रमाणः सेतुरल्पस्यापकारस्य महत उपकारस्य हेतुर्न निवार्यः
तथा यस्य भूमिस्वल्पक्षेत्रः स्वल्पापनोवहूदकश्च कूपापहरेत् सोपि तेन न निषे
ध्यः विपरीतौ तु सेतुकूपौ निषेध्यावेव किंच स्वामिनो विनिवेधेव क्षेत्रे सेतु प्रवर्त्तये
त् उत्पन्ने स्वामिनो भागस्तदभावे महीपतेः यस्तु क्षेत्रस्वामिनमनुज्ञाप्य तत्क्षेत्रे से

Indira Gandhi National
Centre for the Arts

॥दिकरोति ततस्य फलोपभोगं दृष्टम दृष्टवान लभ्यते किंतु क्षेत्रस्वाम्येव लभते तदाहा
वीराज्ञा नारदः सेतुस्तु द्विविधो ज्ञेयः खेयो बध्यस्तथैव च तोयप्रवर्तनात् खेयो बध्यः स्याद्वि
निवर्तनात् क्षेत्रात्तोयं प्रवर्तयितुं सेतुः स खेयः क्षेत्रे एव तोयं धारयितुं क्रियते स बध्यः नांतरेणोद
कं सस्यनाशः स्यात् सुदके सतिनियत्यानुदके दोषः स एवासुदके भवेत् पूर्ववृत्तमुत्सन्नमपृष्ट्वा स्वामि
नं तु यः सेतुं प्रवर्तयेत् कश्चिन्न स तत्फलभाग्भवेत् मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे राजानं
मामंत्र्य मनुविद्धाति अनुदर्शनं निदर्शनम् तस्य मध्यगमार्जन्यस्य तात्पर्यः कात्यायनः अस्वाम्यनुम
ते नैव संस्कारं कुरुते तु यः गृहोद्यानतडागानां संस्कर्ता लभते न तु देयं स्वामिनि चायाते जनिवे
द्यन्व्ययादि अथा चेद्यप्रयुक्तस्तु तत्कृतं लभते फलम् प्रसंगात् क्षेत्रविषयं किंचिदाह फलाहत
मपि क्षेत्रं यो न कुर्यान्न कारयेत् तं प्रदाप्याकृष्टफलं क्षेत्रमन्येन कारयेत् यः क्षेत्रं फलाहतं कृष्ट
मपि न कुर्यात् तत्र क्षेत्रे बीजवाप्यादि न कुर्यात् नापि कारयेत् तं कर्षीवलं कृष्टफलं प्रदाप्य अन्ये
न कर्षीवलेन क्षेत्रं कारयेत् फलदः क्षेत्रस्य फलं अकृष्टक्षेत्रस्य शादः अकृष्टशादः अकृष्टेऽपि क्षेत्रे



॥अदाप्य क्षेत्रमन्यस्यार्पयेदित्यर्थः भासः क्षेत्रं गृहीत्वा यः कश्चिन्न कुर्यान्न च कारयेत् स्वामि
ने स प्रदाप्यो राज्ञा दंडं च तत्समम् तत्समं तस्य क्षेत्रस्य दशानुरूपमित्यर्थः ज्ञदेवसाद्रूप्यं दर्श
यति विरावसन्ने दशमं कृष्यमानो तथाष्टमम् सुसंस्कृते तु षष्ठं स्यात् परिकल्प्य यथास्थितिः चि
रावसन्ने चिरकालं संतिष्ठे क्षेत्रे पूर्वोक्ते निमित्ते सति क्षेत्रफलस्य दशमं भागं दद्यान्नीयकृष्य
मा मे वर्तमाने विलेख



Indira Gandhi National
Centre for the Arts

नेतु क्षेत्रे अष्टमम् सुसंस्कृते तु षष्ठमिति। नारदः असक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः॥ क्षेत्रं चेद्विक
र्षेत्कश्चिदश्नुवीत स तत्फलम्॥ विकृष्यमाणे क्षेत्रे तु क्षेत्रिकः पुनराव्रजेत्। खिलोपचारं तत्सर्वं दत्वा
क्षेत्रमवाप्नुयात्। खिलं दुष्कर्षं क्षेत्रं तदष्टभागापचयाद्यावत्सप्त गताः समाः संप्राप्ते त्वष्टमे वर्षे
भुक्तं क्षेत्रं लभेत सः। अस्यार्थः कात्यायन आह। अशक्तितो न दद्याच्चेत् खिलार्थं च व्ययम्॥ तदष्ट
भागहीनं तु कार्षिकः फलमाप्नुयात्॥ वर्षाण्यष्टौ स भोक्ता स्यात्ततः स्वामिने तु तत्। क्षेत्रस्वामी।
कार्षिकाय खिलव्ययं निर्धन इति कृत्वा न ददाति तदा कार्षिकः क्षेत्रफलस्याष्टमं भागमष्टौ वर्षा
णि यावत्स्वामिने दद्यात्। तत ऊर्ध्वं स्वाम्येव क्षेत्रफलं लभत इत्यर्थः। नारदः संवत्सरेणार्धखि
लं खिलं स्याद्वत्सरैस्त्रिभिः पंचवर्षावसक्तं तु क्षेत्रं स्यादटवीसमम्॥ कृषिं विना संवत्सरेणार्ध
खिलं भवति यत्नसाध्यं भवतीत्यर्थः एवं त्रिभिर्वर्षैः खिलं महायत्नसाध्यं भवतीत्यर्थः पंचवर्षो
पेक्षितं क्षेत्रमटवीतुल्यं स्यात्। ततश्चैवं कुर्वतः कार्षकस्यापराधानुरूपं राज्ञे स्वामिने च तेन देयम्
क्षेत्रं त्रिपुरुषं यस्य गृहं वा स्यात्क्रमागतम्॥ राजप्रसादादन्यत्र न तद्भोगः परं नयेत्। त्रिपुरुषापा

तो भागो राजप्रसादकृतान्यो गृहादेः परभोग्यतां निवारयति इति सीमाविवादप्रकरणम्॥ ॥
क्षेत्रे परापराधे दंड प्रसंगात् सस्यापराधे दंडमाह॥ माषानष्टौ तु महिषी परसस्योपघातिनी दंड
नीया तदर्धं तु गौस्तदर्धमजाविकम्। भक्षणमर्दनाभ्यां परसस्योपघातिनी महिषी महिषो वा
माषानष्टौ दंड्यः स्यात् गौश्चतुरो माषान् अजाविकौ द्वौ द्वौ माषौ पशूनां निर्दिष्टेन स्वेनायो
ग्यत्वात् स्वामिनामयं लक्षणया दंडविधिः कार्षापणस्य विंशो भागो माषः भक्षयित्वोपवि
ष्टानां यथोक्ताद् द्विगुणो दमः समम एषां विवीतेपि खरोष्ट्रं महिषीसमम्॥ येषां शवः सस्यं भ
क्षयित्वा तत्रैवोपविशति तेषां प्रातिस्विकाद् दंडात् द्विगुणो दंडो भवति॥ यः सस्योपघाते म
हिष्यादीनां दंड उक्तः स एव विवीतोपघातेपि वेदितव्यः तृणाद्यर्थमावृतो भूमिभागो वि
वीतम्॥ खरउष्ट्रश्च महिष्यातुल्यदंडः मनुः क्षेत्रेष्वन्येषु तु पशुः सपादं दंडमर्हति सर्वत्र
तु सदो देयः क्षेत्रिकस्येति धारणा अस्यार्थः येषु क्षेत्रेषु कृतापराधा अपि पशवो न दंड
नीया इति मनुनोक्ताः ततोन्येषु क्षेत्रेषु कृतापराधः पशुः सपादं कार्षापणं दंडमर्हतीति। ॥१०६॥

एतन्मतिपूर्वके महति चापराधे द्रष्टव्यम् सर्वेषु च यथापराधेषु शब्दः क्षेत्रफलं यावद्विहतं तावत्ता
का वत् क्षेत्रिये देयम् दंडं प्राप्नुयादिस नुवृत्तौ शंखलिखितौ रात्रौ चरतां गोः पंच माषान् दिवा रा
त्रीन् मुहूर्तमासंग्यासेत् दंडः सर्वेषामेव वत्सो माषम् महिषी दशखरो षष्ठो षोडश अजाविकं
चतुरः नारदः गावः पादं प्रदाप्यास्तु महिष्यो द्विगुणं ततः अजाविके सवत्से तु माषो दंडः परः स्
रतः सन्नानां द्विगुणो दंडो वसतां च चतुर्गुणः प्रसह्याचारकाणां तु चौरवद्दंडः स्मृतो बुधैः वि
ष्णुः महिषी चेत्सस्यनाशं कुर्यात् स्वपालकस्त्वष्टौ माषान् दंड्यः अपालकायाः स्वामी अश्वस्त
थोगर्दभो वा गौश्चेत्तदर्धम् तदर्धमजाविके उक्तो दंडः क्षेत्रस्वामिनोपदेयं पशुपालस्य च
मत्कार्यं तदिदानीमाह॥ यावत्सस्यं विनाश्येत तावत् क्षेत्री फलं लभेत् पाल्यस्ताड्योथ गोमी तु पू
र्वोक्तं दंडमर्हति अपक्षघातिनः प्राज्ञाः सामंतायावत्सस्यं विनष्टं परिभाष्य तत्स्युस्तावत् क्षेत्रिणे
गोमी दद्यात्॥ एतद्विच पूर्वोक्तं दंडं गोमी स्वामी गोशब्दः पशुमात्रोपलक्षणार्थः पशुपालश्च ता
कषादिना ताडनीयः नारदः गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते सामंतानुमतं देयं धान्यं

मतस्त्रवीपितम्॥ गोजग्धं गोभिनादेयं धान्यं वै कार्षिकस्ततत्॥ एवं हि विनयः प्रोक्तो गवां सस्या
वमर्दने॥ यत्तु पुनस्तोकं॥ गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते॥ पितरस्तस्य नाश्नंति नाश्नं
ति त्रिदिवौकस इति॥ तत्स्त्रीगवीविहितं विषयम्॥ उक्तस्य दंडस्य विषयविशेषेऽपवादमाह॥
पथि ग्रामविवीतांतक्षेत्रे दोषो न विद्यत इति॥ अकामतः कामचारे चोरवद्दंडमर्हति। पथो ग्रा
मस्य विवीतस्य चांते समीपे यत् क्षेत्रं तत्र पशुभिरकामतः सस्ये विहन्यमाने पशुस्वामी पालयो
र्दोषो न विद्यते॥ ततश्च दशदंडयो र्निनं गोपस्य चताडनं नास्ति॥ कामतस्तु पशुचारणे चोरवद्दं
डः दोषाभावश्च वृतावसत्याम् नारदः ग्रामोपांते तु यत् क्षेत्रं विवीतांते महापथि अनावृते चेत्त
न्नाशे न पालस्य व्यतिक्रमः वृतिं तत्र प्रकुर्वीत यामुष्ट्रो नावलोकयेत्॥ छिद्रं च कारयेत्तत्र श्वसू
करमुखानुगम् नारदः पथि क्षेत्रे वृतिकार्या यामुष्ट्रो नावलोकयेत् न लंघयेत्पशुर्नाश्वो न भिं
द्याद्यो च सूकरः कात्यायनः अजातेष्वेव सस्येषु कुर्यादावरणं महत्॥ दुःखेन हि निवार्यंते लघ
स्वादु रसाम्लगाः मनुः पथि क्षेत्रे परिवृते ग्रामांतेऽथवा पुनः सपालः शतदंडार्हो विफलं वारये ॥११०॥

२

६

सपशुम्॥ पथ्यादिक्षेत्रं मदिपरिवृतं गोपालसहितः पशुर्यदि हन्यात्॥ तदा शतदंडार्हः पशुरपाल
श्चेद्वारयितव्य इत्यर्थः नारदः उक्रम्य तु वृतिं यः स्यात्तस्य घातो गवादिभिः पाल्यः शास्यो भ
वेत्तत्र न चेत् शक्यानिवारयेत् पशुविशेषेऽपवादमाह। महोक्षोत्सृष्टपशवः सूतिकाग
तुकादयः पाल्या येषां च ते मोच्या राजदैवपरिप्लुताः महोक्षादयः सस्यापराधेऽपि न दंड्याः
महांश्च। सा वृष्भमहोक्षः यः सर्वासां गवां गर्भाधानाय धृतः उत्सृष्टः देवताद्यर्थं यथावत्
स्वामिना परित्यक्तः पशवो गवादयः सूतिका नवप्रसूतिका दशरात्रं यावत् आगंतुकः पा
लरहितो ग्रामांतरादागतः येच पशवो राज्ञापराद्धग्राहिणा दैवेन व्याध्यादिना परिप्लुताः उ
पद्रुतास्ते सगोपा पथि मोच्याः आदिशब्दः शास्त्रांतरोक्तसंग्रहार्थः दुशनाः अदंड्या हस्ति
नोश्वाश्च प्रजापालहिते स्मृताः अदंड्याः काणकुंठाश्च सथक्कस्तलक्षणाः अदंड्या आगंतु
की गौश्च सूतिका चातिसारिणा॥ अदंड्याश्चोत्सवे गावः श्राद्धकाले तथैव च॥ प्रजापालाहि
तिवचनाद्राजकीयानामेव हस्त्यादीनामदंडता गोमंडलात्प्रच्युतात्तदभिगामिनी अभिसारि

Indira Gandhi National
Centre for the Arts

दशार

णी मनुः अनिर्दशाहां गां सूतां वृषान्देवपशूंस्तथा सपालान्वा विपालान्वा अदंड्यान्मनुरब्रवीत्
नारदः गोऽजाश्वतां हंतुमहोक्षो वाजिकुंजरौ निवार्याः सुप्रयत्नेन ते षां स्वामी न दंडभाक् तथा राज
ग्राहगृहीतो वा वज्राशनिहतोपि वा अथ सर्पेण वा दष्टो वृक्षाद्वा पतितो भवेत्॥ व्याघ्रादिभिर्ह
तो वापि व्याधितो वाप्युपद्रुतः न तत्र दोषः पालस्य न च दंडोस्ति गोमिनाम्॥ अधमोत्तममध्यमा
नां पशूनां चैव ताडने स्वामी तु विवादे यत्र तत्र दंडं न कल्पयेत्॥ पशूनां स्वामिपालयोर्विवा
दं प्रस्ताह। यथार्पितान्पशून्गोपः सायं प्रत्यर्पयेत्तथा प्रमादमृतनष्टांश्च प्रदाप्यकृतवेत
नः यथा प्रातः काले स्वामिना परिगणिताः पशुपः पशुपालायार्प्यंते तथैव तेन सायं प्रत्य
र्पणीयाः तत्र पारगोपस्योपेक्षायां यांतो म्रियते नश्यंति वा। तदा तावतो गवादीन्पशून्कृ
तवेतनो विहितभृतिः गोपालः स्वामिने राज्ञा प्रदाप्यः तद्वेतनं मनुराह॥ गोपः क्षीरभृतो
यस्तु स दुह्याद्दशतो वरां॥ गोस्वाम्यनुमतो भृत्यः सा स्यात्पाले भृते भृतिः यः पशूनां गो
पा क्षीरधृतः क्षीरमल्पः सदर्शतो दशानां गवादीनां मध्याद्वरां मुत्कृष्टामेकां गोस्वाम्यनु



मतो भृत्य इति। आत्मार्थं दुह्यात् सैव पशुपालप्रकारांतरेण भृतो भृतिमूल्यं स्यात्॥ ना
रदः गवां शताद्वत्सरी धेनुः स्याद्द्विशतिर्भृतिः प्रतिसंवत्सरं गोपे संदोहश्चाष्टमेहनि संदोहः स
र्वदोहः तथा धेनुभृतः क्षीरं लभेताष्टमे खिलम्॥ मनुः विघुष्य तु हृतं चौरैर्न पालस्तत्र किल्बि
षी॥ यदि देशे च काले च स्वामिनः स्वस्य शंसति तथा दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृ
हे योगक्षेमान्यथा चेत्तु पालो वक्तव्यतामियात्॥ किल्बिषमपराधः वक्तव्यताप्यपराध एव॥
व्यासः पालगृहे ग्रासघाते तथा राष्ट्रस्य विभ्रमे मरणे च हृतं वा स्यात् पालस्तत्र न किल्बिषी॥ पा
लदोषविनाशे तु पाले दंडो विधीयते॥ अर्धत्रयोदशपणः स्वामिने द्रव्यमेव च॥ पालस्य शक्य
रक्षणे पालेप्युपेक्षणं वेत्॥ तेन दोषेण पशुविनाशोन्यसति अर्धत्रयोदशपणः पाले विनय
दंडो विधेयः विनष्टपशुमूल्यं द्रव्यं स्वामिने पि दापनीयं त्रयोदशानां पूरणस्त्रयोदशः सार्ध
मेषां ते अर्धत्रयोदशाः पणा यस्मिन्दंडे सोर्धत्रयोदशपणो दंडः॥ सार्धद्वादशपणं इति याव
त् स्याच्चेज्ज्ञो गोपो व्यामकेत्तत्र शक्तितः अशक्तस्तु गोमागस्य स्वामिने तन्निवेदयेत् अव्याम

Indira Gandhi National
Centre for the Arts

छन्नविक्रीणश्च स्वामिने चानिवेदयन्॥ वोढुमर्हति गोवत्सान् विनयं चैव राजनि व्यायच्छेद्व्यसननिरासा
य प्रवर्तेत। व्यसननिरासासमर्थस्तु स्वामिने निवेदयेत्। आक्रोशे ह्याह मनुः। नष्टं विनष्टं कृमिभिः श्वहतं वि
षमे मृतम्॥ हीनं पुरुषकारेण प्रदद्यात्पाल एव तत्॥ मृत्युकारणेनेति शेषः नाशः अदर्शनम्। तथा
अजाविके तु संरुद्धे वृकैः पाले त्वनायति। यां प्रसह्य वृको हन्यात् पाले तत्किल्बिषं भवेत्॥ तासां चेदवरु
द्धानां चरंतीनां मिथो वने। यामुत्प्लुत्य वृको हन्यान्न पालस्तत्र किल्बिषी॥ नारदः अनेन सर्वपालानां
विवादः समुदाहृतः॥ मृतेषु च विशुद्धिः स्यात् वालशृंगादिदर्शनात्॥ ग्रामेच्छया गोप्रचारो भूमिराज
वशेन वा। द्विजस्तृणैधपुष्पाणि सर्वतः समुदाहरेत्॥ ग्रामवर्जिजनेच्छया भूमेश्चाल्पमहत्त्ववशाद्रा
जवशाद्वा गवादीनां पशूनां प्रचारार्थो भूः स्यात्। तृणाद्युपव्यवहारे वा प्राचारः तथा द्विजातिस्तृणा
नि। इंधनानि पुष्पाणि च सर्वतः परिगृहीतादपि भूभागादुपाहरेत्॥ गोतमः गोऽग्न्यर्थे तृणमेधा
न् वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत॥ फलानि चापरिवृतानाम् स्वत्वदिति वचनादुपाददान
स्वामिना न बोध्यः एतच्चापदि प्रियतुस्य संतरम्॥ तृणं वा मद्विका काष्ठं पुष्पं वा यदि वा फलम्॥ अनाप

॥११२॥

च्छंस्तु गृह्णानो हस्तच्छेदनमर्हतीति। तदनापद्वत्तभङ्गादिविषयम्॥ भूमिवर्त्मनो गोप्रचारो भव
तीति यदुक्तं तद्व्यवस्थापयति। धनुःशतं परीहारो ग्रामे क्षेत्रांतरं भवेत्। द्वे शते कर्वटस्य स्यान्नग
रस्य चतुःशतम्। ग्रामो गृहीतवान् भूस्तस्य तत्संबंधिक्षेत्राणां चांतरं धनुःशतपरिमाणं परिहारः
परिहर्तं कृष्यादिकं भवेदित्यर्थः कर्वटस्य परीक्षाहारस्तु धनुःशतद्वयम्। नागरस्य पुनर्धनुषां च
तुःशतम्। ग्रामादधिकः नगरान्न्यूनो गृहसमूहः कर्वटः धमनुः धनुःशतपरीहारो ग्रामस्य स्यात्स
मंततः शम्यापातास्त्रयो वापि त्रिगुणो नगरस्य तु। युगे वर्तमानस्य बलीवर्दस्य नियामकः काष्ठ
कीलकः शम्या सा प्रस्यायावंतं भूभागं व्यतीत्य पतति सा शम्यापातः इति स्वामिपालप्रकरणम्॥ अथस्वा
म्यविक्रयविवादं प्रस्ताह॥ स्वं लभेतान्यविक्रीतं क्रेतुर्दोषो प्रकाशिते॥ हीनाद्रहो हीनमूल्ये वेलाही
ने च तस्करः॥ अस्वामिना गोभूम्या विक्रेतुर्दंडविशेषमाह॥ हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नु
यात्। अनिवेद्य नृपे दंड्यः स तु षण्णवतिकान् पणान्॥ यः स्वकीयं धनं हृतं प्रणष्टं च राजनि अनिवेद्य
वतस्य हस्तात् गृह्णीयात् स राज्ञा षण्णवतिकान् पणान् दंडनीयः प्रसंगादन्यदप्याह॥ शौल्कि

Indira Gandhi National
Centre for the Arts

दिक्रेक्रीतं तद्घस्यस्वंसक्रेतुः सकाशाल्लभेत् क्रेतुश्चविक्रेतारमप्रकाशयतोदोषश्चौर्यंस्यात्॥ ततश्चौरं
वरस्परं ज्ञोभवति। तथाहीनास एषसंभवहीनात्॥ रहो रहसिविजनेदेशे हीनम ल्ये स ल्पम ल्येच
प एपेवेलाहीनेविक्रयेवेलारहितेषएप एवंक्रेतातस्करः स्यात्॥ तस्करंदण्डभाक्स्यादित्यर्थः ज्ञा
नातिह्यासौक्रयात्प्रागेवचौरएविलाष्मिदंक्रीणीतइति नारदः निक्षिप्तंवापरद्रव्यंनष्टंलब्ध्वापहृस
वा विक्रीयतेसमक्षंयत्स ज्ञेयोस्वामिविक्रयः व्यासः याचितान्वाहितन्यासंकृत्वाचान्यस्यधनम्॥
विक्रीयतेस्वामिभावेस ज्ञेयोस्वामिविक्रयः निक्षिप्तान्वाहितन्यासंहृत्याचितबंधकम् उपांशुयेन
विक्रीतमस्वामीसोनिधीयते॥ पूर्वस्वामीतुतद्द्रव्यंपदागत्यविधारयेत् तत्रमूल्यंदर्शनीयं क्रेतुःशु
द्धिस्ततोभवेत् नारदः अस्वाम्यनुमताद्दासादसतश्चजनाग्रहः हीनम ल्यमवेलायांक्रीणंस्तद्दो
षभागभवेत्॥ बृहस्पतिः अविज्ञाताश्रयात्क्रीतंविक्रेतापात्रवाम्ततः स्वामीदत्वार्धम ल्यंतु प्रगृह्णीत
स्वकंधनम् अर्द्धंद्वयोरपहृतंतत्रस्याद्व्यवहारतः अविज्ञातक्रयोदोषस्तथाचापरिपालनम्। एत
द्द्वयंसमाख्यातंद्रव्यहानिकरंबुधैः अविज्ञाताश्रयात्विशत्तस्यानात् विक्रेतुर्यत्क्रीतं यदा ज्ञात ॥११३॥

स्थानोपि विक्रेतापरिमृतः तदास्वामिनाम ल्याद्धंक्रेत्रेदत्वास्वधनंग्राह्यम् अस्मिन्विषयेस्वामिनःक्रेतु
श्चार्द्धहानिः द्वयोरप्यपराधित्वादिति। अत्रमतंचिषणी। गवीर्थापरिगतंविज्ञातंराजपूरुषैः दिवागृही
तंयत्क्रेत्रासशुद्धोलभतेधनम्। अविज्ञातनिवेशित्वघत्रम ल्यंनलभ्यते हानिस्तत्रसमाकल्प्याक्रेत्
नास्तिकयोर्द्वयोः नष्टापहृतमासाद्यहर्तारंग्राहयेन्नरम् देशकालातिपत्तौवागृहीत्वा स्वयम
र्पयेत्॥ स्वकीयंद्रव्यं। नष्टमपहृतंवासाद्योपलभ्यतस्यहर्तारंराजग्राहयेत् विधारयेत् देशका
लातिपत्तौराज्ञाग्रहणेक्रियमाणेयदिदेशमतीसाहर्तानयति। कालात्ययेवापहृतंद्रव्यंव्ययेति
तदास्वयमपहर्तारंगृहीत्वा राज्ञेर्पयेत् गृहीतेनयत्कार्यंतदाह। विक्रेतुर्दर्शनात्शुद्धिःस्वामीद्र
व्यंन्टपेदमं। क्रेताम ल्यमवाप्नोति तस्माद्यस्तस्यविक्रयी विक्रेतरिप्रदर्शितेतुशुद्धिरदुष्टत्वास्या
त्॥ तत्रस्वामीविक्रीतंधनंस्वामीलभेततथाविक्रेतुः सकाशान्नृपोदंडंक्रेताचम ल्यमवा
प्नोति कात्यायनः प्रकाशंवाक्रयंकुर्यान्म ल्यंवापिसमर्पयेत्॥ म ल्यानयनकालश्चदेयोयो
जनसंख्यया॥ मूल्यंविक्रेतादेशविप्रकर्षापेक्षपेसर्थः मनुः अथम ल्यमनाहार्यंप्रकाशंक्रय

Indira Gandhi National
Centre for the Arts

८१· प्रोषितम्॥ अदं गोमुच्यते राज्ञा नास्तिको लभते धनम्॥ मूलं विक्रेतृ स्वाला ज्ञापमाने देशाद्वारना
हार्यः ध्यासः मूले समानेतुं केता नाभियोज्यं कथं चन मूलेन सह वादस्तु नास्तिकस्य तदा भवेत् ना
स्तिकाद्द्रव्यस्वामी तत्र स्वामी विक्रेतृ विवादे स्वामिना स्वधनं प्राप्तयेयत्कर्तव्यं तदाह। आगमेनोपभो
गेन च द्रव्यमतोन्यथा पंचबंधो दमस्तत्र राज्ञस्तेनाविभाविते। नास्ति केन विवादं स्यद्धनं क्रिया
दिना गमेन भुक्त्या वा तमता भाग्यं न नयेत दानविक्रयादिना न्यस्य स्वं कृतं। किंतु न स्वमेवैतदिति भाव्य
म्। अतोन्यथा यथोक्तप्रकारेण नास्तिकेन भाविते। तदा राज्ञे पंचबंधो दमस्तेन देयः विवादास्पदधन
पंचभागसंमितो धनभागो यत्र बध्यते स पंचबंधः आगमोपभोगो न्यायाश्च ज्ञातिभिः साध्यः यदाहका
सायनः। नास्तिकस्तु प्रकुर्वीत धनं ज्ञातिभिः स्वकं अदत्तं स्वकविक्रीतं कृत्वा स्वं लभते धनम्॥ यदि स्वं नैव
कुर्वीत ज्ञातिभिर्नास्ति को धनम्॥ प्रसंगविनिवृत्त्यर्थं चौरवद्दण्डमर्हति प्रसंगो भिमाय: तथा अभियो
क्ता धनं कुर्यात् स्वयमं ज्ञातिभिः स्वकम्। पश्चादात्मविशुद्ध्यर्थं क्रमं केता स्वबंधुभिः अभियोक्ता नास्तिकः
तेन ज्ञातिभिः स्वकीयत्वं धनस्य साध्यम्। न चेत्स तु मात्तथा कर्तुं तदा केता आत्मनो दोषपरिहारार्थं स्वबंधुभिः ॥११४॥

६

साक्षिभिस्तैः क्रयं साधयेत्। तथा असमाहार्यमूले तु क्रयमेव विशोधयेत्। विशोधिते क्रये राज्ञा न वक्त
व्यः स किंचन। तथा प्रकाशं वक्रयं कुर्यात् साधुभिः ज्ञातिभिः स्वकैः मतत्रान्यक्रिया प्रोक्ता दैविकी न च मानुषी
प्रकाशं लोकविदितं प्राक् श्रुतं कुर्याज्ज्ञापयेदित्यर्थः वादीचेन्मार्गितं द्रव्यं साक्षिभिर्नैव भावयेत्॥ दाप्यः
स्याद्द्विगुणं राज्ञा केतात द्रव्यमर्हति महापराधविषयमेतत् बृहस्पतिः येन क्रीतं तु मूल्येन प्राग ध्यक्ष
निवेदितम्॥ न विद्यते तत्र दोषः स्तेभः स्यादुपधिक्रियात्॥ उपधिक्रयः छद्मक्रयः यदा तु नास्तिकस्य स्व
त्वप्रमाणं नास्ति केतुश्च क्रये शुद्धो तदाह। स एव प्रमाणहीने च देतु पुरुषापेक्षया न्यः समान्य नाधि
कत्वेन स्वयं कुर्यात् द्विनिर्णयम् वणिग्वीथीपरिगतं सत्त्वस्याद्यवहारतः अविज्ञातक्रयो दोषस्तथा चा
परिपालनम् एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः अविज्ञातविप्रोषला घव मूल्यं न विद्यते हानि
स्तत्र समाकल्प्या केत्नास्तिकयोर्द्वयोः अयमर्थः यद्वा वणिग्वीथ्यामापणे क्रीतं तस्य विक्रेता यदि
न शक्य आनेतुं तदा केतुर्नास्तिकस्य च तुल्या हानिः कल्प्या यतो द्वयोरपि द्रव्यहानिकारणमस्ति के
तुस्तावच्चोराहृतं न वेति ज्ञानरहितत्वेन क्रयकरणम् नास्तिकस्य चापरिपालनम्॥ इति अत्रैव वि

षयेकेतुर्दंडविशेषमाह। हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नुयात्। अनिवेद्य नृपे दंड्यः स षण्णवतिका
न्पणान्। यः स्वकीयं धनं हृतं प्रणष्टं वा। राजनि अनिवेद्यैव तस्य हस्तात् गृह्णीयात्। स राज्ञा षडधिक
कान्नवतिपणान् दंडनीयः प्रसंगादन्यदप्याह। शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम्। अ
र्वाक्संवत्सरात्स्वामी हरेत परतो नृपः नष्टमपहृतं वा धनं राजानं प्रति शुल्काधिकृतैर्ग्रामादिस्थानरक्ष
कैर्वा यदानीतं स्वं। तस्मादर्वाक् स्वामी लभेत ऊर्ध्वं संवत्सराद्राजा गौतमः प्रणष्टमस्वामिकमधिग
म्य राज्ञः प्रब्रूयुः विख्याप्य संवत्सरं राज्ञा रक्ष्यम्॥ मनुः प्रणष्टस्वामिकं द्रव्यं राजा त्र्यब्दं निधापयेत्
अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत्। उत्कृष्टगुणे ब्राह्मणे स्वामिन्येतत्। तत्रापरो विशेषः
आददीताथ षड्भागं प्रणष्टाधिगतान्नृपः दशमं द्वादशं वापि सतां धर्ममनुस्मरन्। रक्षणप्रयत्न
स्य गौरवलाघवानुसारेण भागत्रयमत्र विकल्पनीयं द्रव्यविशेषं प्रति यावदधिगमे देयं तदाह। प
णानेकशफे दद्याच्चतुरः पंच मानुषे। महिषोष्ट्रगवाद्ये द्वौ द्वौ पादं पादमजाविके॥ अश्वादिएकशफं तस्मि
न्नधिगते अधिगन्त्रे स्वामी चतुरः कार्षापणान् राज्ञे वा दद्यात् एवं मानुषे पंच महिषोष्ट्रगोषु द्वौ द्वौ अ ॥११५॥

चाह२

जासु अविषु च प्रत्येकं कार्षापणस्य पादम्। एतच्च प्रतिव्यक्ति देयम् न तु प्रतिजाति। इदं दत्तं संप्रदाना
दनपहार्यमिदं चापहार्यमिति विवेकार्थं देयमदेयं चकार। स्वं कुटुंबाविरोधेन देयं दारसुतादृते नान्व
ये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्। स्वं स्वकीयं पुत्रकलत्रव्यतिरिक्तं यत्र च कुटुंबाशनाच्छादनविना प्र
त्यो विरोधो नास्ति तद्देयम्। एतच्च प्राग्दायविभागात् विभक्तदायेषु तु पुत्रेषु सर्वस्वदानमनिषिद्धम्।
तथा यद्धनमन्यस्मै देयत्वेन प्रतिश्रुतमंगीकृतं तत्ततोन्यस्मै न देयम्। एवं च सति यद्देयं तद्दत्तं सन्नापहा
र्यमदेयं त्वपहार्यं स्वमिति यदनेन। अर्थं यादितकादिस्तु दृश्यते। कात्यायनः विक्रयं चैव दानं च न नेयाः
स्युरनिच्छवः दाराः पुत्राश्च सर्वस्वमात्मनैव तु योजयेत्। आपत्काले तु कर्तव्यं दानं विक्रय एव वा॥ अन्यथा
न प्रवर्तेत इति शास्त्रविनिश्चयः बृहस्पतिः एषाखिलेनाभिहिता संभूय स्यात्॥ न निष्कृतिः अदेयदेयद
त्तानामदत्तस्य च कथ्यते॥ सामान्यं पुत्रदारादि सर्वस्वं न्यासयाचितम् प्रतिश्रुतं तथान्यस्य न देयं सप्तधा स्मृ
तम्। सामान्यमनेकस्वामिकम्। तथा कुटुंबभक्तवसनाद्देयं यदतिरिच्यते। मध्वास्वादो विषं पश्चाद्दातुर्धर्मो
न्यथा भवेत्॥ वसनमाच्छादनम्। सप्तारामाद्रत्स्तेत्राद्यघक्षेत्रं प्रचीयते॥ पित्रा वा भर्त्स्य यं प्राप्तं तद्दातव्यं वि

Indira Gandhi National
Centre for the Arts

वासितम् । सप्तभ्य आरामादिभ्यो यत्प्रदीयते ऽधिकं भवति तद्दातव्यं विवक्षितमित्यर्थः सप्तागमाऽऽरूढक्षेत्राद्यध
क्षेत्रं प्रदीयते । इति च पाठे ॥ सप्तविधसोर्पाद्यागमप्रकारलब्धाऽऽरूढक्षेत्राद्युद्धृत्य दातव्यं न त्वागममित्यर्थः
स्वं क्षत्रेयं सप्तमं प्राप्तं बंधाचारेण वं धकम् ॥ वैवाहिके क्रमायाते सर्वदानं न विद्यते वं धकमाधिः तद्बंधाचारेण
धिरूपेण देयम् । तद्विवाहलब्धं क्षेत्रं चेत्स्वां भार्यां पांसस्वां सर्वं मरेयम् । तथा पितामहादिक्रमायातं पुत्रसद्भा
वे सोदायिकक्रमायातं शौर्यप्राप्तं च यद्भवेत् । स्त्रीज्ञाति स्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात् । तत्सोदायिकं विवा
हलब्धं तत्तया भार्यया नुज्ञातं देयम् क्रमायातं चाविभक्तधनैर्ज्ञातिभिः स्वेन सता युद्धलब्धं स्वामिनानुज्ञा
तमित्यर्थः विभक्ता वा विभक्ता वा दायादाः स्थावरे समाः एको धनी प्रभुः सर्वत्र दानाधापन विक्रमे क्रमाया
ता विभक्तस्य कर विषममेतत् ॥ विभक्ता अपि समाः किंपुनरविभक्ता इति माख्येयम् । अन्यथा विभागो नर्थ
कः स्यात् । एवं च सति विभक्तानां साम्याभिधानेनैतद् गमयति दानादिष्वोग्येषु विभक्तेषु दायादेषु सत्सु ते
ष्वेव स्थावर भूपिणीयम् । अयोग्येषु निरपेक्षेषु वान्यप्रभृति । आपदादौ स्थावरविषयं दानादिकमवि
भक्तधनैर्दायादैरनुज्ञात एकोपि कुर्यात् । तथा च स्मृत्यंतरम् । एकोपि स्थावरे कुर्याद्दानाधायनविक्रयम् ॥
+स्थावरस्य समस्तस्य गोत्रसाधारणस्य च । नैकः कुर्यात् क्रयं दानं परस्परमतं विना । ति ॥११६॥

योगाधमनविक्रीतं योगदानप्रतिग्रहं । यत्र चाप्युपाधिं पश्येत्तत्सर्वं विनिवर्तयेत् । अत्रोपधिकरणसामर्थ्यं सिद्धमुपाधि विनामद्रत्वात् स
स्यात्यं । येन । पाधिना । पाधिना दोषेण उपधिक्रयं दानप्रतिग्रहाः कृतास्तदुपाधिनिगमेक्रयादौ । वा त्वत्तैवेति

आपत्काले कुटुंबार्थे धर्मार्थे च विशेषतः इति नारदः दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति । दत्तां प्रदा
प्रदानिकं नाम तद्विवादपदं बुधैः अथ देयमदेयं च दत्तं चादत्तमेव च व्यवहारेषु विज्ञेयो दानमा बो
र्गश्चतुर्विधः तत्र स्थावरे हानि रेयमेकोविधं स्मृतम् ॥ दत्तं सप्तविधं विद्याद्दत्तं षोडशात्मकम् ॥
अन्वाहितं याचितकं माधिः साधारणं च यत् निक्षेपः पुत्रदाराश्च सर्वस्वं चान्वये सति । आपत्स्व
पि च कष्टासु वर्तमानेन देहिनां अदेयान्याहुदाराचार्या यच्चान्यस्मै प्रतिश्रुतम् ॥ कुटुंबभरणा
द्द्रव्यं यत्किंचिदतिरिच्यते ॥ तद्देयमुपहृत्यान्यद्ददद्दोषमवाप्नुयात् पण्यमूल्यं भृतिस्तुष्ट्या स्ने
हात्प्रत्युपकारतः स्त्रीशुल्कानुग्रहार्थं तु दत्तं दानविदो विदुः पण्यस्य गवादेः क्रयणीयस्य
मूल्यतया यच्च कर्मकरेभ्यो वृत्तित्वेन यच्च तुष्ट्या पुत्राधिकं पुत्रजन्मादि श्रावकेभ्यो यच्च स्ने
हात् मित्रादिभ्यो यच्च प्रत्युपकारतः प्रयत्नेनार्थं यच्च शुल्कादिनिमित्तं राजकतादि
धिकारिपुरुषेभ्यो यच्च स्त्रीभ्यो भार्यादिभ्यो यच्चानुग्रहार्थं दीनानाथादिभ्यस्तद्दानं दानं ।
विदो विदुः अत्र कात्यायनः अविज्ञातोपलब्धार्थं दानं यत्र निरूपितम् उपालब्धिक्रियाल

१७

पर९

ध्वंसगम्यतिः परिकीर्तिता भयत्राणाक्षार्थं तथाकार्यप्रसाधनात् अनेनविधिनालब्धं विद्यात्
प्रसुपकारकम्॥ नारदः अदत्तंतुभयक्रोधशोकवेगरुगन्वितैः तथोत्कोचपरीहासव्यत्यासा
सच्छलयोगतः बालमूढास्वतंत्रमत्तोन्मत्तापवर्जितैः कर्त्ताममायंकर्म्मेतिप्रतिलाभेछ
यातुतत् कात्यायनः प्राणसंशयमापन्नेयोमामुत्तारयेदितः सर्वस्वंतेप्रदास्यामुक्तेपिनत
था भवेत्॥ कामक्रोधास्वतंत्रार्थितमत्तोन्मत्तप्रमोहितैः व्यत्यासात्परिहासाच्चयद्दत्तंतसुन
र्हरेत्। यातुकार्यस्यसिद्ध्यर्थमुत्कोचास्यात्प्रतिश्रुता तस्मिन्नपप्रसिद्धेर्थेनदेयास्यात्कथं
चन॥ अथप्राग्वदत्तास्यात्सतिदाप्यः सत्तांबलात् दंडंचैकादशगुणं प्राहुर्गार्ग्यमानवाः
बृहस्पतिः। क्रुद्धहृष्टप्रमत्तार्त्तबालोन्मत्तभयातुरैः मत्तातिगहनिर्धूतैः सम्पदैः शोकवेगिभिः
नमिदत्तंतथैतैर्यत्तद्दत्तंप्रकीर्तितम् प्रतिलाभेच्छयादत्तमपात्रेपात्रशंकया कार्येवाधर्म्म
संयुक्ते स्वामीतत्पुनराप्नुयात्॥ मनुः कस्मैचिद्याचमानायदत्तंधर्म्मायपड्भवेत् पश्चाच्चन
तथातत्स्यान्नदेयं तस्यतद्भवेत्॥ धर्म्मकर्त्तुर्याचमानायपद्दत्तं तेनचेदसौधर्म्मेनकुर्यात्त ११७॥

दातस्मैनदेयमित्यर्थः यदिसंसाधयेत्तुदर्पाल्लोभेनवापुनः राज्ञादाप्यः सुवर्णंस्यात्तस्यस्तेय
स्यनिष्कृतिः अस्यार्थः यदितदपहारेक्रियमाणे सदर्पाल्लोभेनवानददाति किंतुसंसाधयेद्
द्राजसन्निधौ तस्यधनस्यापहार्यताप्तासाधयितुमिच्छेत्सराज्ञातद्धनंदाप्यइति। कात्यायनः
स्वस्थेनार्त्तेनवादेयंश्रावितंधर्म्मकारणात् अदत्वातन्मृतेदाप्यस्तत्सुतोनात्रसंशयः॥
स्वस्थेनवाव्याधार्थेनवापद्दानंसंप्रदानब्राह्मणं प्रत्येतावन्मयातुभ्यंदेयमितिश्रावयि
ता। यदिदानमकृत्वैवम्रततः तद्दातद्दापादैस्तद्देयमित्यर्थः अप्रयच्छंतोराज्ञादाप्यः दारा
त्वधर्म्मार्थंप्रतिश्रवणेसति द्रष्टव्यम्। स्तेनसाहसिकोद्धतपारजायिकसंश्रमात्॥ दर्शना
द्वृत्तनष्टस्यतथासत्यप्रवेतनात्॥ प्राप्तमेतैस्तुयर्त्किंचित्तदुत्कोचाख्यमुच्यते॥ नदातातत्रदं
डनः स्यान्मध्यस्थश्चैवदोषभाक् स्तेनादीनांश्रमनात् अर्थनार्हतो यदिमह्यंनप्रयच्छसितत
दात्वांस्तेनादिकंयावत्। तथा धृतनष्टस्यगृही। तथा लयितस्यदर्शनार्हतोः त्वांचाधारक
स्यदर्शयामीतियामीतियावत् अस्त्यस्यसत्यतमाततद्विपर्ययेणवाप्रवर्तनात्कारणाद्

तोः यद्धनमुक्तो वा स्वं लब्धं तत्स्वात्रेणा दातव्यम्। उक्तोच कस्य संपादकस्याह कौदंडनीयामि सर्वः प्र
तिग्रहः प्रकाशः स्यात् स्थावरस्य विशेषतः देयं प्रतिश्रुतं चैव दत्वा नापहरेत्पुनः सर्वस्यैव द्रव्यस्य प्रति
ग्रहः प्रकटः ससाक्षिकः कार्यः स्थावरस्य विशेषतो ग्रहतापतेन तथा यद्दत्तेदास्यामीति यत्प्रतिश्रुत
मंगीकृतं तद्दातव्यमदत्तं च नापहार्यम्। कात्यायनः स्वेच्छया यः प्रतिज्ञाय ब्राह्मणाय प्रतिग्रहं न दद्या
दृणवद्दाप्यः प्राप्नुयात् पूर्वसाहसम्। गौतमः प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात्॥ कात्यायनः योग
धाप नविक्रीत योगदान प्रतिग्रहम्। यस्य वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेत्॥ योग उपाधिः द्रव्य
विशेष परीक्षकाणां कालविशेषमाह॥ दशैकपंचसप्ताहमासत्र्यहार्धमासिकम्। बीजायोवाह्यरत्न
स्त्रीदोह्यपुंसां परीक्षणम्॥ मासशब्दः सामर्थ्यान्नोहः प्रत्यहः दशादिशब्दैः प्रत्येकमभिसंबध्यते दशा
हादिकाले बीजायोवाह्यरत्नानां बीजादिद्रव्याणां यथासंख्यं परीक्षणं कार्यम् तत्र बीजस्य दशाहे अय
स एकाहे वाह्यस्य बलीवर्दादेः पंचाहे। रत्नस्य मरकतादेः सप्ताहे स्त्रियाः दास्या मासे दोह्यस्य गवादे
स्त्र्यहे पुंसो दासस्यार्धमासे एवं परीक्षितस्य बीजादेः [illegible] नानुशयः कार्य इत्यर्थः प्रसंगाद्द्रव्यां १५६॥

तरपरीक्षोपायमाह। अग्नौ सुवर्णमक्षीणं रजते द्विपलं शते अष्टौ त्रपुणि सीसे च ताम्रे पंचदशायसि॥
सुवर्णस्य दह्यमानस्य नैवास्य पल्यपि क्षीयते तद्द्रव्यांतर विमिश्रितम् शुद्धं तु न क्षीयते एव रजतस्य प
लशतपरिमाणस्य रत्तोमा वेक्रिममाणे पलद्वयं क्षीयते त्रपुविषये पलशतेरसीकृते अष्टौ पलाः क्षीयंते
एवं सीसके ताम्रविषये तु पलशते ध्मायमाने पंचपलानि क्षीयंते एवमयसि दशपलानां तत्र संप्रत्याह। शते
दशपलावृद्धिरौर्णकार्पासिके तथा मध्ये पंचपला वृद्धिः सूक्ष्मे तु त्रिपला मता॥ स्थूलेकार्पासिके च
र्णामयेवा शुक्ले शतपल परिमितेसति। यत्तन्मयं वस्त्रं भवति तत्र दशपलानि वर्धंते एतच्च स्थूलसू
त्रमये वस्त्रे द्रष्टव्यम्। ततः सूक्ष्मा तिसूक्ष्ममये तु यथासंख्यं पंचपल त्रिपला वृद्धिः स्यात्। वृद्धिमुक्त्वा क्षीण
मपाह। कार्पासिके रोमबद्धे च त्रिंशद्भागः क्षयो मतः न क्षयो न च वृद्धिः कौशेये वाल्कलेषु च यत्तंतु
तवेकर्मविशात् द्रव्यं परिमाणस्य त्रिंशोभागः क्षीयते कौशेयमतसीमयं वाल्कलं क्षौमादिः तत्रोभय
त्र क्षयवृद्धिमस्तः तत्र नारदः तांतवस्य तु संस्कारे क्षयवृद्धी उदाहृते तत्र कार्पासिकौर्णानां वृद्धिर्दश
पलाशते स्थूलसूत्रवतामेषां मध्यानां पंचकं शतम् त्रिपलातु सुसूक्ष्माणामतः क्षय उदाहृतः

ऽपुरुषादीनि स्थूलाणि संपद्यंते तत्कार्मिकम्॥ यत्र रोमाणि वध्यंते तत्रोमबद्धम्। तदुभयविधे वस्त्रे ३

त्रिंशांसेरोमवद्धस्यक्षयः कर्म्मकृतस्यच कौशेयवल्कलादीनांनैववृद्धिर्नचक्षयः उक्तादधिकक्ष
येशिल्पी दंड्यः तत्रपरिमाणमाह। देशकालंचभोगंचज्ञात्वानष्टेबलाबलम् द्रव्याणांकुशलाब्रूयुर्य
त्पनदाप्यमसंशयम्। सुवर्णताम्रसीसानांपञ्चोर्णकार्पासादीनांवाग्निभ्राणदशीयंतत्कर्तृभिः सुव
र्णकारादिभिः यावत्सुवर्णस्वत्वंवापहियमाणंस्वामिनोनष्टंतत्रदेशकालौतस्यचोपभोगंसारासारतांच
पर्यालोच्यमूल्यतत्त्वज्ञाः यावन्मूल्यंकर्तुमिच्छंति तावन्निःशंकेनराज्ञाशिल्पिनः सुवर्णकारादयोदा
पनीयाः मनुः तंतुवायोदशपलंदद्यादेकपलाधिकम्। अतोन्यथावर्त्तमानोदाप्योद्वादशकंदमम्॥
द्वादशकार्षापणपरिमाणोदंडो द्वादशकः नारदः मूल्याष्टभागोहीयेतसकृद्धौतस्यवाससः द्विःपाद
स्त्रिस्त्रिभागस्तुचतुः कृत्वोर्धमेवतुअर्धक्षयात्तुपरतः पादांशापचयः क्रमात्। यावत्क्षीणदशंवस्त्रं
जीर्णस्यानियममधुनादासविषयमाह। बलाद्दासीकृतैश्चौरैर्विक्रीतश्चापिमुच्यते स्वामिप्राणप्रदोभक्त
स्यागात्तन्निष्क्रयादपि। बलाद्गृहीतः अदासोपिदासः कृतोयश्चौरैर्विक्रीतः समुच्यते मोचनीयइत्यर्थः य
दिनमुंचति तदाराज्ञामोचयितव्यइत्यर्थः तदाहनारदः। चौरापहृतविक्रीताश्चयेचदासीकृताबलात् ॥१९८

एराज्ञामोचयितव्यास्तेदासत्वंतेषुनेष्यते यश्चदासः सन्नात्मनोप्यसुमभ्युपेत्यभक्त्यास्वामिनंभयोमोच
यति। यश्चस्वामिनादास्यान्मोचितः यश्चात्मकोदासविसनिष्क्रयादृणापाकरणाद्यंतरप्रदानाद्वामोच्य
ते इतिमनुः नस्वामिनाविसृष्टोपिशूद्रोदास्याद्विमुच्यते निसर्गजंहितत्तस्यकस्तस्मात्तदपोहति।
नारदः गृहेजातस्तथाक्रीतोलब्धोदायादुपागतः अनाकालभृतस्तद्वदाहितःस्वामिनाचयः मोक्षितो
महतश्चर्णाद्युद्धेप्राप्तः पणेजितः तवाहमित्युपगतः प्रव्रज्यावसितः कृतः भक्तदासश्चविज्ञेयस्तथैव
वडवाहृतः विक्रेताचात्मनः शास्त्रेदासाः पंचदशस्मृतः स्वदास्यांजातोगृहदासः मूल्यप्रा
प्तः क्रीतः प्रतिग्रहादिनाप्राप्तोलब्धः दायादुपागतोरिक्थलब्धः दुर्भिक्षेयोपोषितोनाकालभृतः स्वा
मिनोत्तमर्णंप्रतिआधिः कृतः आहितः पणेजितोद्यूतजितः प्रव्रज्यावसितः प्रव्रज्याप्रच्युतः ए
तावंतंकालंतवाहंदासोभवामीत्युपगमितः कृतः भक्षितुंभक्तंयावन्मेददातितावदहंतेदा
सइत्येवंरूपोभक्तदासः वडवागृहदासीतयाहृतः तल्लोभेनमुवाहदासत्वेनविप्रोवडवाहृ
तः इतिप्रसिद्धाः तत्रपूर्वश्चतुर्वर्गोदासत्वान्नविमुच्यते। प्रसादात्स्वामिनोन्यत्रदास्यमेषां

Indira Gandhi National
Centre for the Arts

क्रमागतं॥ विक्रीणीते स्वतंत्रः॥ सन्य आत्मानं नरोधमः॥ स जघन्यतरस्तेषां सोपि दास्यान्न मुच्यते॥ यो वै षां स्वा
मिनं कश्चिन्मोक्षते प्राणसंशयात्॥ दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥ अन्नाकालभृतो दासान्मुच्यते गोयुगं
तं ददत्॥ संभक्षितं यद्दुर्भिक्षे न तच्छुध्यति कर्मणा॥ आहितोपि धनं दत्वा स्वामी यद्येनमुद्धरेत्॥ अथोपगमेयेद्
नं सोपि क्रेयादनंतरः॥ अथ नाम्ना दासमुपागमयेत्॥ दासोस्मीत्यंगीकारयेत्॥ ततः सक्रीतादनंतरः
क्रीयतुल्य इत्यर्थः॥ ऋणदासविषयं स एवाह॥ ऋणं तु सोदयं दत्वा ऋणी दास्याद्विमुच्यते॥ कृतरणे
लब्धुपरमाकृतकोपि विमुच्यते॥ तथाह मितु पगतो ध्वजाहृतः पणोजितः॥ प्रतिशीर्षप्रदानेन मुच्यते
तुल्यकर्मणा॥ ध्वजाहृतो युद्धलब्धः प्रतिशीर्षप्रदानं दासांतरप्रदानं। प्रतिशीर्षी विशेषणं तुल्यकर्मणेति
पूर्वदासकर्मणा तुल्यं कर्म यः करोति॥ तं दासं दत्वा पूर्वदास्येदासत्वान्मुच्यते इत्यर्थः॥ प्रव्रज्यावसितं
प्रत्याह॥ प्रव्रज्यावसितो राज्ञो दास आसारणांतिक प्रव्रज्यातो निवृत्तो यावज्जीवं राज्ञ एव दासः॥ नारदः॥ न
राज्ञ एव दासस्स्यात्प्रव्रज्यावसितो नरः॥ न तस्य प्रतिमोक्षोस्ति न विशुद्धिः कथंचन॥ द्वावेव कर्मचंडालौ लो त्र
के दूरं वहिष्कृतौ॥ प्रव्रज्योपनिहृतश्च वृथा प्रव्रजितश्च यः॥ कात्यायनः॥ प्रव्रज्यावसिता यत्र त्रयो

॥९०॥९२

यो वै वर्णा द्विजादयः॥ निर्वासं कारयेद्विप्रं स दासत्वं क्षत्रविण्नृपः॥ दक्षः॥ पारिव्राज्यं गृहीत्वा तु यः स्वधर्मे न
तिष्ठति श्वपदेनां॥ कितं तं तु राजा शीघ्रं प्रवासयेत्॥ प्रव्रज्यावसितान्यत्र स्यदासस्य विप्रमोक्षणप्रका
रत्वमाह॥ स्वं दासमिच्छेद्यः कर्तुमदासं प्रीतमानसः॥ स्कंधादादाय तस्यासौ भिंद्यात्कुंभं सहांभसा॥ सा
क्षताभिः सपुष्पाभिर्मूर्धन्यद्भिरवाकिरेत्॥ अदास इति चोक्त्वा त्रिः प्राङ्मुखं तमवासृजेत्॥ भ
क्तदासवडवाहृतयोरपरो विशेषः॥ भक्तस्योत्क्षेपणात्सद्यो भक्तदासो विमुच्यते॥ वडवाया निग्र
हान्मुच्यते॥ वडवाहृतः भक्तमन्नं। तस्योपयुक्तस्य प्रतिपानमुत्क्षेपणं॥ वडवा दासी निग्रहो निरोधः
असंभोग इति यावत्॥ तथा॥ स्वां दासीं यस्तु संगच्छेत्प्रसूता च भवेत्ततः॥ अवेक्ष्य वीर्यं कार्योस्या रुत
दासी सान्वया तु सा॥ दासस्य तु धनं यत्स्यात्स्वामी तत्र प्रभुः स्मृतः॥ प्रकाशं विक्रयाद्यं तु न स्वामी धनम
र्हति॥ दासेनोढा त्वदासी या सापि दासत्वमाप्नुयात्॥ यस्मादत्तादिकर्ता प्रभुस्तस्याः स्वाम्यधीनपति
र्यतः॥ दासात्त्वमिति वदे स्वत्वं प्राणीतदा दास्यस्तस्या वोढुर्दासाद्वेरवाहं॥ तदात द्वासस्वामिनो
दासतां यातीति वेदितव्यं इत्यर्थः॥ नारदः॥ वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः॥ उत्तमवर्णा

Indira Gandhi National Centre for the Arts

प्रतिहीनवर्णो दासो भवति न तु विपरीतमित्यर्थः नारदः वर्णानां प्रातिलोम्येन न दासत्वं विधीयते स्व

धर्मत्यागिनोऽन्यत्र दारवद्दासता मता स्वधर्मत्यागी प्रव्रज्यावसितस्तस्य ब्राह्मणत्वे सति श्वपादांकनं

प्रवासनं चोक्तम् क्षत्रियवैश्यत्वे त्वप्रतिदासत्वमित्युक्तम् अनेन तु शूद्रं राजानं प्रति राजन्यवैश्य

योर्दासत्वं विधीयते कात्यायनः स्वतंत्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः त्रिषु वर्णेषु विज्ञेयं दासत्वं वि

प्रस्य न क्वचित् वर्णानामानुलोम्येन दासत्वं न प्रतिलोमतः राजन्यवैश्यशूद्राणां त्यजतां हि स्वतंत्रतां

तामपि समवर्णोऽपि विप्रं तु दासत्वं नैव कारयेत् शीलाध्ययनसंपन्ने तत्त्वं कर्मकामतः तत्रापि ना

शुभं किंचित्कुर्वीतेति द्विजोत्तमः ब्राह्मणस्य हि दासत्वान्न्पतेजो विहन्यते नारदः कर्मापि द्विविधं

प्रोक्तमशुभं शुभमेव च अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् गृहद्वाराशुचिस्थानरथ्या

वस्करशोधनम् गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोत्करम् इच्छतः स्वामिनश्चांगैरुपस्थान

मथांततः अशुभं कर्म विज्ञेयं शुभमन्यदतः परम् मनुः ध्वजाहृतो भक्तदासो गृहजः क्रीत

दत्रिमो पेतः कोदंडवासश्च सप्तैता दासयोनयः उपलक्षणमेतत् नारदादिभिरुक्तानामिरि ॥ [illegible] ॥

ण:

कानामपि दासत्वाभिधानात् दंडनिश्रयार्थं दासोदंडदासः क्षत्रियं चैव वैश्यं च ब्राह्मवृत्तिकर्षितौ

बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत् दास्यं तु कारयेन्मोहाद्ब्राह्मणः संस्कृतान्द्विजान् अनि

च्छतः प्राभवत्याद्राज्ञा दंड्यः शतानि षट् प्रभवतो भावः प्राभवत्यं प्रभुत्वमित्यर्थः षट् शतानि प

णानाम् शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा दास्यायैव हि सृष्टोऽसौ ब्राह्मणस्य स्वयंभुवा

विष्णुः यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दंडः कात्यायनः आदद्याद्ब्राह्मणीय

स्तु विक्रीणीत एव च राज्ञा तदकृतं कार्यं दंड्याः स्युः सर्व एव ते कामात्तु संश्रितं यस्तु दासी कुर्यात्

कुलस्त्रियम् संक्रामयेत वान्यत्र दंड्यस्तद्वाकृतं भवेत् बालधात्रीमदासीं दासीमिव भुन

क्तिपः परिव्राजकपत्नीं वा प्राप्नुयात्सर्वसाहसम् विक्रीणमानां यो भक्तदासीं विक्रेतुमिच्छति

अनापदिस्थः प्राप्तः सन् प्राप्नुयाद्द्विशतं दमम् अधुनाभ्युपेत्याशुश्रूषाख्यं व्यवहार

पदं किंचिदाह कृतशिल्पोऽपि निवसेत्कृतं कालं गुरोर्गृहे अंतेवासी गुरुप्राप्तभोजनस्तत्फ

लप्रदः अंतेवासी शिल्पविद्यार्थी गुरुतः प्राप्तभोजनः स्वयंकृतस्य शिल्पकर्मणः फलं गु

Indira Gandhi National
Centre for the Arts

रवेश्मपच्छेत् यावत्कालं गुरुं प्रतितद्गृहवासमंगीकृतः तावंतं कालं गृहीतशिल्पोपि गुरुकुल एवं संवसेव
त्। अभ्युपेत्याशुश्रूषाख्यं व्यवहारपदं विषयं चैतत् अत्रे वक्तद्विषयाणि स्मृत्यंतराणि षट्
श्यंते नारदः अभ्युपेत्य तु शुश्रूषां यस्तां न प्रतिपद्यते अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यते॥
अभ्युपेत्याशुश्रूषेत्यर्थः शुश्रूषकः पंचविधः शास्त्रे दृष्टो मनीषिभिः चतुर्विधः कर्मकरः शेषादा
सास्त्रिपंचकाः तथा शिष्यांतेवासि भृतकश्चतुर्थस्त्वधिकर्मकृत् एते कर्मकरा ज्ञेया दासास्तु
गृहजादयः सामान्यमस्वतंत्रत्वमेषमाहुर्मनीषिणः जातिकर्मकृतस्तूक्तो विशेषो वृत्तिरेव च। समाव
र्ता ऽ विद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम्॥ तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च समाव
र्तस्तु गुरवे प्रदाय गुरुदक्षिणाम्। प्रतीयात्स्वगृहान्येषा शिष्यवृत्तिरुदाहृता प्रतीयात्प्रतिगच्छे
त्। स्वशिल्पमिच्छन्नाहर्तुं बांधवानामनुज्ञया आचार्यस्य वसेदंते कालं कृत्वा सुनिश्चितं आचार्यः
शिक्षयेदेनं स्वगृहे दत्तभोजनम् न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् चतुर्दशभ्यो विद्यास्था
नेभ्योन्या विद्या शिल्पविद्यातदुक्तं कर्म शिल्पम् तदपेक्षमाणः शिष्य आचार्येण सह संविश्य

॥५२॥

त्॥ एतावंतं कालं तवांतिके निवत्स्यामीति कात्यायनः यस्तु न ग्राहयेच्छिल्पं कर्माण्यन्या
नि कारयेत् प्राप्नुयात्साहसं पूर्वं तस्माच्छिष्यो निवर्तते शिल्पमशिक्षयतः स्वकीयानि च क
र्माणि कारयतो गुरोः शिष्येणागोऽज्ञा च प्रथमसाहसो दंडः कार्य इत्यर्थः नारदः शिक्षय
तमदुष्टं च यस्त्वाचार्यं परित्यजेत् बलाद्वासयितव्यः स्याद्वधबंधौ च सोर्हति वधोत्र ताडनं
न प्राणच्छेदः शिक्षितोपि कृतं कालमंतेवासी समाप्नुयात्॥ तत्र कर्म च यत्कुर्यादाचार्यस्यै
व तत्फलम्॥ कृतमंगीकृतं कालं तत्र वसन्समापयेदित्यर्थः तत्र वसता शिष्येण कृतस्य क
र्मणः फललाभ आचार्यस्य गृहीतशिल्पः समये कृत्वा आचार्यं प्रदक्षिणम्। शक्तितश्चा
नुमत्यैनमंतेवासी निवर्तते भृतकस्त्रिविधो ज्ञेय उत्तमाधममध्यमः शक्तितश्चानुरूपास्य
दिषा कर्माश्रया भृतिः उत्तमस्त्वायुधीयोत्र मध्यमस्तु कृषीवलः अधमो भारवाहः स्यादि
त्येष त्रिविधो भृतः सर्वेष्वधिकृतो यः स्यात्कुटुंबस्य तथोपरि सोपि कर्मकरो ज्ञेयः स च कौ
टुंबिकः स्मृतः शुभकर्मकरा ह्येते चत्वारः समुदाहृताः बृहस्पतिः द्विप्रकारो भागभृतः

Indira Gandhi National
Centre for the Arts

ना॰व॰टी॰ कृषीगोजीविनां स्तः जातसस्यात्तथा क्षीरास्तलभेतनपांसपः [redacted]यमक
रत्नम्॥ ॥ संविद्यतिक्रमलक्षणस्समवहार पदस्योपयोगिनमर्थं तावदाह। राजाकृत्वापु
रेस्थानं ब्राह्मणान्यस्य तत्र तु त्रैविद्यान्वृत्तिमद्यात्स्वधर्मः पाल्यतामिति। राजानिजनगरेस्था
नं स्थीयते तत्र विप्रानदिं। वेषुना द्युपेतभभागेतस्थानं वृत्तिमकुर्वं वनिर्वाहसमर्थस्थावराजंग
मधनोपेतं निर्माय तथा ब्राह्मणांस्त्रैविद्यान्यजुःसामरूपविद्यात्रयोपेतं तत्र स्थाने मस्थाप्य नि
वेषूपयथा गृहं गृहं वसादिदत्वा स्वधर्मो वर्णाश्रमादिधर्मः पाल्यतां क्रियतामिति। तान्ब्राह्म
णान्ब्रूयात् केचित्सठंति। त्रैविद्यं वृत्तिमदिति। तदा त्रैविद्यं वृत्तिमच्च यथा भवति तथा कुर्या
दित्यर्थः तिसृणां ऋगादिविद्यानां समाहारस्त्रैविद्यम स्यानस्यवतद्वित्रिघत्वात द्युक्तब्राह्म
णवर्तया एवं च ब्राह्मणसमूहस्तनामिधाना संकेतसमयक्रिया संविप्रुव्वा व्याकर्तव्येस्य
चोदुक्तं भवति न हितो विना समूहवाधाच्चौरादयो निराकर्तुं शक्याः दृष्टा पूर्तक्रियादिध
र्मा श्च संपदयितुम्। अत एवाह बृहस्पतिः वेदविद्याविदो विप्रान्श्रोत्रियानग्निहोत्रिण ॥१२३॥

आहृत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्॥ अन्याच्छेद्यकरास्तेभ्यः प्रदद्याद्गृहभूमिकाः मुक्ता भव्या
श्चनृपतिलेखयित्वा स्वशासने नित्यं नैमित्तिकं काम्यं शांतिकं पौष्टिकं तथा॥ पौराणां कर्म कु
र्युस्ते संदिग्धनिर्णयं तथा ग्रामं गेलिगणार्थं च संकेतसमयक्रिया॥ वाधकाले च सा कार्या ध
र्मकार्ये तथैव च वार चोरभयं वाधा सर्वसाधारणा स्मृताः तत्रोपशमनं। कार्यं सर्वैर्नैकेनके
नचित् कोशेन लेख्यक्रियया मध्यस्थैर्वापरस्परम् विश्वासं प्रथमं कृत्वा कुर्युः कार्याण्यनं
तरम्॥ विद्वेषिणो व्यसनिनः शालीनालसभीरवः लुब्धातिवृद्धबालाश्च न कार्याः कार्यचिं
तकाः शुचयो वेदधर्मज्ञा दक्षा दांताः कुलोद्भवाः सर्वकार्यप्रवीणाश्च कर्तव्यास्तु महत्तमाः ब्रा
ह्मणस्थाने निवेश्य नीयात् सुक्तम्। तेस्तु मिविषेर्यत्कार्यं तदाह। निजधर्माविरोधेन यस्तु
सामयिको भवेत् सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः निजेन स्वकीयेन श्रौतादिधर्मे
णाविरुद्धो यः त्विगणापियो गिसामयिकः समयादिनिर्वृत्तो धर्मो यथाव्याधाद्युपद्रवसमये
प्रतिक्षेत्रं प्रतिगृहं वा धनमेतावद्ग्रहयज्ञादि शांतिकसिद्धये देयम्। यथा वा सर्वैर्जनपदैः

Indira Gandhi National
Centre for the Arts

गं

व·री स्वव्यापारपरिहारेणमुत्रस्यानविपूर्णेषे आतव्यम् योनगछेत्तस्यापंदंडइति यद्वासभाप्रप
देवकुलतडागादीनांजीर्णानामुद्धारोदीनानाथानांच संस्कारोयज्ञाभिक्षादिनिमित्तंचदानंसा
धारणधनेनानयाव्यवस्थया एतत्कर्तव्यमितियश्चराज्ञासमर्थधर्मः कृतोयोरणेन स्वयंप्राप
येत यदितस्मैप्राप्तान्मूल्यादधिकंपारितोषिकंद्रव्यंस्वामिनादेयम् योयावत्कुरुतेकर्मतावत्तस्य
चवेतनम् उभयोरप्यशाठ्यंचेत्शाठ्येकुर्याद्यथाश्रुतम्॥ यद्येकंस्वामिकर्मानेकभृतकसाध्यंभ
वति तत्रशाठ्यंवर्जयित्वायोभृत्योयावत्कर्मकरोति।तस्मैतावदनुरूपवेतनंदेयम्। यदिपुरुष
द्वयसाध्यमेकःकुर्यात्तत्रभृतिद्वयंदेयम् न्यूनंचेद्भागहानिःस्तोकत्वात् पूर्णत्वेतुयथाश्रुतंयत्रो
क्तंतद्दद्यात् स्वामिस्वछंदइतिज्ञेयम् एतच्चान्येकभृत्यसाध्येकर्मणिवेतनेवापरिभाषितेवेदि
तव्यम् तत्रचोभयग्रहणंप्रदर्शनार्थम्। तेनयत्रबहवोपिभृत्याःशाठ्यंविहायकर्मकुर्वंति।तत्रा
पिकर्मानुसारेणमूल्यदानंसिद्धंभवति।अराजदैविकान्नष्टंभांडंदाप्यस्तुवाहकःप्रस्थानवि
घ्नकृच्चैवप्रदाप्योद्विगुणांभृतिं॥ योवोढव्यद्रव्यप्रायेणपरिकीर्तितः सराजदैविकव्यापारव्यतिरि ॥९२४॥

रेकेणस्वकीयप्रज्ञापराधाद्भांडंवोढव्यंद्रव्यंविनाशयति।सतन्मूल्यंदाप्यः यस्तुप्रस्थानविघ्नमा
चरतिसद्विगुणंभृतिंदाप्यः वृद्धमनुः प्रमादान्नाशितंदाप्यः समंद्विर्मोहनाशितम्। नतुदाप्योहतं
चौरैर्दग्धंमग्नंजलेनवाद्विर्द्विगुणमित्यर्थः बृहस्पतिः प्रभुणाविनियुक्तःसन्भृतकोविदधातियत्
तदर्थमशुभंकर्मतत्रापराधमुयात् तदर्थस्वाम्यर्थम्। अशुभंचौर्यादिअपराधयात् दंडादिभागभवे
त्। प्रक्रांतेसप्तमंभागंचतुर्थंपथिसंत्यजन् भृतिमर्धपथेसर्वांप्रदाप्यःस्याजकोपिच प्रक्रांतेगम
नेराजमार्गप्राप्तेःप्राक्भृत्यःकर्मपरित्यजन्मूल्यस्यसप्तजन्भृतिमर्धपथेसर्वांप्रदाप्यःस्याजको
पिच प्रक्रांतेगमनेराजमार्गप्राप्तेःप्राक्भृत्यःकर्मपरित्यजन्मूल्यस्यसप्तमंभागंदाप्यः एतच्चवाहकांत
रलाभात्प्रस्थानविघ्नाभावेवेदितव्यम्। तद्विघ्नेद्विगुणंदानमुक्तम्। यदितुपथ्यानंप्राप्यपरित्यजेत्तदा
भृतेश्चतुर्थांशंदाप्यःअर्धपथेतुसर्वांभृतिम् एवंस्वाम्यपिपरिक्रीयवाहकंयदिपरित्यजयति न
वाहयति। मुनयः कर्मकालेसंप्राप्तेनकुर्याद्विघ्नमाचरेत्॥ तद्धस्तान्मस्तुकार्यःस्यात्सदाप्योद्विगुणां
भृतिम् नारदः अनयन्भटायित्वातुभांडवान्यानवाहने॥ दाप्योभृतिचतुर्भागंसर्वामर्धपथेत्य

Indira Gandhi National
Centre for the Arts

जन् अनयन्वाहकोप्येवं भृतिहानिमवाप्नुयात् वृद्धमनुः पथिविक्रीयत भांडं वणिग्भृत्यं स
जेद्यदि अथ तस्यापि देयं स्यात् तेरर्धं लभेत सः यदा च पथि तद्भांडं निषिध्येत हि पेतवा यावानध्व
म'तस्ते न प्राप्नुयात्तावतीं भृतिम्॥ नारदः षड्भागमाभाव्यपथियुग्यभृतं सजेत् अदत्त्वाशथि
त्वा तु सोस्यो भृतिमावहेत् यदीयैरश्वबलीवर्दादिभिर्युग्यं भांडं नीयते स युग्यभृतः तं प्रति
वोढव्यद्रव्य षड्भागं भृतित्वेनाभाव्यनददाति। तं च सजन् सितदासोदर्यां भृतिं तस्मै स्वामी दद्या
स र्थः बृहस्पतिः कृते कर्मणि यः स्वामी न दद्याद्भृतं भृते राज्ञा दापयितव्यः स्याद्विनयं चा
नुरूपतः कात्यायनः त्यजेत्पथि सहायं यः श्रांतं रोगार्तमेव वा प्राप्नुयात्साहसं पूर्वं ग्रामेत्र्य
हमपालयन् मत्स्यपुराणे भृत्यमादाय यो विद्यां शिल्पं वा न प्रयच्छति। दंड्यः स भृत्यं स
कलं धर्मज्ञेन महीक्षिता नारदः शुल्कं गृहीत्वा पण्यस्त्री नेच्छंती द्विगुणं वहेत् अनिच्छ
च्छुल्कदातापि शुल्कहानिमवाप्नुयात् अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम्
अक्रमेण तु संगच्छत् घातदंतनखादिभिः अयोनौ यः समाक्रामेद्बहुभिर्वापि वासयेत् ॥१२५॥

शुल्कं सोष्टगुणं दाप्यो विनयं तावदेव तु वेश्याः प्रधाना यास्तत्र कामुकास्तत्गृहोषिताः॥
तत्समुत्थेषु कार्येषु निर्णयं संशयं विदुः मत्स्यपुराणे गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छ
ति तां धनं दापयेद्यादनूढस्यापि भाटकाम् अन्यमुद्दिश्य वेश्यायां न येदन्यस्य कारणा
त् तस्य दंडो भवेद्राज्ञः सुवर्णस्य च माषकम् नीत्वा भोगं न यो दद्याद्दाप्यो द्विगुणवेतनम्
राज्ञश्च द्विगुणं दंडं तथा धर्मो न हीयते। बहूनां व्रजतामेकां सर्वे ते द्विगुणं दमम्॥
दद्युः पृथक्पृथग्राज्ञे दंडं च द्विगुणं परम् स्मृतिः व्यधितास श्रमा व्यग्रा राजधर्मपरायणा
आमंत्रिता च नागच्छेदवाच्या वडवा स्मृतम् वडवादासी। नारदः परभूमौ गृहं कृत्वा स्तोमं
दत्त्वा वसेत्तु यः स तद्गृही त्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम्॥ स्तोमादिना वसित्वा तु प
रभूमावनिश्चयः निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात्कथंचन यान्येव तृणकाष्ठानि।
लिष्टिका विनिवेशिता विनिर्गच्छंस्तु तत्सर्वं भूमिस्वामी निवेदयेत्॥ स्वामीनीतिचतु
र्थ्यर्थे सप्तमी सीमो भाटकम्॥ व्यासः स्नेहेन स्थंडिले लब्धा मंदिरं कुरुते तु यः निर्गच्छ

Indira Gandhi National
Centre for the Arts

या॰ व॰ टी॰ तस्तस्यदारूदत्तस्तोमस्यनान्यथा॥ कासायनः गृहवापीपणादीनिगृहीत्वाभाटकेनयः स्वा
मिनेनार्पयेद्यावत्तावद्दाप्यःसभाटकम् हस्त्यश्वनौखरोष्ट्रादीन्गृहीत्वाभाटकेनयः ना
र्पयेत्सः संस्तावद्दाप्यः सभाटकम् इति मनुः योभाटयित्वाशकटंनीत्वाचान्यत्रगच्छ
तिभाटंनदद्याद्दाप्यः स्यात्स्यापिभाटकम् स्तोमवाहीनिभांडानिपूर्वकालान्युपान
येत् गृहीतुराभवेद्दूरंनष्टंवान्यत्रसंन्यस्तवान् स्तोमेनभाटकेनघृततैलादिद्रव्यांत
रप्राप्त्यर्थयानियानिभांडानितानिस्तोमवाहीनि। तानि पूर्णभाटककालानि
तत्स्वामिनमुपानयेत् तेषांमध्येपतदेवलेपाद्भग्नंप्रध्वस्तंवा तस्तोमगृहीतुराभवे
त् नेतरेणतदैपमिस्यर्थः एतच्चसंप्लवादन्यत्रसंभवत्वेतुभांडस्वामीनेभग्नादिभां
त् ॥ इति वेतनादानप्रकरणम्॥ ॥अथद्यू
उमत्संदेयम् संप्लवाद्व्यांतरास्फालनं।॥इति वेतनादानप्रकरणम्॥ ॥अथद्यू
तसमाह्वयाख्यंव्यवहारपदंप्रस्तूयतेतत्र नारदः अक्षवध्रशलाकाद्यैर्देवनंजिह्म
कारितम् पणक्रीडावयोभिश्चपदंतत्समाह्वयम्॥अक्षाः पाशकाः वध्रश्चर्म ॥ ०२६ ॥

दिवलयवोधः शलाकाकितवेभ्योस्तेपाःआद्यशब्दादन्येषामपिकर्पटकादीनांग्रह
णम् देवनंक्रीडाविजिगीषावा जिह्मंकुटिलं जिह्मेनकुटिलभावेनदेवनंद्यूतम् मनुःअ
प्राणिभिर्यत्क्रियातेतल्लोकेद्यूतमुच्यते प्राणिभिःक्रियतेयस्तुसविज्ञेयः समाह्वयःकाकिन्यो
वध्रिकाश्चैवशलाकानोर्पएवच अक्षाः सवीजाः कुरुकाद्यूतोपकरणानिषट् बृहस्पतिः॥
अन्योन्यपरिगृहीताः पक्षिमेषवृषादयः प्रहरंते कृतपणास्तवदंतिसमाह्वयं॥तत्रसभा
पतिनायावतीवृद्धिर्यतश्चग्राह्यातदाह।ग्लहेशतिकवृद्धेस्तुसभिकःपंचकंशतम् गृही
याद्धूर्तकितवादितराद्दशकंशतम्। यःसभाकृत्वाद्यूतोपकरणानिचप्रगुणीकृत्यकित
वेभ्योदिदेवितुंदत्त्वाधनंप्रयच्छतिससभिकः धूर्तकितवान् धूर्तोविजयीयःकितवोद्यू
तकर्तासधूर्तकितवस्तस्माच्छतिकवृद्धेः द्यूतसंख्याकग्लहेपणोयोवृद्धिंजितवान् सप्र
तिकवृद्धिस्तस्मात्संचकंशतंगृह्णीयात्॥ यःपराजितसःइतरः तस्मातुदशकंशतम्।स
ना सम्यक्पालितोभागराज्ञेदेयश्चाश्रुतम्॥ जितमुद्ग्राहयेज्जेत्रेदद्यात्सत्यंवचः क्षमी॥

व·टी· सभिकः पूर्वोक्तोराज्ञा सम्यक्पालितः कितवेभ्यः सम्यक्रक्षितो राज्ञेयथाश्रुतमंगीकृतंस्वकीयाद्
नाद्भागंदद्यात् जितधनंपराजितात्कितवाद्ग्राहयेदुत्कालयेत् एतयैतावति कालेतुभ्यमियद्दने
दास्यामीतिजेत्रेसत्यवचस्तद्विश्वासात्क्षमी संदद्यात्॥ कात्यायनः सभिकः कारयेद्यूतं देयंद
द्याच्चयत्कल्पे दशकंचशतं वृद्धिं गृह्णीयाच्चपराजयात् जेतुर्दद्यात्स्वकं द्रव्यं जितं ग्राह्यंत्रिप
क्षिकम् सद्योवासभिकेनैवकितवात्तु नसंशयः नारदः सभिकः कारयेद्यूतं देयंदद्याच्चयत्क
तम्। दशकं तु शतं वृद्धिं सत्यसत्यास घूतेकारिता अथवाकितवोराज्ञेदत्वाभागंयथोचितम्
प्रकाशं देवनं कुर्यादेवंदोषोनविद्यते अथवासभिकं विनाकितवएव राज्ञाभागंदत्वाप्रसभं
देवनं कुर्यादित्यर्थः कितवइतिजात्यभिप्रायेणैकवचनम् बृहस्पतिः द्वंद्वयुद्धेनयः कश्चिद
वसादमवाप्नुयात् तत्स्वामिनापणो देयोयस्तत्रपरिकल्पितः समाह्वयविषयमेतत्॥ अ
थसादोबलहानिः नारदः अशुद्धः कितवोनान्यदाश्रयेद्यूतमंडलम् प्रतिहन्यान्नकित
वंदापयेतंस्वमिष्टतः अदत्तदेयोशुद्धः स्वंस्वकीयंधनंसाधयति कितवस्तंराजा नवारयेत् ॥६२१॥

३८

प्राप्तेभागेचनृपतिः प्रसिद्धे धूर्तमंडले जितंससभिके स्थानेदापयेद्यथानतु धूर्तोद्यूतकारास्त
न्मंडलेससभिके नृपतितप्रसिद्धे यथापरिभाषते भागेप्राप्ते जितं दापयेदन्यथानैव नारदः
अनिर्दिष्टस्तुयो राज्ञाद्यूतंकुर्वीत मानवः नसतं प्राप्नुयात्कामंविनयंचैवसोर्हति अनिर्दिष्टोयो
नृपेणानियुक्तः सन्द्यूतंकुर्वीत ससभिकोभवन्सतंकामंसभिकलभ्यं भागंनलभेतदंडंचप्राप्नु
यात् कात्यायनः प्रसह्यदापयेद्देयंतस्मिन्स्थानेचनान्यथा जितं वैसभिकस्तत्रसभिकप्रत्यया
क्रिया आनभिज्ञो जितोमोच्यो मोच्योभिज्ञोजितोरहः सर्वस्वेविजितेभिज्ञेनसर्वस्वंप्रदापयेत्॥
बृहस्पतिः रहोजितो नभिज्ञश्चकूटाक्षैः कपटेनवा॥ मोच्योभिज्ञोपिसर्वस्वजितं सर्वेन दाप्यते
द्रष्टारोव्यवहाराणां साक्षिणश्चत एव हि। कितवव्यवहाराणां द्रष्टारोनिर्णायिकाः साक्षिण
श्चतएवकितवाएव नारदः कितवेष्वेवतिष्ठेरन्कितवाः संशयप्रतित एवतत्र द्रष्टारस्तएवैषां
चसाक्षिणः सभिकानुवृत्तोच बृहस्पतिः सएवसाक्षीसंदिग्धंसभ्येश्चान्यैस्त्रिभिर्वृतः कात्याय
नः विग्रहेपज्जयेलाभेकरणे कूटदेविनाम् प्रमाणं सभिकस्तत्रशुचिश्चसभिकोयदि॥ म्लेच्छ

स्वपाकधूर्तानां कितवीनां तपस्विनाम्। तत्कृतावारमेत्त्रणां निश्चयो न तु राजनि राजनीतिपूर्वी
कपूकलसभ्योपलक्षिणार्थम् तेन श्रुताध्ययनसंपन्ना इत्याद्युक्ताः सभ्यास्ते छादिविवादेषु नाद
रणीयाः बृहस्पतिः उभयोरपि संदिग्धं कितवास्तु परीक्षिका यदा विद्वेषणस्तेतु तदा राजा विचा
रयेत् राज्ञा स चिह्नं निर्वास्याः कूटाक्षोपधिदेविनः विसुः धूर्ते च कपटाक्षदेविनाकरच्छेदः उपधि
देविना सदंशच्छेदः अन्यं वचनार्थमन्योन्यसंप्रतिपत्तिः हस्तचातुर्याद्यथाभिमतपातनादिवोप
धिः संदंशच्छेदः अंगुष्ठांगुलीच्छेदः धूतमेकमुखं कार्यं तस्करज्ञानकारणात् धूतमेकमुखमे
कंप्रधानं एकेन राजपुरुषेणाधिष्ठितं तस्करज्ञानार्थं कार्यम्। यत्तु मनुनोक्तम्। धूतं समाह्वयं
चैव यः कुर्याद्यश्च कारयेत्। तान्सर्वान्घातयेद्राजा शूद्रांश्च द्विजलिंगिन इत्यादि। तद्राजपुरुषा
नधिष्ठितधूतविषयम् बृहस्पतिः धूतं निषिद्धं मनुना सत्यशौचधनापहम्। तत्प्रवर्तितमन्यै
स्तु राजाभागसमन्वितम्॥ राजभागरहितं न प्रवर्तयितव्यमिति सर्वः एष एव विधिर्ज्ञेयः प्राणि
धूते समाह्वये एष उक्तप्रकारः प्राणिभिर्मेषमहिषादिभिः साध्ये धूते समाह्वयसंज्ञके वेदि ॥१९८॥

तव्यः इति धूतप्रकरणम् अथ वाक्पारुष्यप्रकरमारभते तत्र स्वरूपमाह नारदः देशजाति
कुलादीनां क्रोशनं न्यंगसंज्ञितम् यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यते क्रोशनमाक्रोशनमा
क्षेपः तत्र देशाक्षेपो यथा गौडप्रतिकलहप्रिया गौडा इति जात्याक्षेपो यथा विप्रं प्रति नितांतलो
लुपा विप्रा इति कुलाक्षेपो यथा कृत्सरिता वैश्या मैत्रा इति न्यंगमसत्यवचनम् का सायन्तः हका
रंकासनं चैव लोके यच्च विगर्हितम् अनुकुर्यादनुब्रूयाद्वाक्पारुष्यं तदुच्यते निष्ठुराश्लीलतीव्र
त्वात्तदपि त्रिविधं स्मृतम् आक्षेपो निष्ठुरं ज्ञेयमश्लीलं न्यंगसंज्ञितम् पतनीयैरुपाक्रोशैस्ती
व्रमाहुर्मनीषिणः यत्तु सत्संज्ञकैरंगैः परमाक्षिपति क्वचित् अभूतैर्वाथ भूतैर्वा निष्ठुरा वाक्
स्मृता तु सा न्यंगावगूरणं वाचा क्रोधणात्कुरुते यदि॥ वृद्धे प्राकुलानां तु अश्लीला सा बुधैः स्मृता
महापातकयोक्त्री च राजद्वेषकरी च या जातिभ्रंशकरी वाथ तीव्रा सा प्रथिता तु वा न्यंगावगूर
णं निष्ठुर न्यंगप्रकाशनेन तिरस्करणम्॥ बृहस्पतिः अप्रियोक्तिस्ताडनं च पारुष्यं द्विविधं स्मृत
म् एकैकं तु द्विधा भिन्नं रम्यश्चोक्तं त्रिलक्षणः देशधर्मकुलादीनां क्षेपः पापेन योजनम् द्रव्यं

Indira Gandhi National
Centre for the Arts

॥

प्र॰ वृ॰ टी॰ विनातुप्रथमंवाक्पारुष्यंतदुच्यते भगिनीमातृसंबद्धमुपपातकशंसनम् पारुष्यंमध्यमंप्रोक्तंवाचि
कंशास्त्रवेदिभिः अभक्ष्यस्यायेयकथनंमहापातकदूषणम् पारुष्यमुत्तमंप्रोक्तंतीव्रंममातिपातन
म् ।दूर्यंविनेसत्रद्रव्यपूर्वोभिधेयपरः तेनोच्चमानार्थव्यतिरेकेनैवंविधमभिधानंवाक्पारुष्यमि
त्यर्थः तत्रवाक्पारुष्यविशेषेदंडविशेषमाह सत्यासत्यान्यथास्तोत्रैन्यूनांगेंद्रियरोगिणाम् क्षे
पंकरोतिचेद्दंड्यःपणानर्धत्रयोदशान् अंगानिकर्मेन्द्रियाणि जिह्वादीनीद्रियाणि पुनःश्रोत्रादी
निज्ञानेंद्रियाणि रोगाःकुष्ठादयः न्यूनांगानीद्रियाणिचयेषां येषांचव्याधयःसंती तेषांक्षेम
मप्रियोक्तिंसत्येनासत्येनविपरीतस्तुत्यावायःकरोति सद्वादशपणान्सार्धान्दंड्यः तत्रसत्ये
नांगहीनक्षेपोयथा पादहीनंप्रतिकुंठस्त्वमित्यादिअसत्येनयथासकलांगंप्रतिजंगस्त्वमितिवि
कलांगंप्रतिसकलांगस्त्वमिति विपरीतस्तुत्याथा हस्तहीनंप्रति सुबाहुर्महाबाहुर्वेति। एवमिंद्रि
यहीनाक्षेपः अर्धत्रयोदशेत्येषांपणानांतेऽर्धत्रयोदशाः यत्तुमनुनोक्तम्। काणंवाप्यथवाखंज
मन्यंवापितथाविधम् तथ्येनापिब्रुवन्दाप्योदंडंकार्षापणावरम् तदादेसुरत्यंतोल्केषेस्वल्पेवाक्षि

॥९४९॥

२१

प्र सा तिपामयोषेग्यास्यम् बृहस्पतिः समजातिगुणानांतुवाक्पारुष्येपरस्परम्।विनयोभिहितः शास्त्रे
पणास्त्वर्धत्रयोदशाविसृः समवर्णाक्रोशनेद्वादशपणान्दंड्यः हीनावर्णाक्रोशनेतुष
ट् यथाकालमुत्तमसमवर्णाक्षेपेतत्समादोदंडस्त्रयोवाकार्षापणाः शुक्तवाक्याभिधा
नेत्वेकमेवअल्पधनविषयमेतत् समवर्णद्विजातीनांद्वादशैवव्यतिक्रमे वादेष्ववचनी
येषुस्यादेवंद्विगुणंभवेत् समवर्णग्रहणमाक्षेप्तुराक्षेप्यस्यचजातितोगुणतश्चसाम्य
प्रतिपादनार्थम्। तेनसर्वसाम्येसति वाक्पारुष्यरूपव्यतिक्रमविषयेद्वादशपणोदमः।
प्राक्लिखितो सवर्णमति
जातिमात्रसाम्येहीनगुणस्यबहुगुणाक्षेपकत्वेद्विगुणोदमः पूर्वलिखितो सवर्णमति
क्रमेद्वादशकार्षापणाः यथारूपविशिष्टाक्षेपद्यविशेषस्यचतुर्विंशतिः अविशिष्टा
तिक्रमेविशिष्टस्यततोधिम् प्रथमेवाक्पारुष्येदंडउक्तः संप्रतिमध्यमेवाक्पारुष्येदंड
माह अभिगंतास्मिभगिनीमातरंवातवेतिहि शपंतंदापयेद्राजा पंचविंशतिकंदमम्
तवभगिनीमातरंवाभिगंतास्मीति एवमाक्षिपंतंपंचविंशतिपणात्मकंदंडंराजादापयेत

प्रा.द.टी. आक्रोशकरस्याहतुः शंखलिखितौ तथा धिक्कृतान्विप्रांश्च गुरूंश्च निर्भर्त्सयतो मुंडनं गो
मयालेपनं खरारोहणं दर्पहरो दंडो वा दंडं अरस्यनुदत्तो विष्णुः गुरूनाक्षारयन् कार्षा
पणशतम् बृहस्पतिः क्षिपन्नस्यादिकं दद्यात्संचाशत्पणिकं दमं अल्पधनविषयमे
तत् प्रथमे मध्यमे च वाक्पारुष्ये सवर्णानां दंडमुक्तः तस्यैवं दंडनीयगुणसद्भावव
तां विशेषमाह अधोऽधर्मवृद्धिगुणः परस्त्रीमूत्रमेषु च विद्यानुष्ठानादिगुणवता अ
धमेष्वधमगुणेषु आक्रुष्टेषु उक्तस्यार्द्धमेव दंडः स्यात् तत्र प्रथमे वाक्पारुष्ये षट्प
णाः पणाश्चतुर्थांशश्च दंडोऽधम मध्यमे तु द्वादशशार्धेयस्करस्त्रीराक्षिपतिः तथा म
गुणसन्युत्तमगुणान् तस्योक्ताद्विगुणो दंडः अत्र प्रथमे वाक्पारुष्ये पंचविंशतिः बृहस्प
तिः समानयोः समो दंडो न्यूनस्य द्विगुणः स्मृतः उत्तमस्याधिकः प्रोक्तो वाक्पारुष्ये परस्प
रम् इदानीं ब्राह्मणादिवर्णानां मूर्धावसिक्तानां द्विजातीनामन्योन्यमाक्रोशे आक्रोश
के भवेराज्ञा दंडनः कल्पनीय इत्याह दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैः वर्णानां द्विजा ॥५४०॥

३२

तीनां च मध्यादुत्तरैश्चाधराणां मधरैश्चोत्तरेषामाक्षेपे कृते स्वयमभ्यूह्य दंडप्रणयनं राजा
कुर्यात् तत्र मूर्धावसिक्ताअंबष्ठादयः अनुलोमजा मातृभिस्तुल्यवर्णाः नामाक्रोशतः पू
र्वोक्तार्धं पंचाशत्संख्याकादमाद्विगुणो दमः शतसंख्याको दमः सकात तएवेक्षेतु ततएव त्रिगु
णः स्यार्धशतिको भवेत् ततश्च क्षत्रियस्य ब्राह्मणं वैश्यश्च क्षत्रियमाक्रोशतः शतसंख्याको
दमः वैश्यस्य ब्राह्मणाक्रोशे अध्यर्धशतं शूद्रस्य वैश्याक्रोशे शतम् क्षत्रियाक्रोशे अ
ध्यर्धम् ब्राह्मणाक्रोशे तु दंडोत्तराविधायकानि स्मृत्यंतराणि उदाहरिष्यंते उत्तरेण
वर्णानाधरस्यादोयोनुलोमापवादः तत्र क्षत्रियस्य ब्राह्मणमाक्षिपतो दंडः पणशतात्मकोऽ
२ भिहितः तदर्धं पंचाशत्पणिकः क्षत्रियापेक्षे ब्राह्मणस्य दंडः वैश्याक्षेपे पंचविंशतिकः शूद्र
क्षेपे सार्द्धद्वादशपणाः अस्य च व्याख्यानस्य पंचाशद्ब्राह्मणो दंड्यः क्षत्रियस्याभिशंसने
वैश्यस्याप्यर्धपंचाशच्छूद्रे द्वादशको दमः इति मनुवाक्यं मूलम् एवं क्षत्रियो [illegible] वैश्यमा
क्रोशन् पंचाशद्दंड्यः शूद्रे तु पंचविंशतिः वैश्यस्य शूद्राक्रोशे पंचाशदेवं शूद्रस्य ब्राह्मणाक्रो

Indira Gandhi National Centre for the Arts

व॰ही॰ ष्टो मनुराह शतंब्राह्मणमाक्रुश्यक्षत्रियोदंडमर्हति वैश्योप्यर्द्धशतंद्वेवाशूद्रस्तुवधमर्हति। वधोत्र
जिह्वाछेदः यदाहसएव। एकजातिर्द्विजातींतुवाचादारुणयाक्षिपेत् जिह्वायाः प्राप्नुयाछेदंजघ
न्यप्रभवोहिसः नामजातिग्रहंत्वेषामभिद्रोहेणकुर्वतः निक्षिप्योयोमयःशंकुर्ज्वलन्नास्येद
शांगुलः असंताभ्यासेएतेतत् धर्मोपदेशंधर्मेण द्विजानामस्यकुर्वतः तप्तमासेचयत्तैलंव
क्त्रेश्रोत्रेचपार्थिवः अस्येतिशूद्रस्य बृहस्पतिः वैश्यमाक्षारयन्शूद्रोदाप्यः स्यात्प्रथमंदमम्
क्षत्रियमध्यमंचैवविप्रमुत्तमसाहसम् धर्मोपदेशकर्ताच्चवेदोदाहरणान्वितः आक्रोशक
श्चविप्राणांजिह्वाछेदनमर्हति गौतमः शूद्रोद्विजातीमभिसंधायाभिहत्यवाग्दंडपारुष्या
भ्यामंगंमोच्योयेनाभिहन्यात् अथास्यवेदमुपशृण्वतस्त्रपुजतुभ्यांश्रोत्रपूरणम् उदाहर
णाज्जिह्वाछेदः धारणेशरीरभेदः विष्णुः श्रुतदेशजातिकर्मणामन्यथावादीकार्षापणश
तंदंड्यः नारदः नकिल्विषेणापवदेच्छास्त्रतः कृतपावनम् नराज्ञोधृतदंडंतुदंडभा
क्तद्व्यतिक्रमात् वाहुग्रीवानेत्रसक्थिविनाशेवाविकोदमः सत्यस्ततोधिकः पादः नासिक ॥६२॥

२३

र्णकरादिषु वाह्वादीनांवचनेनविनाशक्रियोत्तव वाहुरवंजयामीत्येव मात्मिकंकुर्वतः शस्यः शा
तपरिमाणोदंडोग्राह्यःपादनासादेर्वाचनिकंनात्माचरतः शता। धिकोदंडआदेयः सामान्ये
नोक्तस्यविषयविशेषेव्यवस्थामाह। अपशक्तस्तुवदन्नेवंदंडनीयः पणान्दशयथाप्रोक्तः
प्रतिभुवंदाप्यः क्षेमायतस्यतु वाह्वादिछेदंकर्तुसमर्थः सयदितंब्रूयात्तदोक्तंदंडंगृहीत्वाधि
क्तस्यक्षेमायपरिरक्षणार्थंप्रतिभुवंदाप्यः वाह्वादिछेदासमर्थस्तुदशैवपणान्दाप्यः पतनी
यकृतक्षेपेदंडोमध्यमसाहसः उपपातकयुक्तंतुदाप्यः प्रथमसाहसम् पतनीयैःपतित
त्वकारणैर्ब्रह्महत्यादिभिः ब्रह्महात्वमसीत्यादिवाक्षेपकृतेसाध्यमसाहसोदंडोभवति उप
पातकहेतुभिर्गोवधादिभिराक्षिपन्प्रथमसाहसंदाप्यः व्यासः पापोपपातवक्तारोमहापात
कशंसकाः आद्यमध्योत्तमान्दंडान्दद्युस्त्वेवंयथाक्रमम् उपपातकगणोयत्रनिर्दिष्टःशा
स्त्रतः प्रतिषिद्धंचतदिहपापशब्दवाच्यम् विष्णुः परस्यपतनीयक्षेपकृतेत्तमसाहसम्
उपपातकयुक्तेतुमध्यमम्। उत्तमवर्णाक्षेपविषयमेतत् तत्रैवविद्यन्यपदेवानां क्षेपेउत्तमं

Indira Gandhi National
Centre for the Arts

वी·व·टी· साहसः मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः ॥ उपमन्युः सामवेदानां स्पपतेर्ब्रह्मादिदेवानांवा
क्षेप्तुरुत्तमसाहसो दंडः कार्यः ब्राह्मणादिजातीनां पूगानां परिषदादीनां व्यवहारनिर्णयाद्येककार्यका
रिणां विदुषांमाक्षेप्तुर्मध्यमसाहसः ग्रामस्य जनपदस्य वाक्षेपं कुर्वतः प्रथमसाहसः विष्णुः त्रैविद्य
वृद्धानां जातिपूगानां च ग्रामदेशयोः प्रथमम् अल्पाधायदोषविषयमेतत् बृहस्पतिः देशादिकं
क्षिपन्यस्य पणान् धर्मत्रयोदशान् पापेन योजयंदर्पात्स्य प्रथमसाहसम् उशनाः मोहात्प्रमादा
त्संहर्षात्प्रीत्यावोक्तं मयेति यः नाहमेवं पुनर्वक्ष्ये दंडार्धं तस्य कल्पयेत् ॥ बृहस्पति एष दंडः समाख्या
तः पुरुषापेक्षया मया समन्यूनाधिकत्वेन कल्पनीयो मनीषिभिः इति वाक्पारुष्यप्रकरणम् अ
थ दंडपारुष्ये निमित्ते दंडविधिः उदंडपारुष्यं नाम परशरीरस्य ताडनं नामे ध्यसंयोजनेन ताडनार्थम
वगूरणेन वा परस्य वा दुःखोत्पादनम् तदाह नारदः परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः तस्मा
दिभिश्चोपघाते दंडपारुष्यमुच्यते तथा तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात् अवगूरणनिः
संगपातक्षतजदर्शनैः हीनमध्योत्तमानां तु वर्णानां क्रमतिक्रमात् बृहस्पतिः हस्तपाषाणलगुडैर्भ

॥१५२॥

२५

दृस

स्मकर्दमपांशुभिः आयुधेश्च प्रहरणैर्दंडः पारुष्यमुच्यते तत्रापरधर्मसंदेहे निर्णयहेतूस्ताव
दाह ॥ असाक्षिके हते चिन्हैर्युक्तिभिश्चागमेन च द्रष्टव्यो व्यवहारस्तु कूटचिन्हकृताद्भयात् असाक्षिके
देशेऽहमनेन हत इति केनचिद्राज्ञे निवेदिते राज्ञा सभ्यैश्च द्वेषादिकृतं मिथ्याचिन्हं वर्जयित्वा अन्यै
श्चिन्हैर्युक्तिभिरागमेनाप्तवाक्येन च कारादिभिश्च विवादोऽयं वादी साधुरयमसाधुरिति विचार्य्य नि
र्णतव्यः चिन्हं क्षतादि युक्तिभिः हर्तृहंतव्ययोः सन्निधानं द्वेषहेतुसंभवइत्यादि आगम आप्तवा
क्यं केचित्पठंति कूटचिन्हकृताद्भयादिति तस्यार्थः व्रणादिदर्शनमात्रेण विनाविचारनि
र्णयः कार्यः यतो मत्सरादिवशात्कूटकृत्रिममपि चिन्हं संभाव्यते नारदः कश्चित्कृत्वात्मनश्चिन्हं
द्वेषात्परमभिद्रवेत् युक्तिहेत्वर्थसंबंधैस्तत्र युक्तं परीक्षणम् युक्तिरर्थापत्तिः हेतुरनुमानात् अ
र्थः प्रयोजनम् संबंधः प्राप्तिः सन्निधिरितियावत् पूर्वकलहो वा कात्यायनः हेत्वादिभिर्नेपपद्येच्चे
द्दंडपारुष्यकारणम् तत्र साक्षीकृतं चैव दिव्यं वा विनियोजयेत् साक्षीकृतं साक्षिस्थानेकृतम् ॥
नारदः पारुष्ये सति संबंधात्सन्नेयुद्ध्यो र्द्वयोः सामान्यतेयः क्षामेत दंडभाग्योनिवर्तते पारुष्यदो

पा॰व॰टी॰ प्रवृत्तयोर्युगपत्सं प्रवृत्तयोः विप्रो यश्चेन्नद्दपूर्पेतविनयः स्यात्समस्तयोः बृहस्पतिः द्वयोः प्रवृ
त्तोर्दंडः समस्तयोस्तु समः स्मृतः आरंभको नुबंधी च दाप्यं स्यादधिकं दमम् नारदः॥
द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः स रूपांदंडमाप्नोति पूर्वो यथा यदि वा परः पूर्वमा
क्षारयेद्यस्तु नियतः स्यात्सदोषभाक् पश्चाद्यः सोप्यसत्कारी पूर्वेतु विनयो गुरुः कात्या
यनः आभीषणेन दंडेन प्रहरेद्यस्तु मानवः पूर्वंचापीडितो वाचः सदंड्यः परिकीर्ति
तः बृहस्पतिः पूर्वाक्रुष्टः समाक्रोप्य स्ताडितः प्रतिताडयेत् हत्वाततायिनं चैव नापरा
धी भवेन्नरः वाक्पारुष्यादिना नीचोप्यसंमेतभिलंघयेत् स एव ताडयंस्तस्य नान्वे
ष्यो महीभुजा॥ वाक्पारुष्यादिना नीचेनाभिलंघिते साधौ साधुर्यदि नीचं ताडये
त् तदा राज्ञा सोन दंडनीय इत्यर्थः नारदः श्वपाकपिंडचंडालतवेश्यासु धनवत्तिषु हस्ति
पंद्रास दारेषु गुर्वाचार्यातिगेषु च मर्यादातिक्रमे सद्यो घातयेच्चानुशासनम् न च तद्दंड
पारुष्ये दोषमाहुर्मनीषिणः यमेव ह्यतिवर्त्तेत बर्तेरन्नेते संतं जनं नृषु स एव विनयं ॥१३३

२५

कुर्यान्न तद्विनयभाग्भवेत् मलाह्येते मनुष्याणां मलमेयां धनात्मकम् अपितान् घातयेद्रा
जानार्थिदंडेन दंडयेत् कात्यायनः अस्पृश्यधूर्तदासानां म्लेच्छानां पापकारिणाम् प्रति
लोमप्रसूतानां ताडनं नार्थतो दमम् भस्मपंकरजःस्पर्शे दंडो दशपणः स्मृतः अमेध्य
पाणिनिष्ठतस्पर्शे नेद्विगुणस्ततः समेष्वेव परस्त्रीषु द्विगुणस्त्तुत्तमेषु च हीनेष्वर्धम
दमः प्रोक्तः कोदमाविभिरदंडनम् जातितो गुणतो वा तुल्यं परं भस्मकर्दम धूलिभिर्योज
तो दशपणो दंडः यदि पुनरमेध्यादिभिर्योजयति तदा विंशतिपणः अत्र यदि परस्त्रीम
त्रेतथा जातितो गुणतो वोत्कृष्टेषु नरेषु उक्तमपराधं कुर्यात् तदा पूर्वोक्तादंडाद्विगुणो
दंडः कार्यः विंशतिपणः स्यात् यत्र विंशतिपणस्तत्र चत्वारिंशत्पणः स्यात् जातितो गु
णतो वा हीनविषये उक्तस्यार्धं दंडनीयः मदादिना त्वभज्ञानस्यापराधाभावतो दंडाभा
वः अमेध्यं मूत्रतुल्यो निःष्यंदो भवति तथाभिघातेकृते मध्यमो दंडः अत्र च विषमस
मीकरणमनुबंधादितारतम्येन कल्प्यम् कात्यायनः कर्णौष्ठघ्राणपादाक्षिजिह्व

Indira Gandhi National
Centre for the Arts

वा·वृ·टी· नांशिश्नकस्य च छेदने चोत्तमो दंडो भेदने मध्यमो भृगुः विष्णुः उभयनेत्रभेदिनां राजा
यावज्जीवनं मुंचेद्दृढ धातुताद्दृश्यमेव कुर्यात् किंच चेष्टाभोजनवाग्रोधने त्रादिप्रतिभेद
नेकंधरा वा हस्त कर्ण्य त्रिभेदं मध्यमसाहसः चेष्टा गमनागमनमुत्रपुरीषोत्सर्गादिः
भोजनमभ्यवहारः वागाहारः एषां कस्यचिद्रोधे प्रतिबंधे नेत्रादेश्च ज्ञानेंद्रिया
धिष्ठानस्य प्रतिभेदने तदधिष्ठानविधाना[?] कंधराया ग्रीवायावाहोः सक्थ्य
जघनस्यां घ्रेपादस्य वा भंगे मध्यमसाहस एव दंडः पूर्वमि दंचवाक्यं ब्राह्मणव्यति
रिक्तस्य समानजातीयमपराध्नुवतो दंडं विधायकम् चेष्टाभोजनवाग्रोधे प्रहार
दानेन च नेत्रकंधरवाहुसक्थिभंगे चोत्तमम् उत्तममुत्तमसाहसो दंड इति प्रोषः अत्र
क्षत्रियस्य वैश्यमपराध्नुवतो वैश्यस्य च क्षत्रियपराध्नुवतो यथाक्रमं दंडदानेम
धमोत्तमसाहसयोर्विपर्य्यव्यवस्था अथ वा मध्यम मध्यमसाहसविधिः शूद्रस्य स
मानजातीयापराधे उत्तमसाहसस्तु समानजातीयापराध एव क्षत्रिय[?]वैश्ययोः

॥१३४॥

२६

किंच एकं घ्नतां वहूनां तु यथोक्ताद्द्विगुणो दमः कलहापहृतं देयं दंडश्च द्विगुणस्तथा
यदा पुनरेकं प्रतिबहवो हंतारः दंडपारूष्यकर्त्तारो भस्मकर्दमपांशुसंयोगकर्त्तारो भवंति॥
तदा तेषां तस्मिन्विषये यो दंड उक्तस्तस्माद्द्विगुणो दंडः प्रत्येकं कार्यः कलहे च वर्त्तमाने ये
न यस्य यदपहृतं तेन तस्मै तद्देया ततो द्विगुणं धनं राज्ञे देयम् विष्णुः एकं वहूनां घ्नतां
प्रत्येकस्योक्ताद्दंडाद्द्विगुणः आक्रोशंतमनभिधावतां समीपवर्त्तिनां च कात्यायनः वाग्दं
उत्ताडने चैव ये प्रक्रमपराधिषु क्षतं भग्नं प्रदाप्यास्ते प्रोक्ता धर्मनिःस्वेस्तु कर्मणा॥ दुःख
मुत्पादयेद्यस्तु समुत्थानधनव्ययम् दाप्यो दंडं च यो यस्मिन्कलहे समुदाहृतः य
स्तु प्रास्त्रादिताडनेन परस्य दुःखमुत्पादयेत्॥ सत्रणारोपणादौ समुत्थाने यो धन
व्ययस्तं दद्यात् यश्च यस्मिन्कलहे दंडः पारुष्ये दमउक्तस्तं च राज्ञे दद्यात् वृहस्पतिः
अंगावपीडने चैव भेदने छेदने तथा समुत्थानव्ययं दाप्यः कलहापहृतं च यत् कात्या
यनः देहोपद्रवनाशं तु यथा दंडं प्रकल्पयेत् तथा तुष्टिकरं देयं समुत्थानं च पंडितैः

Indira Gandhi National
Centre for the Arts

नं॰व॰टी॰ समुत्थानव्ययं चासौ दद्याद्व्रणरोपणात् मनुः भार्यापुत्रश्च दासश्च प्रेष्यो भ्राता च
सोदरः प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा पृष्ठतस्तु शरीरस्य नोत्तमांगे क
दाचन अतोन्यथा तु प्रहरन्प्राप्तः स्याच्चौरकिल्बिषम् किल्बिषं दंडः ब्रह्मचार्यधिका
रे नारदः अनुशास्यो गुरूणां तु न्वेदनुविधीयते अवधेनाथवा हन्याद्रज्ज्वा वेणुद
लेन वा मृदुं न ताडयेदेनं नोत्तमांगेन चोरसि अनुशास्य च विश्वास्यः शास्यो राज्ञा
न्यथा गुरुः पुत्रापराधे न पिता श्ववान्न श्रुतिदंडभाक् न मर्कटेषु तत्स्वामीति नैतत्स
हतानचेत् अवधेर्न हिंसया अभिघाते तथा छेदे भेदे कुड्यावपातने पणान्दाप्यः
पंचदश विंशतिं तद्व्ययं तथा कुड्यस्यापहती पंचपणान्दाप्यः छेदादौ भेदे तावद्विंश
तिम् पातने पिता कुड्यस्य व्ययं स्वामिने दाप्यः दुःखोत्पादि गृहे द्रव्यं क्षिपन्प्राणहरं त
था षोडशाद्यः पणान्दाप्यो द्वितीयो मतिपो मध्यमं दमम् यः पणहे षु दुःखोत्सादकं
वृश्चिकादि क्षिपेत् स षोडश पणान्दाप्यः यस्तु प्राणहरं सर्पादि स मध्यमसाहसम्

॥११५॥

२०

दुःखेन शोणितोत्पादे शाखांगछेदने तथा दंडः क्षुद्रपशूनां तु द्विपणप्रभृति क्रमात् लिंग
स्य छेदने मृत्यौ मध्यमो मूल्यमेव च क्षुद्रपशु नामजादीनां ताडननिमित्ते दुःखे शोणितस्रावे
शाखायाः भंगस्य छेदने अंगस्य पदादेः छेदने कृते सति यथाक्रमं द्विगुणप्रभृति दंडः द्वि
गुणादुत्तर उत्तरः पूर्वस्मात्पूर्वस्माद्द्विगुणः तत्र दुःखोत्पादे द्विपणः शोणिते चतुष्पणः भंगे छेदे
ऽष्टपणः अंगछेदे षोडशपणः एवमेव पशूनां लिंगस्य पुंस्त्वछेदे रेषण चूर्णने मध्यमसाहस
मृतौ तु तत्कृतेम मूल्यं पशुस्वामिने राज्ञे च मध्यमसाहसं दद्यात् महापशूनामेतेषु स्थानेषु द्विगुणो
दमः क्षुद्रपशुसंबंधीनि दंडनिमित्तानि यान्युक्तानि तानि यदा महापशूनां गवादीनां तदा तत एव
द्विगुणो दंडो वेदितव्यः कार्षापणशतं दंड इत्यनुमाने विष्णुः पशूनां पुंस्त्वोपघातकारी तथाश्वो
ष्ट्रगोघातकारी च कार्षापणशतं दंड्यः पशुस्वामिनश्च तन्मूल्यं दद्यात् आरण्यपशुघाती पंच
शतकार्षापणानाम् पक्षिघाती मत्स्यघाती च दशकार्षापणान्कीटोपघाती कार्षापणम् मनुः
गोकुमारीदेवपशून्उक्षाणं वृषभं तथा वाहयन्साहसं पूर्वं प्राप्नुयादुत्तमं वधे कात्यायनः श्रोतास्व

Indira Gandhi National
Centre for the Arts

भार्तान्क्षुधितान्कालेवाहवन्नरः खरगोमहिषोष्ट्रादीन्प्राप्नुयात्सर्वसाहसम् प्ररोहिशाखिनांशाख
स्कंधसर्वविदारणे उपजीव्यद्रुमाणांचविंशतेर्द्विगुणोदमःप्ररोहिणांन्यग्रोधादीनांशाखिनांवृक्षा
णांचशाखायस्कंधस्यसर्ववृक्षस्यचभेदनेउपजीव्यानांचरकाम्रादीनांयथाक्रमंयोदंडोभवतित
त्रशाखायाभेदनेविंशतिः स्कंधस्यद्विगुणाश्चत्वारिंशतिः सर्वस्यद्विगुणअशीतिः प्ररोहोन्यग्रोधः
स्कंधःप्रधानशाखामूलम् चैतस्मशानसीमासुपुण्यस्थानेसुरालये जातद्रुमाणांद्विगुणोदमोवृक्षे
चविश्रुते चैत्यादिस्थानजातानांद्रुमाणांशाखास्कंधसर्वविदारणेषुविश्रुतद्रुमविषयेषुचपूर्वोक्ता
विंशत्याद्योदमाद्विगुणावेदितव्याः चैसंमनोहरेस्थानेगुल्मगुच्छक्षुपलताप्रतानौषधिर्वीरुधाम
पूर्वस्मृतादर्धदंडःस्थानेषुक्तेषुकर्तनेवृक्षेभ्योन्यूनपरिमाणाउद्भिज्जागुल्माःकुब्जकादयःततोन्यून
परिमाणगुच्छाः ततोपिह्रस्वीयांसःक्षुपाः लतावल्लयः एवस्थूलाःप्रतानाश्रीह्रिमवादयःफलपाकांता
ओषधयःबीजकांडप्ररोहिण्योवीरुधःआसांपूर्वोक्तेषुदंडनिमित्तेषुपूर्वोक्तदंडानामधर्मर्धंग्राह्यम्
मनुःवनस्पतीनांसर्वेषामुपभोगोयथायथा तथातथादमःकार्योहिंसायामितिधारणा विष्णुःफलो

॥१२६

२८

भोग
पद्रुमछेदीतत्तमसाहसंदंडः पुष्पोपभोगछेदीमध्यमम् वल्लीगुल्मलताछेदीकार्षापणश
तम् तृणछेद्येकम् सर्वेषांचतत्स्वामिनांतद्युत्पति इतिदंडपारुष्यप्रकरणम्॥ साहसंप्रसाह सा
मान्यद्रव्यप्रसभहरणंसाहसंस्मृतम् सात्मन्यस्यानेकेषांभ्रात्रादीनांस्वामिनांमध्यमकस्यधन
स्यप्रसभंस्वामिसमक्षंतानवगणय्यहठादपहरणंसाहसम् एतच्चनसाहसस्यलक्षणम् तल्ल
क्षणंत्वाह नारदः सहसाक्रियतेकर्मयत्किंचिद्बलदर्पितैः तत्साहसमितिप्रोक्तंसहोबलमिहोच्य
ते मनुष्यसाधारणचौर्यपराभिमर्षणम् पारुष्यमुभयचेतिसाहसेपंचधास्मृतव्यापादोविष
शस्त्राद्यैः परदाराभिमर्षणप्राणोपरोधिमच्चान्यदुक्तमुत्तमसाहसःवासःपश्वन्नपानानांग
होपकरणस्यच एतेनैवप्रकारेणमध्यमंसाहसंस्मृतम् बृहस्पतिः हीनमध्योत्तमत्वेनत्रिवि
धंतत्प्रकीर्तितम् द्रव्यापेक्षोदमश्चात्रप्रथमोमध्यउत्तमः मध्यकधनापहारेमाह तन्मूल्या
द्द्विगुणोदंडोनिह्नवेतुचतुर्गुणः अपहतद्रव्यमूल्यमपेक्ष्यद्विगुणोयस्तुदमःअपहारापन्हवेअप
लापेतुकृतेतन्मूल्यश्चतुर्गुणः बृहस्पतिः क्षेत्रोपकरणंसेतुमूलपुष्पफलानिच विनाशयन्हर

न. च. टी. ॥ दंभः प्रतोधमनुरूपतः पशुवस्त्रान्नपानानां गृहोपकरणं तथा हिंसयं श्चोरवत्प्राप्यो द्विपातो
धंदमंतथा स्त्रीपुंसौ हेमरत्नानि देवविप्रधनंतथा कौशेयंचोत्तमंद्रव्यमेषामम्यस्ससमोरभः
द्विगुणोवाकल्पनीयः पुरुषावेक्षयान्यैः हंतावाघातनीयः स्यात्प्रसंगविनिवृत्तये नारद
तस्यदंडः क्रियापेक्षः प्रथमस्य शतावरः मध्यमस्यतुशास्त्रज्ञैर्दृष्टः पंचशतावरः उत्तमेसाहसे
दंडः सहस्रावरइष्यते वधः सर्वस्वहरणंपुरान्निर्वासनांकने तदंगच्छेदइत्युक्तो दंडउत्तमसा
हसे स्यातांसंव्यवहार्यौ द्वौधृतदंडौतुपूर्वकौ धृतदंडोप्यसंभाष्यो ज्ञेयउत्तमसाहसे मनुः
द्रव्याणि हिंसाद्योयस्यज्ञानतोज्ञानतोपिवा सतस्योत्पादयेत्तुष्टिं राज्ञेदद्याच्चतत्समम् चर्मचा
मिकभांडेषु काष्ठलोष्ठमयेषु च मूल्यात्पंचगुणोदंडः पुष्पमूलफलेषु च कात्यायनः क्षंतंम
र्षोपभोगौ च कुर्याद्द्रव्येषु योनरः प्राप्नुयात्साहसंपूर्वं द्रव्यभाक्स्वामुदाहृतः यःसाहसंकारयति
सदाप्यो द्विगुणंदमम् यश्चैवमुक्ताहंदाताकारयेत्सचतुर्गुणम् साहसकर्तुर्योदंडउक्तः स
त्वयोजयितुर्द्विगुणः यस्तु मदीयंसाहसंभवान्कुरुते तदैवाहंभवतोधनंदास्यामि इत्युक्ताद ॥१३७

३९

स्यति तस्यचतुर्गुणोदंडः कात्यायनः आरंभकृत्सहायश्च तथामार्गानुदेशकः आश्रयः शस्त्र
दाताचभक्तदाताविकर्मिणाम् युद्धोपदेशकश्चैव तद्विनाशप्रदर्शकः उपेक्षाकार्ययुक्त
स्यदोषवक्तानुमोदकः अनिषिद्धुः क्षमोयः स्यात्सर्वेतत्कार्यकारिणः यथाशक्त्यनुरूपंतु दंडमे
षांप्रकल्पयेत् अर्थीक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारकः संदिष्टस्याप्रदाताच समुद्रगृह
भेदकृत् सामंतकुलिकादीनामपकारस्यकारकः पंचाशत्पणिकोदंडएषामितिविनिश्च
यः अर्थीलोपहृत्यानामप्रियोक्तिपरिभवयोः कर्ताभ्राताभार्यायास्ताडयिता प्रतिश्रुतस्याप्रदाता
मुद्रावतोगृहस्यभेत्ता सामंतानांसमीपगृहक्षेत्रादिस्वामिकुलिकानांकुलोद्भूतानामन्येषांच
साधूनामपकर्ता इत्येषांप्रत्येकंपंचाशत्पणिकोदंडः शास्त्रेषुविनिश्चितः मनुः अभक्ष्यमथवा
९७ पेयंवैश्यादीन्भैयन्द्विजान्जघन्यमध्यमोत्कृष्टदंडानर्हेयथाक्रमम् पणाः शूद्रेभवेद्दंडः
चतुष्पंचाशद्वेतुयसितारः स्वपंक्तौ येराज्ञानिर्विषयास्तुतेविदुः जातिभ्रंशकरस्याभक्ष्य
स्यभक्षयिता निर्वास्यः मनुः अभिचारेषु सर्वेषु कर्तव्योद्विशतोदमः मूलकर्माणि विद्वेषस्य

Indira Gandhi National
Centre for the Arts

व·टी· पुविविधासु च अदूषितानां द्रव्याणां दूषणे भेदने तथा मणीनामपवेधे तु दंडः प्रथमसाह
सः यो लोकाद् धर्मो जात्या जीवेदुत्कर्षे कर्मभिः तां राजा निर्धनं कृत्वा क्षिप्रमेव विवासयेत्
तथा संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः प्रतिकुर्याच्च तत्सर्वं पंच दद्याच्छतानि च कास्या
पनः हरेङ्गिं याद् धेद्यापि देवानां प्रतिमापादि। तद्धृह वेवयो भिंद्यात्सा भुयात्स्वं सहसं विष्णुः
अभक्ष्यस्याविक्रेयस्य विक्रयी देवप्रतिमाभेदकश्च वोत्तमसाहसं दंडनीयः नारदः अविक्रे
याणां विक्री एणं ब्राह्मणः प्रस्रुतः पथः मार्गे पुनर्वस्थां प्यो राज्ञा दंडेन भूयसा।।यमः यस्तु
पूर्वं निविडं स्मृतं गां सो दकं हरेत् आगमं चाप्ययो भिंद्यात् स दाप्यः पूर्वसाहसम् तडाग
भेदकं हन्यादप्सु शुद्धवधेन वा तद्याप्यपि प्रतिसंस्कुर्यात् दद्याद्वोत्तमसाहसम् अत्र बधः शूद्रा
देः दंडांतरं द्विजातेः स्वच्छया विधवागामी विकुष्टेन विधावकः अकारणे च विक्रोष्टा श्व
डात्त्वश्चोत्तमास्यस्पृक् शूद्रप्रव्रजितानां च देवे पित्र्ये च भोजकः अयुक्तशपथं
कुर्वन् नयोग्यो योग्यकर्मकृत् वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् साधारण

॥५५॥

स्यापलापी दासीगर्भविनाशकृत् पितापुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यका एषामप
तितान्योन्यत्यागी च शतदंडभाक् स्वच्छंदेन कयान शास्त्रवशात् विधवागामी चौरादि
भिरभिभूयमानेन जनेन विक्रुष्टेन धावतधावत रक्षातेस्वने कृते विक्रोशं प्रसन्नभि
धावकः अकारणे चौराद्युपद्रवविरहेपि विक्रोष्टा उत्तमान् द्विजातीन् बुद्धिपूर्वं चंडा
लः स्यात् शूद्राणां प्रव्रजिनां देवान्पित्रन्वोदिश्य भोजयिता अयुक्तमनर्हको शपथादि
कं ब्राह्मणोपि कुर्वन् वृषस्योक्ष्णः क्षुद्रपशूनां मज्जाविकादीनां च पुंस्त्वप्रतिघातं वृषण
मर्दनेन करोति साधारणं स्वस्यान्यस्य च यद्द्रव्यं तस्यापलापी वा दासीगर्भविनाशकः
पित्रादीनामपतितानामन्योन्यत्यागी च शतसंख्याकपणदंडभाक् शंखलिखितौ
अत्याज्यामाता तथा पिता सपिंडा गुरवश्चैते सर्वे ए दूत्याज्याः पस्य जेत्कामाद् पति
तान्स्य दंडं प्राप्नुयाद्द्विगुणं शतं न मातापितरावतिक्रामेत् न गुरुम् त्रयाणां व्यतिक्रमे
दंगच्छेदः गुरुरत्राचार्यः न पिता तस्य पथगुपादानात् येनांगेनातिक्रामेत् तस्य छेद

Indira Gandhi National
Centre for the Arts

इत्यर्थः मनुः नमातानपितानस्त्रीनपुत्रस्त्यागमर्हति सजन्त्यतितानेतान्राज्ञादाप्यःश
ग॰व॰टी॰ तानिषट् समुचितानांत्यागेएतत् इतिसाहसंप्रकरणम् ॐ वस्त्रानस्त्रीपणान्दाप्योनेज
कस्तुपरांशुकम् विक्रिया वक्रयाधानयाचितेषुपणान्पूतः रजको यदिपरकीयंवासःप्रक्षा
लनायनीतंस्वयंवस्त्रेपरिधत्ते तदात्रीन्पणान्दाप्यः अथतस्यैववाससोविक्रयादिकंक
रोतितदाशतपणान्दाप्यः अवक्रयोभाटकेनदानम् अधानमुत्तमर्णेअर्पणम् आधित्वेनय
नंयाचितंयाचितकम् मनुः शाल्मलेफलकेश्लक्ष्णेनिज्याद्वासांसिनेजकः नचवासां
सिवासोभिर्निर्हरेन्नचवासयेत् वासोनिर्वेष्टितावासांसिननयेत् नवासयेत् स्वगृहेन
स्थापयेत् धनमादायाछादनार्थंनदद्यादितिवार्थः पितापुत्रविरोधेतुसाक्षिणांत्रि
पणोदमः अंतरेतुतयोर्यःस्यात्तस्याप्यष्टगुणोदमः पितापुत्रयोर्विरोधेवादेतयोःप्रति
पक्षोनिरासासमर्था अपि तमनिरस्यसाक्षिणोयेभवंति तेषांत्रिपणोदमः यस्तुतयो
रंतरेप्रतिभूत्वेजितधनादानामापतिष्ठेत् तस्यत्रिपणादष्टगुणोदंडः विष्णुः पितापु ॥९५

२१

त्रविरोधसाक्षिणांदशपणोदंडः यस्तयोरंतरेस्यात्तस्योत्तमसाहसः निर्बंधातिशयेये
तु यौखलिखितौ पितापुत्रयोर्विरोधेसाक्षीनतिष्ठेत् यस्तिष्ठेत्सदंड्यःस्त्रीन्कार्षापणान् यश्चांतरे
तिष्ठेत्सोष्टशतंदाप्यः मध्यमापराधविषयमेतत् तुलाशासनमानानांकूटकृन्नाणकस्यच एभि
श्चव्यवहर्तायःसदाप्योदममुत्तमम् तुलादीनांकूटकृत् तथाकूटैश्चतुलादिभिर्नानपूर्वयोव्य
वहरतिसउत्तमसाहसंदाप्यः धरिममेयाणांमानदंडस्तुलाशासनंदत्ताभूमिनिबंधवेसन्नो
कम् एतच्चोपलक्षणार्थं मानंकुडवादिनाणकंद्रम्मादि अकूटंकूटकंब्रूतेकूटंचाप्यकूटकं
म् समाणकपरीक्ष्यादिदाप्यःउत्तमसाहसम् येनरणकस्यद्रम्मादेःपरीक्ष्याजीवति सत्वेरकूट
मसमीचीनमितिब्रूयात् कूटंचाकूटमिति तदेवसउत्तमसाहसंदंड्यः एतच्चतत्ववेदिनोणहेषा
दिवशात्मन्यथाब्रुवतोदमविधानम् भिषग्मिथ्याचरत् दाप्यस्तिर्यक्षुप्रथमंदमम् मानुषेमध्य
मंराजमानुषेतूत्तमंदमम् तिर्यक्षुगवादिषुमिथ्योचिकित्सामाचरन्वैद्यःप्रथमंसाहसंदंड्यः मा
नुषेमध्यमसाहसम् राजसंबंधिमानुषेतुपुनरुत्तमसाहसंदाप्यः अथशास्त्रमिथ्या। वासः भिषज्ये

Indira Gandhi National
Centre for the Arts

द्रव्यभेदेन केपायंति विविधैर्नरान् व्याधिप्रकोपं कृत्वा तु धनं गृह्णंति चातुराः बृहस्पतिः अज्ञानन्नौष
१.व.टी. धंतंत्रं यश्च व्याधेस्तंत्रवित् रोगिभ्योर्थमुपादत्ते सदंड्यश्चौरवद्भिषक् तंत्रंप्रास्त्रम् विष्णुः उत्तमंसा
हसंदद्यात्भिषक् मिथ्याचरन्नुत्तमेषु पुरुषेषु मध्यमं मध्यमेषु तिर्यक्षु प्रथमम् अवध्यं यश्च
वध्नाति वद्धं यश्च प्रमुंचति अप्राप्तमवहारं च स दाप्योदममुत्तमम् अवध्यं बंधानर्हं महोवारो बं
यो वध्नाति राज्ञा वंधनिगडितं यो दयात्समुंचति यथाप्राप्तव्यवहारं वादिनं मुंचति स उत्तमसाह
संदाप्यः विष्णुः दंडमुत्मोचयन्दंड्यात् द्विगुणे दंडमावहेत् नियुक्तश्चापि दंड्यानां दंडकारी नराधमः
यो दंड्यः दंडेन राज्ञा निर्मुक्तः स दंड्याद्दंडं मुंचति अदंड्यं च दंडयति तस्य द्विगुणो दंडः मानेन तुलया वापि
योंशमष्टमकं हरेत् दंडं सदाप्यो द्विशतं वृद्धौ हानौ च कल्पितम् यो मानेन कुडवादिना तुलया वाप
णस्य क्रये विक्रये वा अष्टमं भागमपहरेत् स पणशतद्वयं दाप्यः अष्टमानं भागाद्वृद्धावधिके हानौ
ऽल्पेऽपन्हवे तदनुसारेण कल्पितं दाप्यः मनुः समैर्हि विषमं वस्तु चरेद्वै मूल्यतोपि वा स प्राप्नुयाद्
दमं पूर्वं नरो मध्यममेव वा अवीजविक्रयी यश्च वीजोत्कृष्टा तथैव च समैः सममूल्यदानैः सहो ॥१८०

३२

त्कृष्टामर्घं कृष्टविषयद्रव्यदानेन यो व्यवहरति अस्यैवं साहसं प्राप्नोति समैश्च द्रव्यैव मूल्यं च
मूल्यमास्थानः मध्यमं मध्यमसाहसमिति सर्वैः अवीजविक्रयी अवीजं वीजत्वेन यो विक्रीणा
ति वीजोत्कृष्टाः उप्तं वीजं यत्र त्वनेन गृह्णाति तथा मर्यादाभेदनाश्चैव विकृतं प्राप्नुयाद्दमम् तथा तुला
मानं प्रतीमानं सर्वतस्यात्सुरक्षितम् षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत् बृहस्पतिः प्रछन्न
दोषव्यामिश्रं पुनः संस्कृत विक्रयी पण्येत द्विगुणं दाप्यो वणिग्दंडं च तत्समम् भेषजस्नेहलवण
गंधधान्यगुडादिषु पण्येषु हीनं क्षिपतः पणाद्दंडस्तु षोडश भेषजादिषु पण्येषु हीनमल्पम् मं
परपं क्षिप्तो विक्षिपतो निश्चयतः षोडशपणो दंडः भेषजमौषधम् स्नेहः सर्पिस्तैलाद्यः काष्ठव
ल्कलवा सहसाम् अजातौ जातिकरणे विक्रये घगुणो दमः मृदादीनां मध्ये किंचिदनुत्कृष्टजातीय
मपि उत्कृष्टजातीयद्रव्यसादृश्यमापाद्य क्रेतारं प्रति समीचीनमेतदिति भ्रांसापादनेनासमीची
नद्रव्यं दत्वा यः समीचीनद्रव्यमूल्यमादत्ते तस्य तत एवमूल्याद्दष्टगुणो दंडः यथा मरकतस्त
रिकोयाकस्तूरिका भ्रांतिकरणेनाधिकमूल्यापादनम् एवं च धर्मादिष्वपि संभवति वल्कलेष्वक्ष

Indira Gandhi National
Centre for the Arts

वा॰व॰टी॰

लक्षं बृहस्पतिः अल्पमूल्यं तु संस्कृत्य नयेतिबहुमूल्यताम् स्त्रीबालकान्वंचयति दंड्यास्तेर्थानुरूप
तः हेममुक्ताप्रवालाद्यं कृत्रिमं कुर्वते तु ये क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्द्विगुणं दमम् समुद्रपरि
वर्तं च सारभांडं च कृत्रिमम् आधानं विक्रयं वापि नयतो दंडकल्पना भिन्ने पणे तु पंचाशत्पणे तु श
तमुच्यते द्विपणे द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान् मुद्रया द्वारबंधेन सहवर्तते इति समुद्गम् तद
न्यत्समीचीनं प्रदर्श्य प्रच्छन्नतलोपकल्पने पत्रे वा तमवर्णीय वा कौशलेन भ्रांतिं जनयन्नर्पयति मद्वसा
रमल्पमूल्यं मदादिकं सारभांडं तथा कस्तूरिकादि महार्घपण्यं तथा परं प्रति आधानं कृतेन यति
विक्रीते वा तस्य दंडकल्पनोच्यते भिन्ने पणे पणादल्पमूल्ये द्रव्ये आहिते विक्रीते वा पंचाशत्पणो
दंडः पणमूल्ये तु पणशतम् द्विगुणमूल्ये तु द्विपणशतेरर्थं पावंतः पणमूल्यस्य वर्तते ता
वंति पणशतानि दंड्यः वर्जनीयानि संभूय कुर्वतामर्घस्य बाधं कारुशिल्पिनाम् अर्घस्य वृद्धौ ह्रासे
वा साहस्रो दंड उच्यते पण्यानां राजकृतमर्घं विदित्वा ततोन्यथाभूतमर्घं वणिज्याजीविनां का सह
रुशिल्पिप्रभृतिजनस्य संबाधं पीडाकरं कुर्वतां राजकृतार्घापेक्षयार्घस्य वृद्धौ ह्रासे वा पण्यस्य

॥१६५॥

परिमितो दंडः कार्यः संभूय वणिजां पण्यमनर्घेणोपरुंधतां विक्रीणतां वा भिहितो दंडउत्तमसाह
सः राजनिमितमर्घमगणयित्वा स्वयं कल्पितेन महार्घेण वणिजां मिलितानां वणिगंतरैरवक्ष्यं पण्य
मुपरुंधतां विरुद्धं विक्रयं कुर्वतां तथा राजकृतादर्घाद्धीनार्घापादनेन स्वकीयस्य पण्यस्य नि
र्गममकुर्वतामुत्तमसाहसो दंडः मनुः राज्ञा प्रख्यातभांडानि प्रतिषिद्धानि यानि च तानि निर्हर
तो लोभात्सर्वहारं हरेन्नृपः येनार्घेन व्यवहारस्तमाह राजभिः स्थापितो योर्घः प्रत्यहं तेन वि
क्रयः क्रयो वापि स्रवस्तस्माद्वणिजां लाभकः स्मृतः राजभिर्योर्घः स्थापितो निर्मितः तेन वणि
ग्भिः प्रत्यहं विक्रयः क्रयश्च कार्यः तस्मादर्घाद्योनिस्रके द्रव्योत्कर्षः स एव वणिजां प्रशस्तो
लाभः नान्यथा मनुः आगमं निर्गमं स्थानं तथा वृद्धिक्षयावुभौ विचार्य सर्वपण्यानां कारये
त्क्रयविक्रयौ पंचरात्रे सप्तरात्रे पक्षे मासे तथागते कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृ
पः स्वदेशपण्ये तु शतं वणिग्गृह्णीत पंचकम् दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी पं
क्रयदिन एव पण्यं वणिग्विक्रीते स स्वदेशादागते पण्ये पंचकं देशांतरागते तु दशकं

यातं गृह्णीयात् क्रयदिनदिनांतरविषयमाह पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम्॥
या०व०टी० अर्घोऽनुग्राहकः कार्यः क्रेतुर्विक्रेतुरेव च स्वदेशपरदेशागतस्य पण्यस्योपरि तत्प्रतिबद्धो
व्ययः संस्थाप्यः पण्येनैव तन्निबंधनं एवं कर्तव्ययपरिशोध्यः क्रेतुर्विक्रेतुश्च तुल्यानुग्रह
हेतुरर्घो राज्ञा परिकल्पनीयः संप्रति विक्रीयासंप्रदानं नाम विवादपदमारभते तत्स्वरूपमा
ह नारदः विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते विक्रीयासंप्रदानं तद्विवादपदमुच्यते प
ण्यविक्रयार्थं मूल्यं गृह्णाति पण्यं च षड्विधं तस्य तु बुधैर्दानादानविधिः स्मृतः गणिमं तुलिमं
मेयं क्रियया रूपतः श्रिया गणिमं पूगादि तुलिमं हिरण्यादि मेयं व्रीह्यादि क्रियया दोहनवाह
नादिक यान्वगवाश्वादि रूपतः पण्यांगनादि श्रिया धनेन ग्रामारामादि। श्रिया कांत्या वारत्वा
दि तत्र मूल्यं गृहीत्वा पण्यमनर्पयतो दंडमाह॥ गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रय
च्छति॥ सोदयं तस्य दाप्योऽसौ दिग्लाभं वाधिमागते॥ यस्य पण्यस्य मूल्यं विक्रेत्रा गृ
हीतं तद्गृहीतमूल्यम्॥ तद्यो विक्रेता क्रेतुर्न समर्पयति॥ स तत्पण्यं तन्निबंधनमूल्य १६५॥

निबंधने सोदयं उदयेन धनलाभेन सहितं क्रेतुर्दाप्येत् यदि पुनर्विक्रेतुं दिगंतरे पण्यं नीतं तदा
तत्र दिगंतरे तस्य विक्रीतस्य पण्यस्य यो लाभो भवति तेन सहितं तत्तस्य देयम् न चायं यथोच्य
ते अत्रोदयो दिग्लाभरूपः किंतु स अनुपूर्व्यवप्रदप्रयच्छति तु विवादांतरम् नारदः विक्री
य पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति स्थावरस्य क्षयो दाप्यो जंगमस्य क्रियाफलम् अर्घश्च व
र्धीयेत सोदयं पण्यमावहेत् स्थायिनामेष नियमो दिग्लाभो दिग्विचारिणाम् स्थावरस्य क्ष
यमिति स्थाव[र]विषयं क्रेतुश्चं रूपभोगस्य यं दाप्य इत्यर्थः क्रियाभारवाहनादिकाफलं दी
यादि विशुः गृहीतमूल्यं यः पण्यं क्रेतुर्मूल्यं नैव दद्यात्तस्यासौ सोदयं दाप्यो राज्ञा च पण पूर्ते
ये दंडनः नारदः उपहन्येत वा पण्यं दह्येतापह्रियेत वा विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः वि
क्रीतमपि विक्रीयं पूर्वं क्रीतर्यं गृह्णाति हानिश्चेत्क्रेतृदोषेण क्रेतुरेव हि सा भवेत् यदा तु मूल्यं
दत्वा पण्यं न गृह्णाति तदा विक्रेत्रा तदन्यत्र विक्रेयम् यदि तन्न प्रपत्तित दा क्रेतुरेव तन्नप्रपति
तस्य मूल्यं न प्रयच्छ[illegible]णीयमित्यर्थः नारदः दीयमानं न गृह्णाति क्रीतं पण्यं च यः क्रयी स एवा

Indira Gandhi National
Centre for the Arts

गा·व·टी· स्य भवेद्दोषो विक्रेतुर्यो प्रयच्छतः विक्रेतुर्दोषः उपहन्येतु वा पण्यमिति साधुक्तः उक्तस्यापवाद
माह राजदैवोपघातेन पण्यदोष उपागते हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः यदा
तु ग्राहकेण याचितोपि गृहीतमूल्यं पण्यं दायको न ददाति तदा तद्विनाशो राजदैवा
दिकृतो दायकस्यैव ततश्चैतेन ग्राहकस्य तु

॥१४३॥

३४

॥ये पण्यो तरं तेपि गृहीतमूल्यं पण्यं दायको न ददाति तदा तद्विनाशो राजदैवादिकृतो दायकस्यै
व ततश्च मूल्यं वा प्रत्यर्पणीयम् अन्यहस्ते च विक्रीतं दुष्टं वादुष्टं वा यदि विक्रीणीत दत्त
मूल्यस्य च द्विगुणो भवेत् येन विक्रेत्रा पण्यमेकत्र विक्रीतं तदेकपण्यं तेनैव दायकेनान्यस्य ह
स्ते विक्रीतमन्यस्य विक्रीतमिति यावत् तथा यः पण्यं हारो दोषजनान्नपि निर्दोषमिवादो
षान्प्रच्छाद्य विक्रीणीते तस्य विक्रेतुर्मूल्याद्विगुणो दमो मनुवचनेन च कारणद्विगुणमेव मूल्यं क्रेतुः
प्रत्यर्पणीयम् नारदः अन्यहस्ते तु विक्रीतं योन्यस्मै न प्रयच्छति द्रव्यं तद्विगुणं दाप्यो विन
यं तावदेव तु सत्यंकारे द्व्यद्विगुणं प्रतिपादयेत् क्रयविक्रयसत्यापनार्थं यद्द्रव्यं दीयते स सत्यं
कारः क्रेत्रे विक्रेता क्रयधने चेद्विक्रीणीयात् तदा न कृतं द्रव्यं द्विगुणं प्रतिपादयेत् इति त्रिस्त्राप्र
दानिकं नाम क्रयक्रेतुरनुशयं प्रति किं चिदाह स्वयं हृद्रिं च वाणिजा यण्यानाम विजनता।

Indira Gandhi National
Centre for the Arts

...नदीये स्पष्टं निसम्यगपरीक्षावयता क्रेत्रा चानानुशयः पश्चात्तापः कार्यः क्रयविक्रयस्तु १

क्रीत्वैनानुशयः कार्यः कुर्वन्षड्भागदण्डभाक् क्रीतस्य पण्यस्य यन्मूल्यं तस्य षड्भागं दण्डं प्राप्नुयात् नारदः क्री
व०टी०
५५०
त्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतं द्वितीये दिवसे क्रे
तामूल्यात्त्रिंशांशमाहरेत् द्विगुणं तत्ततीये त्वह्नि परतः क्रेतुरेव तत् यतः क्रयकालेऽपरीक्षितपण्यपवि
षयमत्र यदाह स एव क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः परीक्ष्याभिमतं क्रीत्वा क्रीतं तु न भवे
त्पुनः परीक्षाकालश्चोक्तो दशैकाहं त्र्यहमित्यादिना एवं चमतुक्तकालायां परीक्षायां स
त्यामनुशयकर्तुर्मूल्यस्य षष्ठोंऽशो दण्डः अकृतायामपि तस्यामनुशयकर्तुः सदा च मूल्यस्य
षष्ठोंऽशो दण्डः यदा पुनरदुष्टं पण्यं क्रीत्वा अनुशयकाल एव क्रेता सानुशयो भवति तत्राह
कात्यायनः क्रीत्वा सानुशयात्पण्यं त्यक्ते दोषादियो नरः अदुष्टमेकालेन तु स मूल्याद्दशमं व
हेत् क्रीत्वागच्छन्ननुशयं क्रये हत्यमुपागते षण्णागते च मूल्यस्य दत्वा क्रीतं त्यजेद्गुरुः अ ॥१४॥

३३ ३४

नुशयकालादूर्ध्वमेतत्तद्बृहस्पति परीक्षेत स्वयं पण्यमन्येषां च प्रदर्शयेत् परीक्षितं बहुमतं
गृहीत्वा न पुनस्त्यजेत् मनुः क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् सोऽन्तर्दशाहेऽत द्र
व्यं दद्याच्चैवाददीत वा परेणानु दशाहस्य न दद्यान्न च दापयेत् आददानो ददच्चैव राज्ञा दाप्यः
शतानि षट् क्रयविक्रयानुशयप्रकरणम् संभूयसमुत्थानं नाम विवादपदमारभ्यते समवा
येन वणिजां लाभार्थं कर्म कुर्वतां लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ समवायो भे
लकः मेलक इति यावत् तेन वणिजां वणिगादीनां लाभार्थमधिकधनलाभार्थं कर्म वा
णिज्यादि कुर्वतां लाभालाभौ यथाद्रव्यं मेलिते यथैवांशं विकृता तद्द्रव्यं प्रगुणीकर्तृत्वेन तद
नुसारेण विभजनीयौ नारदः वणिक्प्रभृतयो यत्र कर्म संभूय कुर्वते तत्संभूयसमुत्था
नं व्यवहारपदं विदुः बृहस्पतिः अशक्तालसरोगार्त्तमंदभाग्यनिराश्रयैः वणिज्या

Indira Gandhi National
Centre for the Arts

ध्याःसहैतैस्तुनकर्त्तव्याबुधैः क्रियाआश्रयोमूलधनमकुलीनदुष्टानलसैःप्राज्ञैर्नाणकवेदिभिः
आयव्ययज्ञैःशुचिभिःशूरैःकुर्यात्सहक्रियाः नारदः फलहेतोरुपायेनकर्मसंभूयकुर्वताम्॥
आधारभूताःप्रक्षेपाउत्तिष्ठेरंस्ततोंशयः संभूयकर्मकुर्वतामाधारभूताश्रयभूताम्।
धनप्रक्षेपः ततस्तदुपेक्षयोत्तिष्ठेरनुपृथग्धनाभवेयुःसमोतिरिक्तोहीनोवायत्रांशोयस्ययादृ
शःक्षयाक्षयौतथावृद्धिस्तत्रतथाविधाःसमोन्यूनोधिकोवांशोयेनक्षिप्तस्तथैवसः दायंद
द्यात्कर्मकुर्यात्लाभंगृह्णीतचैवहि कात्यायनः समवेतास्तुयेकेचिच्छिल्पिनोवणिजोपिवा।
अविभज्यपृथग्भूतैःप्राप्तंतत्रफलंसमम् अयमर्थःपित्रादिधनमविभज्यभ्रातृभिर्यत्कल
मविभक्तैः प्राप्तंतत्सममविभज्यनीयं नविषममितिभांडपिंडव्ययोद्धारभारसारार्थवीक्षणम्
कुर्युस्तेव्यभिचारेणसमयेनव्यवस्थिताः भांडंविक्रेयंद्रव्यम् पिंडंयाथेयम् व्यासः समक्षम राम०
समक्षंवावंचयेतःपरस्परम् नानापण्यानुसारेणप्रकुर्युःक्रयविक्रयौ बृहस्पतिः

॥१४५॥

२

तारिकाः साक्षिणश्चतरावोक्ताःपरस्परमसंदिग्धेर्थेवंचनीयानचेद्विद्वेषसंयुताः यःकश्चिद्वच
कस्तेषांविज्ञातःक्रयविक्रयेशपथैःसविशोध्यः स्यात्तविवादेष्वयंविधिः कात्यायनः प्रयो
गंकुर्वतेयेतुहेमधान्यरसादिना समन्यूनाधिकैरंशैर्लाभस्तेषांतथाविधः वहेन्नांसमंतोयस्तुद
द्याद्देशेधनंनरः सपण्यकारयेद्वापिसर्वैरत्वकृतंभवेत् ज्ञातिसंबंधिसुहृदामृणादेयंसबंधुकमा
अन्येषांलग्नकोपेतंलेख्यसाक्षियुतंतथा स्वच्छादेयंहिरण्यंतुरसाधान्यंचसावधिदेशास्थि
त्यादद्यातव्यग्रहीतव्यंतथैवच समवेतैस्तुयद्दत्तंप्रार्थनीयंतथैवतत् नचयाचेतयःकश्चिद्दा
भात्सयरिहीयते प्रतिषिद्धमनादिष्टंप्रमादाद्यच्चनाशितम् सतद्द्यादिहावाच्चरक्षितादश
मांशकात्संभूयकारिभिर्दमित्यनकार्यमिति प्रतिषिद्धंव्यापारमाचरतातथाअनादिष्टम
नुक्तंकर्मकुर्वता तत्समुदायमध्यवर्तिना प्रमादात्प्रज्ञापराद्धेनविनाशितं ततेनैवतदन्यो
देयम् येनतुराजदैवकृतादिसवादिनाशाद्रनंपरिरक्षितंसतस्यदशमंमंशमधिकंभजेत्

Indira Gandhi National
Centre for the Arts

हस्पतिः अनिर्दिष्टे भाग्ये मामाः प्रमादाद्यस्तु नाशयेत् तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम् देवराजभ
याद्यत्तु स्वशक्त्या परिपालयेत् तस्मांशं दशमं दत्वा कुर्यादुत्तिंशतोपरम् अर्घप्रक्षेपणाद्विंशभागं
शुल्कं नृपो हरेत् व्यासिद्धं राजयोग्यं च विक्रेतं राजगामि तत् पण्यस्यार्घप्रक्षेपणान्मूल्याद्विंशतित
मे भागं शुल्कसंज्ञितं राजा गृह्णीयात् यत्तु राज्ञा नेदमत्र विक्रेतव्यमिति प्रतिषिद्धविक्रेयं यत्तु राज
योग्यं गजतुरगादि अनिषिद्धविक्रयमपि तदुभयं विक्रीतमपि राजगामि न क्रेतृगामि मनुः शु
ल्कस्थानेषु कुशलाः सर्वपण्यविचक्षणाः कुर्युरर्घं यथापण्यं ततो विंशं नृपो हरेत् राजदत्यनुह
त्तौ गौतमः विंशतिभागः शुल्कः पण्ये मूलफलपुष्पौषधमधुमांसतृणेन्धनानां षष्ठस्तद्रक्षणाध
र्मित्वात्तेषु नित्ययुक्तः स्यात् बौधायनः सामुद्रशुल्को वररूपमुद्धृत्य दशपणं शतमन्येषामपिसा
रानुसारेणानुपहत्य धनं प्रकल्पयेत् सामुद्रस्य पण्यस्य वरं सारं च शुल्के तमुद्धृत्य दशके शतं ग्राह्य
अन्येषामपि द्रव्याणां सारानुरूपेण धर्ममनुपहत्य शुल्कं कल्प्यमित्यर्थः वसिष्ठः न भिन्न
मा… ॥१९४॥

कार्षापणमस्ति शुल्कं नाशिल्पवृत्तौ न शिशौ न दूते न भैक्ष्यलब्धेन हुताशलब्धेन श्रोत्रिये प्रव
जितेन यज्ञे इति मनुः राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च तानि निर्हरतो लोभात्सर्वहारं हरे
द्येन्नृपः विष्णुः राजनिषिद्धविक्रीणानस्य सर्वापहारः अस्माच्च वचनाद्गम्यते प्रतिषिद्धविक्रीण
तस्य विक्रेतुर्मूल्यमर्पणीयम् राज्ञा च मूल्यं दत्त्वैव प्रतिषिद्धक्रयं भाण्डमपहार्यमिति मिथ्यावदन्परीमाणे
शुल्कस्थानाद्यासत् दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी पण्यविक्रयी पण्यपरिमाणं शुल्कस्थान
ये मिथ्यावदन् शुल्कग्रहणस्थानाच्चापाक्रमन् वणिक् शुल्कादष्टगुणं दण्ड्यः यश्च सव्याजो सौल्किक
प्रतारणेन वैतौ क्रयविक्रयौ करोति सोऽपि शुल्कादष्टगुणं दाप्यः नारदः शुल्कस्थानं परिहरन्नकाले
क्रयविक्रयी मिथ्यावादी च संख्याने दाप्योऽष्टगुणमत्ययम् अत्ययोऽतिक्रमनिमित्तो दण्डः बृहस्पतिः ।
शुल्कस्थानं वणिक्प्राप्तः शुल्कं दद्याद्यथोचितम् न तद्व्यभिचरेद्राज्ञां बलिरेष प्रकीर्तितः विष्णुः शु
ल्कस्थानमपाक्रामन्सर्वापहारमाप्नुयात् तरिकः स्थलतं शुल्कं गृह्णन्दाप्यः पणान्दश ब्राह्मण

Indira Gandhi National
Centre for the Arts

प्रतिवेश्यानामितरेषां वा निमंत्रणे तदिक्रोजनशुल्काधिकारी स्यत्तोमृस्वशुल्कंदद्यान्नाम्नादशायणान्दा
प्यःब्राह्मणभोजनेकार्येप्रतिवेश्यानांसमीपगृहस्वामिनां निमंत्रणाकरणेब्राह्मणेदशयणानित्येवदा
प्यः जलशुल्कमाह मनुःपणाम्ह्यानेतरेदाप्यः पुरुषोर्धपणंतरम् पादंपशुश्चयोषिच्चपादार्द्धंरिक्
कारः पुमान् भांडपूर्णानि दानानिनार्येदाप्यानिसारतः रिक्तभांडानियत्किंचित्पुमांसश्चापरिच्छ
दाः अस्यार्थः जलोत्तरे तरयानेशिविकादिकपणंदाप्यः पुरुषश्चार्धपणंदाप्यःपशुःयणस्य
चतुर्थांशंयोषिच्चदाप्याःपुमांश्चद्विकारोरिक्तहस्तःमांडैःपूर्णानियानानिप्रत्येकंयथासारतस्ता
र्थं नद्यादिनिमित्तंशुल्कंदाप्यानितान्येवरिक्तभांडैनि यत्किंचिदल्पंतार्येनद्यादियणनिमित्तं
शुल्कंदाप्यानिपुमांसश्चापरिच्छदाः अपरिकरादाप्याः अत्रापवादंसएवाह गर्भिणीतुद्विमासा
दिस्तथाप्रव्रजितोमुनिः ब्राह्मणोलिंगिनश्चैवनदाप्यास्तारिकांतरे तथाप्रतिवेश्यानुवेश्योचकल्या
णेविंशतिर्द्विजे अर्हतिवभोजयन्विप्रोदंडमर्हतिमाषकम् मुनिश्चायणादिकारी लिंगिनोब्रह्मचर्याद्यः
आनुवेश्यःस्वगृहानन्तरसूत्रा विंशतिर्द्विजायचकल्याणेतद्विंशतिद्विजम् कल्याणशोभनं श्रोत्रियः श्रो ॥९४॥

त्रियंसाधुंभूतिकल्येष्वभोजयत् तदन्नंद्विगुणंदाप्योहैरण्यंचैवमाषकम् भूतिकृत्यनिवद्धनसाध्यानि
ब्राह्मणभोजनादीनि मंगलप्रधानानि विष्णुः येवांदेयःपश्चात्तेषांमपश्यदर्योकार्याचणयचविचार्ति
देयः आसनाहिस्यासनमदत्वा पूजार्हमपूजयम् प्रातिवेश्यब्राह्मणानतिक्रमोच निमंत्रयित्वाभोज
नामदायिच निमंत्रितस्तथेत्युक्त्वाननुजानः सुवर्णमात्रकंनिकेतद्विगुणमन्नम् मत्स्यपुरा
णे निमंत्रितोद्विजोयस्तुवर्तमानः प्रतिग्रहे निष्कारणंनगच्छेतसदाप्योष्टशतंदमम् संभूयकारिणो
मृतस्यधनाधिकारिणःक्रमस्वाहदेशांतरगतेप्रेतेधनंदायादबांधवाः ज्ञातयोवाहरेयुस्तदागतास्ते
र्विनानृपः संभूयकारिणोदेशांतरगतेमृते तद्धनंदायादाःपुत्रागृह्णीयुः तदभावेबांधवाः संवं
धिनःपत्नीदुहितरइत्याद्याःतेषामभावेसंभूयकारिणस्तेनसहागताः तदभावेनृपः संभूयका
रिणइत्यधिकारित्वप्रात्पर्थंवचनम् अन्येतुपत्नीदुहितरमित्याद्युक्तमन्वयाने नारदः एकस्यचित्स्या
व्यसनंदायादोस्यतदाप्नुयात् अन्योवासतिदायादेशक्ताश्चेत्सर्वएववाव्यसनमरणेशक्तसंवर्द्धः सर्वसं
भूयकारिणः कश्चिच्चेत्संचरन्देशान्प्रियादभ्यागतोवणिक् राजास्यभांडंरक्षेद्यवद्दायाददर्शनम् दा

रपासतिवंधुन्योज्ञातिभ्योवातदर्पयेत् तद्भावेस्वगुरुंतत्कारयेद्दशवत्सरान् अस्वामिकमदायादंदशवर्षा
स्थितधनम् राजातदात्मसात्कुर्यादेवंधर्मोनहीयते दायाःदःपुत्रःब्रह्मणस्पतिः एककियाप्रवृत्ता
नांयदाकश्चिदपिघातेतद्वंधुनाक्रियाकार्याः सर्वैर्वासहकारिभिः ऋत्विक्त्यजेयुर्निर्लोभमशक्तोन्येनका
रयेत् संभूयकारिणांयोत्विक्कुंठितःप्राप्तिर्ऋत्विक्कर्मकारीतियावत् तमितरेनिर्लोभंलोभरहितं
कृत्वात्यजेयुः येदुकाद्वहिःकुर्युः यदितुवजैस्त्यात्कर्मनकरोतिकिंत्वशक्तस्तदान्येनतत्कारयेत् उक्तमर्थमृ
त्विगाद्यतिदिशन्नाह अन्येनविधिनाख्यातऋत्विक्कर्षिककर्मिणाम् अन्येनवणिजांचधर्मेण ऋत्वि
गादीनांधर्मविधिराख्यातोवेदितव्यः ततस्वहतेनऋत्विजाव्याधादिदशात्कर्मकर्तुमशक्तेनान्येन
तत्कारयितव्यम् शाठ्याच्चेन्नकरोति त्याज्यएव तदाह वशिष्ठः ऋत्विगाचार्यावयाजकाध्यापकौ
हेयावित्यत्रहान्याप्पतति नारदः ऋत्विग्व्याधितोप्येवमन्यस्तत्कर्मनिर्हरेत् सर्वेषामर्धलभेतद
क्षिणाभागंहतस्मात्तत्प्रकल्पितम् मनुः ऋत्विग्यदिवृतोयज्ञेस्वकर्मपरिहापयेत् तस्यकर्मानुरूपेण
देयोंशःसहकर्तृभिः दक्षिणासुचदत्तासुस्वकर्मपरिहापयेत् कृत्स्नमेवलभेतांशमन्येनैवकारयेत् ॥१९४८

सर्वेषामर्धिनोमुख्यास्तदर्धेनार्धिनोर्धिनः तृतीयेनतृतीयांशाश्चतुर्थ्यांशाश्चपादिनः सर्वमेवकर्मकु
युश्चेदृत्विजस्तदाशेषमंशंयजमानाद्दद्युस्तत्रचऋत्विगंशंयजमानआदद्यीत सर्वेषामृत्विजांमध्येये
मुख्याश्चमहर्त्विजः होतृब्रह्माध्वर्यूद्गातारः इत्यन्तनार्धग्रहणोपिसामीप्यतस्तेर्धिनोदक्षिणार्धस्वा
मिनःप्रेत्यर्धिनोब्राह्मणाः शंसिप्रशास्तृप्रस्तोतृप्रतिप्रस्थातारस्तेर्धिनोःमहर्त्विग्भागार्धिनः कार्याः ये
तुतृतीयांशिनआग्नीध्राच्छावाकप्रतिहर्तृनेष्टारस्तेमहर्त्विग्दक्षिणायास्तृतीयमंशंलभंते येतुपादिन
श्चतुर्थांशिनोग्रावस्तुत्पोताग्रावस्तोतासुब्रह्मण्योनेतारोमहद्दक्षिणायाश्चतुर्थमंशंलभंते इति
यस्यकर्माणियास्तुस्युःकृताःप्रत्यंगदक्षिणाःसतांकरआददीतभजेरन्सहस्रैवर्वा अंगमंगंप्रतिनित्वो
विशेषवचनेनसायाम्नातादक्षिणास्ताःकिमेकैकेनग्राह्यायत्संव्येनसमानाआत्ताः यथाभिषेचनीयेहि
रण्यप्राकाशावध्वर्यवेददातीति तेनैवाध्वर्युणाग्राह्याः उताध्वर्युर्द्वारमात्रंसर्वैविभज्यगृह्णीयुरिति सं
शयः मनुर्बृहस्पतिः रथंहोरथाध्वर्युर्ब्रह्माधानेचवाजिनाम् होतावापिहरेदश्वमुद्गाताचाप्यनःक्र
येएवंविकसंशयेऽयंनिर्णयःकेषांचित्तद्विनामाधाने अध्वर्योरेवः आम्नायहेब्रह्मणेवेगवान्

Indira Gandhi National
Centre for the Arts

ष्वः सौत्रे चाश्वः उद्गात्रे सोमक्रयेसोमवहनं शकट मेवं व्यवस्थायां दद्याति मुख्यो यो भवति पुरुषस्तं
योगस्थानाद्दष्टो भवति यदुक्तं मनुना ऋत्विग्यस्त्यजेद्याज्यो याज्यं चर्त्विजं त्यजेद्यदि शक्तं कर्मण्यदुष्टं च (
तयोर्दण्डः शतं शतमिति तत्कर्मागतेषु स्वयं हृतेषु चर्त्विक्षु दृष्टव्यम् शंखलिखितौ अथ ऋत्विग्विद्वतेः (
पश्चादन्यं वृणुयात् पूर्वं हृतस्यैव दक्षिणायाः पश्चाद्धृतः किंचिल्लभेत प्रवसंश्चेत्कार्कं निमित्तं वा
वेक्ष्यमाणस्तं कालमपेक्षेत नान्तरायं जेत्। स्याद्दात्यपिकोवा तं कर्तुं संदापयेत् प्रोष्यप्रत्यागतश्च
किंचिल्लभेत अथ चेत्प्रतिषेद्धः प्रवेशं तत्कामोदानुप्रामः सर्वे नेमस्त्विक ऊर्ध्वंतं दण्ड्यः सएव चादुष्टा॥
त्तस्य ऋत्विकुलोपाधायाह एवं व्याधितपतितोन्मत्तप्रहीन प्रध्वस्तेषु संप्रदानं करणं मृत्विक्कामाच्चेर
त्तस्य ऋत्विजोपतितोपतित
पतितेयाज्यं त्यजेद्दत्विक प्राप्नुयाद्विशतं दण्डम् याज्यश्चेत्पज्ञेन्न दोवाप्नुयात् त्यागऋत्विजोपतितोपतित
स्यकामपतितमश्रोत्रियं त्यजेत् याज्यं चाभिहतमदातरम् कालपक्षमासादि निमित्तं विवादादि।
स्यादात्पधिक इति अत्पयगवात्पयिकः तेन यद्धितत्परीक्षणीयक्षास्ययोयस्त्वाधः संभाव्यतेत
दात्विगतरेणते यत्रं विष्यादयेदित्यार्थः प्रहीनोऽभिशायादिना त्यक्तः प्रध्वस्तोतिद्वन्द्वः दहस्य ॥१४८



सतानेनपरीक्षितमयुक्तमिति संशयस्य संदेहस्य संभवात् यत्नतो लोप्त्रं विचार्यमिति गृहीतः शंक
चौर्ये आत्मानं च भशोधयेत् दापयित्वा हृतद्रव्यं चौरदण्डेन दण्डयेत् शंकया संदेहेन चौर्यविषये
गृहीतोत्तियुक्तोपधात्मानं दिव्येन मानुष्येण वा प्रमाणेन भशोधयेत् शंकया शंदेहेन व्यये
नचौर्ये शंकवकुर्यात् तदा अपहृतं द्रव्यं दापयित्वा च प्रमाणेन चौरदण्डेनोपः नचात्र वाच्यम् चौ
रत्वेन शंकितस्य प्रमाणेन हितामिथ्यावादित्वादिति यतो मिथ्यावादित्वमात्रं साधनः न हि तत्वेप्रयो
जकं किंतु अथ मचादिनोऽत्र वभाभियोक्तत्वे सति अत्रो न युक्तं यच्छंकितः प्रमाणं कुर्यादिति न
चेचौर्याद्यभावे प्रमाणाभवाः तथाहि स्मृति महाभिर्दिव्येस्तानिरुच्यावान्यतः कुर्यात् राजभिः
शंकितानि चेत्यादि वचनानि नैवारभ्येरन्न न च वाच्यम् मानुषप्रमाणानामनावोन साध्येत य
स्माच्चौर्याद्यभावे व्यभिचारिणां भवति शेषे साधयतां सिद्धत्वेऽवभावसाधकत्वमिति यथाय
त्रकालेस्य द्रव्यं केनाप्यपहृतं नदाततो पलायदेशादिति दूरे हं व्यवस्थितो महताव्याध्याधि (
नाक्रान्त इत्यादिना भावयन्न साधयत्येवात्मनश्चौर्याद्यभावमिति अतएव शंखो साक्षिप्रमाणं हि ते

Indira Gandhi National
Centre for the Arts

दिव्यमिति उक्तौयथ्यामित्रैः सज्जनैरात्मानं शोधयेदेव सचैवेदं ज्ञोर्थिनोवार्थदापयेदित्युक्तवान्द्वौ
रंसवाप्यापहृतंघातयेद्विविधैर्वधैः सचिह्नंब्राह्मणंकृत्वास्वराष्ट्रादिप्रवासयेत् प्रमाणान्तोनिष्क्रि
तंचौरमपहृतद्रव्यंस्वरूपतोमूल्यतोवास्वामिनोदाप्यः विविधैर्विधोपायैर्घातयेद्विस्थात् ब्राह्मणं
चौरंसचिह्नंएवंपदंकितंकृत्वास्वराष्ट्राद्विप्रवासयेत् नतुघातयेत् अत्रमनुः नजातुब्राह्मणं
हन्यात्सर्वपापेष्वपिस्थितम् राष्ट्रादेनंवहिष्कुर्यात्समग्रधनमक्षतम् महापातकव्यतिरिक्तापरा
विषयमेतत् तत्रपुनस्तेनैवोक्तं गुरुतल्पेभगःकार्यःसुरापानेसुराध्वजः स्तेयेतुश्वपदंकार्यं
ब्रह्महण्यशिराःपुमानंतेच असंभोज्यात्वसंयोज्याअसंयाज्याविवाहिकाः चरेयुः पृथिवीं
दीनाः सर्वधर्मबहिष्कृताः अकृतंचप्रायश्चित्तमनिच्छतांकार्यम् यतआहप्रायश्चित्तंतुकु
र्वाणाःसर्ववर्णायथो दितम्नांक्याराज्ञाललाटेस्युर्दाप्यास्तूत्तमसाहसम् अतश्चदंडप्राय
श्चित्तयोः समुच्चयोगम्यते प्रायश्चित्ताचरणोत्तमसाहसः शरीरदंडयो समुच्चयउक्तस्ते
नैवचतुर्णामपिचैतेषांप्रायश्चित्तमकुर्वताम् शरीरंधनसंयुक्तंदंडंधर्म्यंप्रकल्पितम् चतु १५०

तिः प्रयोगः पूर्वमाख्यातः समासेनोदितेधुना श्रूयतांकर्षकदानंविधानाविधानमिदमुच्यते प्रयो
गक्रत्विगादिधनयोगः वाधकर्षकवीजाद्यैः क्षेत्राद्यकरणेनच येसमानास्तुतैःसार्द्धंकर्षिःकार्योविज्ञान
ता वाह्यवीजात्ययाद्यत्रक्षेत्रहानिःप्रजायते तेनैवसाप्रदातव्यासर्वेषांकृषिजीविनाम् एषधर्मःसामा
न्यातःकीनाशानांपुरातनः हिरण्यकुप्यसूत्राणांकाष्ठपाषाणचर्मणाम् संस्कर्तातुकलाभिज्ञःशि
ल्पीचक्रोमनीषिभिः हेमकारस्यापत्रशिल्पंमन्येयकल्पतेकर्मानुरूपंनिर्वेशंलभेरंस्तेयथांशतः
कीनाशाःकर्षिवालाः कात्यायनः शिक्षकाभिज्ञकुशलाआचार्याश्चेतिशिल्पिनः एकद्वित्रिचतु
र्भागान्हरेयुस्तेयथोत्तरम् बृहस्पतिः हर्म्यदेवगृहंवापिधार्मिकोपस्कराणिच संभूयकुर्वतां
चैषांप्रमुखोद्व्यंशमर्हति नर्त्तकानामेषएवधर्मः सद्भिरुदाहृतः तालज्ञोलभतेध्यर्द्धंगायनास्तु
समांशिनः स्वाम्याज्ञयातुयश्चौरैःपरदेशात्समाहृतम् राज्ञोदत्वाषष्ठमंशंभजेयुस्तेयथांशतः
चतुरोंशांस्ततोमुख्यःशूरस्त्रींशान्समाप्नुयात् समर्थस्तुहरेद्व्यंशंशेषाःसर्वेसमांशिनः चौरस्परे

उनाधिंपरीतानोपायमाह ग्रामकेष्विति चौरो लोभेणाप्रणयपदेन वा पूर्वकर्मापराधी च तथा च शुद्धवा
सकः ग्राहकैर्ग्राह्योर्ग्रहणाधिकृतैः लोभादिना चौरो गृह्य अवगम्यते लोभमपहृतद्रव्यैकदे
शः पांसुकर्दमादिवर्मीयदाकः पादं तस्य पुरुषस्य पादेन संमितम् यस्य गृहं प्रति नष्टदेशाद्गामस्य
स्य अराजाता सोपि चौरः अपहृतस्य गवादेः पदपंक्तिर्यस्य गृहं प्रतिप्रवृत्ता सोपि चौरः एतच्चौर्यमि
चारिधर्मस्य जातस्य प्रदर्शनार्थं यत्र यत्र ष्ठावशिष्टं तं दुलादि पात्रस्य गृहे दृश्यते तस्यैकप्रकारत्वे
पारस्परचौरत्वं श्रूयते यश्च एवं कृतेन चौर्यकर्मणापराधीति ज्ञातः यश्चाशुद्धवासकः न विद्यते शु
द्धः समीचीनो वासो निवासो निवासस्थानं यस्य सोशुद्धवासकः सोपि चौरः निर्णयः पस्य ग्रहणस्य हेतव
उक्ताः तस्यैव शंशयरूपस्य हेतूनिदानीमाह अन्येपि शंकया ग्राह्या नामजात्यादिनिह्नवैर्द्यूतस्त्रीपा
नसक्ताश्च शुष्कभिन्नमुखस्वराः परद्रव्यगृहाणां च पृच्छका गूढचारिणः निरायाव्ययाः चौरत्वेन शंक
नीयाः इत्यर्थः तथा ये पूर्वं तादृशकार्ये च चौरत्वेन नियुक्ताः शुष्कमुखाभिन्नस्वराश्च भवन्ति ये च क
मानि द्रव्याणि कस्य वा गृहाणीति परद्रव्यगृहाणां पृच्छकाः ये च गूढाः प्रच्छन्नाः सन्तोपि चरन्तीति तन्त्र ॥१५१॥

न्ताः ये च निराया अदृष्टधनागमा व्ययवन्तश्च भवन्ति ये च विनाशितगेया द्यलंकारस्य विक्रयिणः ते चौ
रत्वेन शंकया ग्राह्याः नारदः सहोढग्रहणोक्तेयं होढे सत्युपभोगतः शंकानवसजनैकाप्यविसनायव्ययतल्प
पा अहोरात्रिम्बवेचौरान्गूहितान्यपैसंत्व्यया भयापधाभिश्चित्राभिर्युक्तैः यथाहितेदेशं ग्रामं
दिशं नामजातिं वा संप्रतिश्रयम् कृतकर्यसहायाश्च दृष्टव्याः सुविंगस्यते। वर्णस्वरकारेर्वा तत्संदि
ग्धनिवेशनाम् आदेशकालदृष्टत्वान्निवेशस्य विशोधनात् अस्यद्यान्दवं चौर्याः सत्संसर्ग
कारणात् दोषैरप्यनुगंतव्या न होढेनैव केवलम् होढो लोप्त्रम् उपभोगोपहृतद्रव्यसाधारणस्य प्रक्री
णतोणासंभव प्रामेराकाच्यमेकप्रयोजनत्वं भयोपधाभयहेतवः लेशायुक्तयः तथा गवादिषु
प्रणष्टेषु द्रव्येष्वपहृतेषु च वदेनान्वेषणं कुर्युः आम्ललान्तदि जोजना आम्ललाद्गवादिहरणस्थाना
त् यामे व्रजे विवीते वा यत्रं तन्निपततेन्वेषणम् वोढव्यं तस्य चैत्तेन न वेत्तान्यत्र तन्नयेत् परे प्रश्ने
भये वा चिषमत्वाज्जनातिके यस्मात् सभतरोग्रामो व्रजो वा तत्र यातयेत् सामेच्छनि दयोर्ये तत्र तन
प्रायो शुर्चिर्जिनः एवीपराधैर्दुष्टो वासं दृष्टो वाद्दुरात्मभिः नैवतरिक्षात्रदिषोनसमुद्रान्न चान्य

Indira Gandhi National Centre for the Arts

तैः दस्युवः संप्रहृतैस्तैः स्वादेवं प्रकल्पयेत् ग्रामेष्वनेषणं कुर्युः श्वपाकवधकादयः रात्रिसंचारिणो ये च
बहिष्कुर्युर्बहिश्चराः समेष्वनितुल्यमार्गे ह्यो ग्रामयोस्तेन प्राग् पञ्चौरबहुलाः मनुनारदौ सभाप्र
पाप्रपाशालावेशमद्यान्नविक्रयाः चतुष्पथाश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च शीर्णोद्यानान्य
रण्यानि कारुकावेशनानि च शून्यानि वाप्यगाराणि वनान्युपवनानि च एवंविधान्नृपो देशान् गुल्मैः
स्थावरजंगमैः तस्करप्रतिषेधार्थं चारैरप्यनुचारयेत् तथा तान्सहायैरनुगतैर्नानाकर्मवादिभिः
विद्यादुत्सादयेच्चैव निपुणैः पूर्वतस्करैः भक्ष्यभोज्यापदेशैश्च ब्राह्मणानां च दर्शनैः शौर्यकर्माप
देशैश्च कुर्युस्तेषां समागमम् ये तत्र नोपसर्पेयुश्चौरैः प्रणिहितैरपि तेऽपि सुः संगृहीतव्याः समित्रज्ञा
तिबान्धवाः यो लत्र चौरान्स्यन्तो गुल्मान्विताडयेत् विदंव्य च अवधुष्य च सर्वत्र हन्याच्चित्रवधेन तु अ
चौरा अपि दृश्यन्ते चौरैः सह समागताः यद्दुष्टयानेव तुल्यान्नृपो दण्डेन संस्पृशेत् कात्यायनः अन्य
हस्तात्परिभ्रष्टमकामादुद्धृतं भुवि चौरेण वा परिक्षिप्तं लोप्त्रं यत्नात्परीक्षयेत् अस्यार्थः कि
मेतदन्यस्य हस्तात्परिभ्रष्टं सदस्य हस्ते दृश्यते किं वा चौर्यकामनया विनानेनोद्धृतम् यद्वा चौरेण ॥१५२॥

णामहापातकिनामित्यर्थः नारदः ब्राह्मणस्य वधो मौण्ड्यं पुरान्निर्वासनं तथा ललाटे चांककरणं प्रया।
णं गर्दभेन वा गौतमः न शारीरो ब्राह्मणस्य दण्डः कर्मवियोगविख्यापननिर्वासनाङ्ककरणानि शा।
रीरो दण्डो गवहारिः आपस्तम्बः पुरुषवधे स्तेये भूम्यादान इति स्वाम्यादाय वध्यश्चक्षुर्निरोधस्त्वे
तेषु ब्राह्मणस्य बृहस्पतिः हन्तारश्चाप्यावारन्तीर्या वधने त्वेष्यते चिह्नस्वामिनेतद्धनं दाप्यः प्राय।
श्चित्तेन कार्यस्ते गृहीतचौरदण्डकम् अगृहीते यत्कार्यं तदाह व्यासः तितेघहतेदोषो ग्राममभर्तुर्निर्गते विवी
तभर्तुस्तु पथि चौरोद्धर्तुर्वितके मनुष्यादौ हृते गवाश्वादौ वा सहृते हर्तरि चादृष्टे ग्रामाद्बहिर्निर्गते
चौरस्य पथि मार्गे ग्रामस्वामिनश्चौर्यदोषः तेन चौरो देयोऽपहृतं चेति तात्पर्यार्थः विवीते तु घातापहारे चेत्
ज्ञातो विवीतस्वाम्य बहिरदृष्टे चौरमार्गे विवीतभर्तुर्दोषः अवीतके विवीतादन्यत्र तु घाते पहारे वक्ष्यते चौ
रोद्धरणनियुक्तस्य दोषः विवीतं तृणादिप्रयोजनभूः नारदः गोचरे यस्य मुष्येत तेन चौरः प्रयत्नतः ग्राह्यो
दाप्योऽथवा मोषं पदं यदि न निर्गतम् निर्गते तु पदे तस्मान्न चेदन्यत्र पातितम् सामन्तान्मार्गपालांश्च
श्च दिक्पालांश्चैव दापयेत् पदे चौरमार्गे एतस्माद्ग्रामादि निर्गतेन च दिन प्रमातरे पातितं चौ

Indira Gandhi National
Centre for the Arts

--॥दूयंग्रामाध्यक्षं प्रदापयेत् विक्रीते स्वामिना देयं चौरो हिन्ताविक्रीतक र

रेण तदासेमंभाविनं दापयेत् परे चौरमार्गे कात्यायनः स्वहेतुमुषितं राजा चौरग्राहांस्तु दापयेत् आरक्षका
ध्वादिकालान्यदि चौरो न लभ्यते तथा स्वदेशे यस्य यत्किंचिद्धृतं देयं नृपेण तु स्वकोशाद्यात्तत्स्वयं नष्टमाम
मन्विष्य पार्थिवः चौरैर्हृतं प्रयत्नेन स्वरूपं प्रतिपादयेत् तदभावे तु मूल्यं स्याद्दन्यथा किल्बिषी नृपः
लब्धे तु चौरे यदि तु मूल्यं तस्मान्न लभ्यते दद्यात्तमथवा चौरं दापयेत्तु यथेष्टतः तस्मिंश्चेद्दाप्यमाणा
नं भवेद्दोषे तु संशयः मन्वितः तस्य यथाकाष्ठ्यो बंधुनिवीविशोधयेत् बंधुभिः साक्षिभिर्हृते निकिरवाभि
भिर्दुष्टैरित्यर्थः यस्माद्दपहृतात्तद्वद्द्यात्स्वल्पंतु स्वामिना तत्के स्मामुयात्तस्मात्तत्त्वये स्वामिना कृते स्व
सीम्नि स्याद्ग्राममुत्तस्ये वा यत्र गच्छति पंचग्रामी बहिः कुर्यादित्याग्राम्य यथा पुनः ग्रामसीम्नि च यदि मोषो भ
वति तदा स एव ग्रामो मुषितं दद्यात् यदि पदं चौरमार्गो ग्रामसीम्नो बहिः कंचन ग्रामं प्रति याया तदा स एव ग्रा
मो दद्यात् यदा तु क्रोशमात्रव्यवस्थितानामनेकेषां ग्रामाणां मध्ये चौर्यं भवति तदा तुल्याध्वनाः पंचग्रामाः
समाहृताः मोषं दद्युः स्वदाद्युर्न दशग्रामा मामोषस्थानात्तुल्यान्तराला भवंति तदा दशापि समाहृता दद्युः चौ
रैर्विचित्रैर्वधैर्हन्यादिति सामान्येनैवोक्तम् तत्र चौर्यविशेषमाह वेदियाहस्त्यावाजिकुंजराणां च ॥१५३

हारिणः प्रसह्य घातीन ह्येव शूलमारोपयेन्नराञ् शूलारोपणं वधपर्यंतम् मनुः अग्न्यागारायुधा
गारदेवतागारभेदकान् हस्त्यश्वरथहर्तृंश्च हन्यादेवाविचारयन् प्रसह्य घातिनो जनमप्रसह्य मनुष्या
दिहंतारः व्यासः अश्ववर्त्तो हस्तपादौ कटिं छित्वा प्रमाप्यते पशुहर्तुश्चार्द्धपादं तीक्ष्णशस्त्रेण कर्तये
त् मनुः संधिं भित्वा तु ये चौर्यं रात्रौ कुर्वंति तस्कराः तेषां छित्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्
यतो हस्तच्छिन्नास्तत्र शूलहृदये निवेशयेदित्यर्थः बृहस्पतिः संधिच्छित्वेह तान्याज्ञः शूलमारोप
येत्ततः तथा पांथमुषो वृक्षेगले बद्ध्वा वलंबयेत् कात्यायनः स्वदेशघातिनो ये स्युस्तथा मार्गनि
रोधकाः तेषां सर्वस्वमादाय शूले राजा निवेशयेत् नुस्वेपयं ग्रंथिभेदोकरसंदंशहीनको कार्यो
द्वितीयहरणे करपादैकहीनको यो गुष्ठांगुलिभ्यां परस्वमुत्क्षिपति अपहरति यश्च ग्रंथिं भिनत्ति
सौ करसंदंशेनांगुष्ठांगुलिभ्यामपराहेतुमस्तान्यां हीनो कार्यो मनुः अंगुलीयग्रंथिभेदस्य छेदयेत्प्र
थमे ग्रहे द्वितीये हस्तचरणौ तृतीये वधमर्हति कात्यायनः येन येन पराद्रोहं करोत्यंगेन तस्क
रः छिंद्यात्तदंगं नृपतिस्तस्य न करोति यथा पुनः उक्तमविशेषेण चौरं प्रदाप्यापहृतं घातयेद्द्वितीये र्वा

Indira Gandhi National
Centre for the Arts

धैरिति तद्विषयविशेषमुपसंहरन्नाह स्वल्पमध्यममहाद्रव्यहरणे सामान्यो मध्यमः देशकालवयःशक्तिसं
चिंत्यदंडकर्मणि स्वल्पद्रव्याणि मृद्भांडादीनि मध्यमानि वस्त्रादीनि महाद्रव्याणि हिरण्यादीनि तें
षां हरणे तोयथा शास्त्रमो धनायहारो केनगात्र छेदवधात्मा चौराणां कल्प्यः देशश्च कालश्च वयश्च
शक्तिश्च देशकालवयःशक्ति एतत्सर्वं दंडकार्ये व्रात्संगे: सहस्रपेण चिंतनीयम् तत्र द्रव्यत्रैवि
ध्यमाह: नारदः मृद्भांडासनखट्वादिहारु चर्मतृणादि वत् शमीधान्यं कृतान्नं च क्षुद्रं द्रव्यमु
दाहृतम् शमीधान्यं त्रिविधान्यं माषमुद्गादि कृतान्नं सिद्धार्थ वासः कौशेयवर्जं चगोवर्ज्यप
शवस्तथा हिरण्यवर्जितो हं चमध्यं ब्रीहियवं तथा हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाहनः
देवब्राह्मणराज्ञां च द्रव्यं विज्ञेयमुत्तमम् कौशेयमतसीमयम् हिरण्यं सुवर्णरजतं च अत्र विध
स्यापहारे त्रिविधमाह सेरुडातिदेश स एवाह साहसेषु य एवोक्तस्त्रिषु दंडो मनीषिभिः स एव दंडस्ते
येपि त्रिषु दंडेष्वनुक्रमात् तत्र धान्ये विशेषमाह मनुः धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिके व
धः शेषेप्येकादशगुणं दाप्यस्तस्य च तद्धनम् कुंभो द्रोणद्वयम् तदुक्तम् यत्नद्वयं तु प्रसृतं ॥१५४॥

द्विगुणं कुडवं मतम् चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः आढकैस्तैश्चतुर्भिस्तु द्रोणस्तु कथितो बुधैः कुं
भो द्रोणद्वयं सूर्पः खारी द्रोणास्तु षोडश इति दशभ्यः कुंभेभ्योधिकधान्यहारिणो वधः शेषेऽल्पधिके हर्त्ते
यत्र धान्यापहारे योदंडस्तमेकादशगुणं दंडं दाप्यः यावदपहृतं तावत्स्वामिने तथा धरिममेयानां श
तादभ्यधिके वधः सुवर्णरजतादीनां सुत्तमानां च वाससाम् धरिमेण तुलया मीयंते इति धरिममेयानि ता
न्येव सुवर्णरजतादीनामित्येतावन्मात्रमुच्यते ततो लोहानामेव ग्रहणं स्यात् अथ धरिममेयानामित्ये
वोच्यते तदा गुडादीन्यपि गृह्येरन् उभयोपादाने तु स्यैर्थ्यतिरिक्तानामपि मुक्ताप्रवालादीनां तुल्यमे
यानां परिग्रहः महार्घत्वेन सुवर्णरजतप्रकारत्वात् प्रकारवचनश्चायमादिशब्दः अत एव गुडादी
नां धरिममेयत्वेपि निवृत्तिः अमहार्घत्वेन सुवर्णतुल्यताविरहात् तेन लोहानामपि त्रपुसीसादीना
मसाराणां न ग्रहणम् उत्तमानि च वासांसि पट्टोर्णानेत्रपट्टीप्रभृतीनि तथा पंचाशतस्त्वभ्यधिके ह
स्तच्छेदनमिष्यते शेषे त्वेकादशगुणं मूल्याद्दंडं प्रकल्पयेत् पुरुषाणां कुलीनानां नारीणां च विशे
षतः मुख्यानां चैव रत्नानां हरणे वधमर्हति महापशूनां हरणे शस्त्राणामौषधस्य च कालमासाद्य

Indira Gandhi National
Centre for the Arts

कार्यं च राजा दंडं प्रकल्पयेत् महापशावो गवाद्यः सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च दध्नः क्षीर
स्य तक्रस्य पानीयस्य तृणस्य च वंशानां मृन्मयानां च हरणे मृदो भस्मन एव च मत्स्यानां पक्षिणां चैव तैलस्य च
घृतस्य च मांसस्य मधुनश्चैव यच्चान्यत्पशुसंभवान् अन्येषां चैवमादीनां मद्यानामोदनस्य च प
क्वान्नानां च सर्वेषां तन्मूल्याद्द्विगुणो दमः कार्षापणो भवेद्दंडो यत्रान्यः प्राकृतो जनः तत्र विप्रो भवेद्दंड्यः
सहस्रमिति धारणा अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम् षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रि
यस्य तु ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः विद्वद्विष
यमिदं वाक्यम् तद्दोषविद्धि स इति हेत्वभिधानात् पतेन पतितनालेनयोर्गुणदोषौ वेत्ति कामुष्मि कौवा
लादिवज्जन्तौ तस्य स्तेये दंडः गुणात्द्विषयः शूद्रस्य भवति तदुक्तम् अष्टापाद्यं तु शूद्रस्य किल्बिष
मिति अष्टदंडा आपाद्यायेन किल्बिषाणां स्तेयेन तदष्टापाद्यम् यत्रार्थानुपक्रमानि द्रव्याणि स्तेनये
नाः तेषां तेदंडं अथ ब्राह्मण उपस्थाग्निचौरस्य ग्रहणात् यस्तु रज्जुं घटं कूपाद्धरेद्भिंद्याच्च यः प्रपाम् स दंडं प्राप्नु
यान्माषं तत्र तस्मिन् समाहरेत् महापशून् तेनपतो दंड उत्तमसाहसः मध्यमो मध्यमपशून्द्वेः स्तद्दं ॥१५५॥

१२

पणो दते पुरुषं हरतो हस्ता दंड उत्तमसाहसः सर्वस्वं हरतो नारीं कन्यां तु हरतो वधः तुलाधारिमेयानां गणिमा
नां च सर्वशः एभ्यस्तु कृष्टमूल्यानां मूल्याद्दशगुणो दमः कष्टभांडत्वगादीनां मृन्मयानां तथैव च वेणु
वैणवभांडानां तथा स्नायुचर्मणां शाकानामार्द्रमूलानां हरणे फलपुष्पयोः गोरसेक्षुविकाराणां
तथा लवणतैलयोः पक्वान्नानां कृतान्नानां च मद्यानामामिषस्य च सर्वेषामल्पमूल्यानां मूल्यात्पंचगुणो द
मः स्मृतिः तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् अनावृत्तस्तु हर्ता नो हस्तच्छेदनमर्हति शेव
लिखितौ अब्राह्मणो ब्राह्मणस्य समिद्राज्यधान्यकाष्ठतृणोलपशष्पपुष्पधूपफलान्यपहरेद्धस्तौ
विशांतां हस्तच्छेदनमाप्नुयात् कुशाकरकानिलोब्द्व्याण्यपहरतः प्रत्यस्ततो गच्छेद्दंडः स्यात् अप्रत्यस्तंय
दा देहिनो यः किल्बिषानि ब्राह्मणः खरयानमाप्नुयात् स्त्रैमौञ्जं मूत्रं रेखः खरयाममेव विष्णुः स्तेनाः
सर्वमेवापहृतं धनिकस्य दाप्यास्ततस्तेषामभिहितदंडप्रयोगः नहोढेन किवा चौरं घातुर्देवार्मिको
नृपः सहोढं सोकरणं घातयेदविचारयन् होढं लोप्त्रमुपकरणं चौर्योपकरणम् कात्यायनः
सहोढमसहोढं वा तत्त्वागामिन्नमोहनम् मरुद्याच्छिन्नमावेद्य सर्वं सर्वं विप्रयोजयेत् तत्वतःम

Indira Gandhi National
Centre for the Arts

माणतः साहसकृत्तिर्याति निर्वृत्ते रोदं विनापि साहसिकोऽयमिति सर्वजनविदितं कृत्वा यथाविधसर्वस्व
हरणं गर्दभारोहणं बधं कुर्यादित्यर्थः अयःसंदानगुप्ताश्च मेरुभक्तावलाम्बिनाः कुर्युः कर्माणि नृपतेरा
मृत्योरिति कौशिकः अयःसंदानमयो निगडः मेरुभक्ता अल्पभक्ताः पादेशाङ्कितं द्रव्यं वैदेश्येन यदा
भवेत् गृहीत्वा तस्य तद्द्रव्यं मेरुं तु विसर्जयेत् वैदेश्यः प्रवासोऽस्तीति प्रसंगात् देशादुपाहृत भक्तावका
शास्यरूक्ष मेत्रोपकरणव्ययम् दत्वा चौरस्य हन्तुर्वा जानतो दम उत्तमः चौरो यः साहसिको यमित्यव
च्छन्नाय तस्य भक्तमत्र अवकाशं निवासे पाकादिसिद्धये अग्निं शीतापनोदाय वा स्नानपानाद्य
र्थमुदकं मेत्रेति यद् हरणाय यायकथनं उपकरणं खनित्रशूलादि व्यये पाथेयादिकम् एवमादिकं
चौरसाहसिकयोरनुकूल्यं कुर्वतः उत्तमोदमस्स्यात् मनुराह ग्रामेष्वपि च ये केचिच्चौराणां भक्त
दायकाः भाण्डावकाशदाश्चैव सर्वास्तानपि घातयेत् अग्निदान् भक्तिदांश्चैव तथा शस्त्रावका
शदान् संनिधातॄंश्च मोषस्य हन्याच्चौरानिवेश्वरः नारदः चौरसमः सचिवो मतिप्रदः प्रतिगृ
हीताप्यधमेसंत्र यायुगे बद्धावली वद्धीय यावत्सु प्रमापयेत् इति यावत् कुर्यात् घातकाविज्ञानेन तत्परि ॥१५६॥
केतांश्चैव भाण्डानां प्रतिग्राहिण एव च समदण्डाः स्मृताः सर्वे ये च प्रच्छादयन्ति तान् गौतमः २

१७

ज्ञानोपायमाह अविज्ञातहतस्यास्य कलहं सुतबान्धवाः प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक् स्त्री
द्रव्यवृत्तिकामो वा केन वायं गतः सह तत्मरदेशसमासन्नं पृच्छेदापि जनं शनैः अविज्ञाते न विशेषतो
न ज्ञातेन हतस्य पुत्रैर्बान्धवाश्च केनास्य कलहोऽभवदिति शीघ्रं प्रष्टव्याः न घायेक स्त्रियं द्रव्यं वाह
र्तुकामश्चेत् न घायेन सह च गत इति तदीयाः स्त्रियो याः पुंश्चल्यस्ताः प्रत्येकं पृच्छेत् तत्घायत्रासौ मृतस्तत्प्रदे
शे प्रतिसमासन्नं जनं स्वकीयप्रकारेण शनैः पृच्छेत् बृहस्पतिः हतस्तु दृश्यते यत्र घातकश्च न दृश्यते
पूर्ववैरानुसारेण ज्ञातव्यः स महीभुजा प्रतिवेश्यानुवेश्यौ च तस्य मित्रारिबान्धवाः प्रष्टव्या राजपुरु
षैः सामादिभिरुपक्रमैः विज्ञेयो साधुसंसर्गाच्चिह्नैः होढेन वा नरैः व्यासः ज्ञात्वा तु घातकं सम्यक् ससहा
यं सबान्धवम् निग्रहानुग्रहे राज्ञः कीर्तिर्धर्मश्च हीयते स्तेत्रवेश्मवनग्रामविवीतखलदाहकाः
राजपत्न्यभिगामी च दाघव्यास्तु कटाग्निना क्षेत्रस्य सस्यवतो वेश्मनो महतो राज्ञको पादे वनस्याराम
स्य ग्रामस्य ग्रहस्य गृहस्य विवीतस्य तृणाद्याधारस्य भुवः खलस्य धान्यस्य साधनस्थानस्य च दा
हकाः राजपत्न्यभिगामी च प्रत्येकमनेके कटाग्निना कटस्यानलेन दग्धव्याः वीरणमय उपवेश
-नावि चिह्नविधोपादेहदेवजनकौर्न्रपः बृहस्पतिः दिव्यैर्विशुद्धो मेध्यः स्यादशुद्धो वधमर्हति ४

Indira Gandhi National
Centre for the Arts

नार्थोद्व्यविशेषःकारःमनुः प्राकारस्यचभेत्तारंपरिखाणांचपूरकम् द्वाराणांचैवभेत्तारंक्षिप्रमेवप्रवास
येत् शत्रुःकोशायहर्त्तॄंश्चप्रतिकूलेष्ववस्थितान् घातयेद्विविधैर्दण्डैररीणांचोपजापकान् राज्ञइ
तिप्रत्येकंसंबध्यते तेनदण्डेनविधीयमानेनप्रसंगात्संगात्साहसिकानामपिवधोत्रैवसकरणोविहितः
अथपरस्त्रीसंभोगात्मकेसंग्रहणेनिमित्तेपुरुषस्यग्राह्यहस्तनीयांकारणमाह पुमान्संग्रहणेग्राह्यः
केशाकेशिपरस्त्रिया सद्योवाकामजैश्चिह्नैःप्रतिपत्तौद्वयोस्तथा संग्रहणेपरस्त्रियासहमिथुनी
भावनिमित्तेदण्डेऽपितुपुमान्ग्राह्यःकेननिमित्तेनत्यपेक्षितेउक्तम् केशाकेशिपरस्त्रीया पर
स्परंकेशग्रहणवत्यापीडयापुमान्ग्राह्य इत्यन्वयः बहुव्रीहिसमासान्तमकंस्तनीयांतात्त्वृ तीच्समा
सांतेकेशाकेशीत्यव्ययम् नकेवलमयमेवहेतुःकिंतुसद्यःसंभूतानिपरस्परमिथुनीभावाभिला
षाद्युत्पन्नानिदन्तनखपदानीतिचिह्नानिसुरतिव्यभिचारिणीति तैरपिहेतुभिर्ग्राह्यउक्तहेत्वभावेपिद्वयोःस्त्रीपुं
सयोःसिद्धस्तिस्तोपिमिथुनीभावः आवयोरित्येवरूपायांसंप्रतिपत्तौसत्यामपिग्राह्यःमनुःपरदाराभिम
र्शेषुप्रवृत्तेषुमहीपतिउद्वेजनकरैर्दण्डैश्छिह्नयित्वाप्रवासयेत् तत्समुत्थोहिलोकस्यजायतेवर्णसंकरः संम०

॥१५७ १४

येनमूलहरोधर्मःसर्वनाशायकल्पते बृहस्पतिः पारुष्यंद्विविधंप्रोक्तसाहसंचद्विलक्षणम् पापमूलंसंग्र
हणंत्रिप्रकारंनिबोधत तन्नलोपाधिकृतंहेतुतृतीयमनुरागजम् तत्पुनस्त्रिविधंप्रोक्तंप्रथमंमध्यमुत्तमम्
अनिच्छत्यायक्रियेतेसुप्तोन्मत्तप्रमत्तया प्रलपन्त्यावारहसिबलात्कारकृतंतुतत् ॥ छद्मनागृहमानीयद
त्वावाभक्ष्यकामिणीसंयोगःक्रियतेयस्मात्तदुपाधिकृतंविदुः अन्योन्यचक्षुरागेणदूतीसंप्रेषणेनचकृतंरूपार
थलोभेनज्ञेयंतदनुरागजम् रूपार्थिदोलोभोरूपार्थिलोभः कामिणांवशीकरणानीवोत्तनप्रावरणसार्वथकेशा
वमर्षणम् अदेशकालसंभाषंसहैकस्यानमेवच सुग्रहणोग्राह्यइत्यनुवर्त्ततेयःपरस्त्रीणांनीव्यादिस्पर्शकरो
ति यत्रदेशेकालेचपरस्त्रियासहभाषमाणःशिष्टैर्ग्राह्यःततोन्योदेशःकालश्चअदेशकालम्तत्रयःपरस्त्री
भाषणंकरोति यश्चैकत्रशयनेआसनेवापरस्त्रियासहानुतिष्ठते सपुमान्संग्रहणेग्राह्यः नीवीपरिधान
यो ग्रंथिःकुचंस्तनावरणस्तनप्रावरणम् सक्थिमिजघनम् व्यासः संग्रहस्त्रिविधोज्ञेयःप्रथमोमध्यमस्तथाउत्तम
श्चेतिशास्त्रेषुतस्योक्तंलक्षणंपृथक् अदेशकालसंभाषाअरण्येचपरस्त्रिया अपांगप्रेक्षणंहास्य
एवंसंग्रहणंस्मृतम् मनुःपरस्यपत्न्यासंभाषांपुरुषोयोजयन्रहः पूर्वमाक्षारितोदोषैःप्राप्नुयात्पूर्वसं

Indira Gandhi National
Centre for the Arts

दो
१

साहसम् यत्त्वनात्सारितो दोषैरभिभाषेत कारणात् न दोषं प्राप्नुयात्किंचिन्न हि तस्य व्यतिक्रमः दोषैस्तत्क्रोश।
धेनादिभिरशक्तैः व्यासः प्रक्षणांग्रंथमाल्यानां रूपभूषणवाससाम् प्रलोभनं चान्नपानैर्मध्यमः संग्रहः स्मृ
तः शय्यासने विविक्ते तु परस्परसमाश्रयः केशाकेशिग्रहश्चैव सम्यक् उत्तमसंग्रहः विविक्ते विजनम् बृहस्पतिः
त्रयाणामपि चैतेषां प्रथमो मध्य उत्तमः विनेयः कल्पनीयः स्यादधिको हि विणाधिके व्यासः उपकारः क्रि
याकेलिः स्पर्शो भूषणवाससाम् सहखट्वाशनं चैव सर्वं संग्रहणं स्मृतम् स्त्रियं स्पृशेदद्देशे यः स्पृष्टो
वा मर्षयेत्तया परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् नारदः दर्पाद्वा यदि वा मोहात् श्लाघया वा स्वयं
वदेत् पूर्वं मयेयं भुक्तेति तच्च संग्रहणं स्मृतम् पाणौ वच निरुद्धीयाद्वेणौ वस्त्रे चलेऽपि वा तिष्ठ तिष्ठेति वा ब्रूया
त्सर्वं संग्रहणं स्मृतम् अबुद्धिपूर्वमलंकृतो युवा परदारमनुप्रविशेत् कुमारीं वा वाच्यः बुद्धिपूर्वं तु दुष्ट
भावादुष्टः स्त्रीनिषेधे शतं दद्याद्विशतं तु दमं पुमान् प्रतिषेधो द्वयोर्दण्डो यथा संग्रहणे तथा येन पुरु
षेण सह स्त्रियाः संभाषणं भर्त्रादिभिः प्रतिषिद्धं तत्तेन सह माचरती याणा शतं दद्या एवं पुरुषोऽपि याणाश
तद्वयं उभयोः प्रतिषिद्धमन्योन्यसंभाषणमाचरतोर्यो वक्ष्यते संग्रहणे दण्डः स एव वेदितव्यः मनुः

११९५

१९

चतुर्णामपि वर्णानां दारा रक्ष्यतमाः सदा भिक्षुका वंदिनश्चैव दीक्षिताः कारवस्तथा संभाषणं सह स्त्रीभिः कुर्यु
रप्रतिवारिताः न संभाषं सह स्त्रीभिः प्रतिषिद्धः समाचरेत् निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति नैष चारणदारे
षु विधिर्नात्मोपजीविषु सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च किंचिदेव हि दाप्यः स्यात्संभाष्य तानि प्रच
न्नं प्रेष्यासु चैकभक्तासु रहः प्रव्रजितासु च भिक्षुकादयोऽप्रतिवारिताः अनिषिद्धभाषणात् स्त्रीभिः सह संभा
षेरन् प्रतिषिद्धानसंभाषेरन्नित्यर्थसिद्धम् ततश्च न संभाषं सह स्त्रीभिरिति भिक्षुकादिव्यतिरिक्तपुरुषवि
षयो निषयो निषेधः तद्विषय एव चतुर्वर्णादण्डमर्हतीति दण्डविधिः सुवर्णं सदोयं परिमाणवचनः तथाहि
सति जातिप्रमाणयोरुक्तिः अन्यथा तु जातेरेव न चार्थी प्रमाणाज्जातिरूपासीनांगं भवति ततश्च पणशतद्वय
स्य सुवर्णस्य च दण्डत्वे शक्तये सया व्यवस्थाप्यम् प्रेष्या दासादयः एकभक्ता अव्यभिचारिण्यः प्रव्रजितातु
चनैष विधिरित्यन्वयः मत्स्यपुराणम् भिक्षुकोऽप्यथ तां नारीं यो पित्स्यात्तु कुशीलवः प्रविशेत्प्रतिषिद्धस्तु प्रा
प्नुयाद्विशतं दमम् यस्तु संचारकस्तत्र पुरुषः सत्यया भवेत् पारदारिकचरं ब्रान्ध्रत्वादेवकारः सजाता
वुत्तमो दण्ड आनुलोम्येतु मध्यमः प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनम् सर्वेषां वर्णानां सजाता

Indira Gandhi National
Centre for the Arts

सवर्णायत्स्यहणातत्रोत्तमत्यासाहसोदंडः अनुलोम्येब्राह्मणादेःक्षत्रियादिस्त्रीभिगमेतुमध्यमसाहसोदंडः गुप्तां
चलाद्भक्षतरततयदाहमनुः सहस्रंब्राह्मणोदंड्योगुप्तेतुतेव्रजन् शूद्रायांक्षत्रियविशोःसाहस्रोवै
नवेदमः तेक्षत्रियवैश्यैः तथाअगुप्तेवैश्यराजन्येशूद्रायांब्राह्मणोव्रजन् शतानिपंचदाप्यः स्यात्माह
त्वत्यजस्त्रियम् प्रातिलोम्येहीनवर्णःपुरुषःउत्तमवर्णास्त्रीइत्येवंरूपसंग्रहणे पुंसोवधःस्त्रियास्तुकर्ण
नासौयच्छेदनंकार्यम् स्त्रियांगुप्तायामेतत् यदाहमनुर्ब्राह्मणीयद्यगुप्तांगच्छेतांवैश्यपार्थिवौ वै
श्यंपंचशतंकुर्यात्क्षत्रियंतुसहस्रिणम् उभावपितुतावेवब्राह्मण्यागुप्तयासहविप्लुतौशूद्रवद्दंड्यौद
ग्धव्यौवाकटाग्निना शूद्रोगुप्तमगुप्तंवाद्वैजातंवर्णमावसत् अगुप्तमंगसर्वस्वैर्गुप्तंसर्वेणहीयते ए
कांगलिंगसर्वेणजीवितधनेनेत्यर्थः तथाचशूद्रस्यानुलोमोगोत्तमः आर्यस्त्र्यभिगमनेलिंगोद्धारः सर्वस्व
हरणंचमनुः वैश्यश्चेत्क्षत्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत् योब्राह्मण्यामगुप्तायांतावुभौदंडमर्हतः
अत्यंतविप्लुतायामगुप्तायांक्षत्रियायांवैश्यस्यपंचशतिकोदंडः अविप्लुतायांगुप्तायांवधः प्रातिलो
म्येवधइतिविशेषवचनाद्युक्तःसजातौसामान्येनोत्तमसाहसोदंडः तत्रपवादायविशेषोदंडांतर ॥१५८॥

२६

माह नारदः मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्वसापितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीसुतादुहिता
चार्यभार्याचसगोत्राशरणागता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया आसामन्यतमांगत्वागुरुत
ल्पगउच्यते शिश्नस्योत्कर्तनात्तत्रनान्योदंडोविधीयते मनुःपुमानसहसाह्वयेत्पापंशयनेतप्तआयात्येऽग्न्
त्यादेवाह्यकाष्ठानित्यत्रदह्येतपातकम् ब्राह्मणव्यतिरिक्तगुरुतल्पगविषयमेतत् तथाविधब्राह्म
णप्रतिहरस्यातिरात्रच्छ्रमाकायपेद्यमुतस्यसर्वहरोदमः अकयित्वाभगांकेनपुरान्निर्वासयेत्ततः
सहसायःकामयतेधनंतस्याखिलंहरेत् उत्कृत्यलिंगवृषणौग्रामयेद्गर्दभेनतु प्रसंगात्कुमारीविषय
माह अलंकृतांहरन्कन्यामुत्तमंत्वन्यथाद्दमम् दंडंदद्यात्सवर्णासुप्रातिलोम्येवधःस्मृतः सकामा
स्वनुलोमासुनदोषस्त्वन्यथाद्दमः सवर्णांकुमारीमलंकृतांहरन्नुत्तमसाहसंदंडंदद्यात् अनलंकृतांतु
प्रथमसाहसम् हीनवर्णस्योत्तमवर्णांकन्यांहरतोवधोदंडःउत्तमवर्णेनहीनवर्णासुसकामास्वपहृतासु
सुनापहर्तुर्दोषः अन्यथात्वकामासुअधमःप्रथमसाहसः एतच्चापहारमात्रेदंडविधानम् कन्यां
दूषयतेदंडमाह दूषणेतुकरच्छेदःउत्तमायांवधस्तथा यस्तुकन्यांयाअगुप्तायोनिस्तांकृत्वाहरणं

Indira Gandhi National
Centre for the Arts

करोति तस्य कराङ्गुलिच्छेदो दण्डः अस्मिन्दोषे उत्तमकन्याविषये दूषयितुर्वधः कार्यः श्रोत्रांगुल्यावच्छेदने अत
एवाह मनुः अभिषह्य तु यः कन्यां कुर्याद्दर्पेण मानवः तस्याशु कर्त्ये अंगुल्यौ दण्डं चार्हति षट्शतम्॥
अभिषह्य प्रसह्य कन्यां कुर्यात् क्षतयोनित्वं तद्दुष्टां कुर्यादित्यर्थः तस्याविलम्बेनांगुल्यौ कन्यादूषणहे
तु भूते कर्त्ये छेत्तव्ये तथा सकामां दूषयंस्तुल्यो नांगुलिच्छेदमर्हति द्विशतं तु दमं दाप्यः प्रसंगविनिवृत्त
ये तुल्यः सवर्णः प्रसंगोऽतिप्रसंगः यत्तु मैथुनेन कन्यां दूषयति तत्प्रत्याह मनुरेव योऽकामां दूषयेत्कन्यां
स सद्यो वधमर्हति सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः अकामामनिच्छन्तीं कन्यामकृतवि
वाहे चाक्षतयोनिं यो दूषयति स ब्राह्मणव्यतिरिक्तः सवर्णोऽसवर्णो वा वधमर्हति ब्राह्मणस्य तु दं
डः कन्यां सकामां यदि तुल्यः सवर्णोऽभिगच्छेत् ततोऽस्य न वधः किन्तूत्तमसाहसो दण्डः कन्यां भजन्ती
मुत्कृष्टं न किंचिदपि दापयेत् जघन्यं सेवमानां तु संयतां वासयेद्गृहे उत्कृष्टमुत्कृष्टवर्णं जघन्यं ही
नवर्णम् सर्वेषूत्तमग्रहणान्न लभ्यते उत्तमां सेवमानस्तु जघन्यो वधमर्हति शुल्कं दद्यात्सेवमानः समा
मिच्छेत्पिता यदि समां सवर्णां सेवमान इच्छेत् तत्पित्रे शुल्कं दद्यात् नारदः सकामायां तु कन्यायां १६०

यां सवर्णे नास्त्यतिक्रमः किन्त्वलंकृत्य सत्कृत्य स एवैनां समुद्वहेत् [illegible] कन्यायामसका
मायां द्व्यंगुलच्छेदो दण्डः श्रोत्रमायां वधो जघन्ये सकामायां च शुल्कमावरणं द्विगुणं च स्त्रीधनं दत्त्वा
प्रतिपादयेत्स्वकन्यां मनुः कन्यैव कन्यां या कुर्यात्तस्याः स्याद्द्विशतो दमः शुल्कं च द्विगुणं दद्याच्छिफाश्चैवाप्नुया
द्दश अयमर्थः अयमर्थः या कन्या केनापि हेतुना अंगुल्यादिना कन्यां क्षतयोनिं कुर्यात् सा पणशतद्व
यं दण्डं दद्यात् तथा यच्छुल्कं मूल्यं कन्यार्हति तद्द्विगुणं तस्यै दूषितायै दत्त्वा दश शिफाश्चाप्नुयात् रज्जुप्र
हारो लताप्रहारो वा शिफा या तु कन्यां प्रकुर्यात्स्त्री सा सद्यो मौण्ड्यमर्हति अंगुल्योरेव च छेदं खरेणोद्वहनं तथा
स्त्री चेह कन्याव्यतिरिक्ता वेदितव्याः कन्यायाः पूर्वमुक्तत्वात् किंच शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसिता पशुग
च्छन् शतं दाप्यो हीनां स्त्रीं गां च मध्यमम् स्त्रियाः कन्याया दूषणात् क्षतयोनित्वादिकेनाकन्यात्वाभिधाने तत्कर्तुः
पणशतं दण्डः तदेव चेन्मिथ्या स्यात्पणशतद्वयं दण्डः गोव्यतिरिक्तपशुगच्छन्पणशतं दाप्यः अन्त्यजां स्त्रि
गां च गच्छतो मध्यमसाहसो दण्डः हीनस्त्रीगच्छतो ब्राह्मणव्यतिरिक्तस्यायं दण्डः ब्राह्मणस्य सहस्रम् सह
सम्मत्य नास्ति यमिति वचनात् कन्यादोषानाह नारदः दीर्घकुत्सितरोगार्तां व्यंगां संसृष्टमैथुनां दु

व्यान्यगतभार्या च कल्याणी षाः प्रकीर्तिताः यत्तु द्व्यपत्तु प्रवाशतमित्युक्तम् तदल्पधनविषयम् अवरु
द्धासु दासीषु भुजिष्यासु तथैव च गम्यास्वपि पुमान्दाप्यः पंचाशत्पणिकं दमम् याः दास्यः स्वामिनावरुद्धानि
षिद्धपुरुषसेवाः याश्च भुजिष्याः स्वामिनैवोपभुज्यंते तासु यद्यपि दासीत्वं सत्यानुलोम्येन गम्यत्व तथापि तद
भिगंता पुमान्पंचाशत्पणं दाप्यः गम्यत्वमभिधानेन चेदम् न प्रत्यवायाभावाभिप्रायम् स्वैना भुजिष्याः सनव
रुद्धांच दासीं गच्छतो नास्ति दंडः नारदः स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या गम्याः स्युरानुलोम्ये
न स्त्रियो न प्रतिलोमतः आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् गम्या अपि हि नोपेया यत्नस्ताः स
परिग्रहाः व्यासः मरोपरुद्धागमने वेश्यागमने चाशत्पणिको दमः प्रसह्य वेश्यागमने दंडो दशपणः स्मृतः
वधकामधिकृत्याह यमः परदारे सवर्णासु दंड्यः पंचकृष्णलान् असवर्णास्वानुलोम्ये दंडो द्वाद
शकः स्मृतः दास्यांकोदादशपणः व्यासः बहुभिर्भुक्तवीयागच्छे घ्नतोनएधमः तस्य वेश्याव
दिच्छतिदंडेनेनतु दारवत् कात्यायनः कामान्त्रीस्वैरिण्यां तु स्वयमेव प्रकामयेत् यत्नो देशेन भोक्त
व्याविव्याप्यजननसन्निधौ प्रसह्य दास्याभिगमे दंडो दशपणः स्मृतः बहुनां यद्यकामोसौ चतुर्विंशतिकः ॥१६१॥

पृथक् पदासी हठादभिगच्छतो दशपणो दंडः अनिच्छंतीं बहूनामभिगच्छतां प्रत्येकं चतुर्विंशतिपणः अ
योनौ गच्छतो योषां पुरुषं चाधिमेहतः चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे यः पुनरयोनौ मुखादौ योष
षा योषितं गच्छति यश्च पुरुषस्योपरि मेहं मुत्रपुरीषे वोत्सृजति यश्च प्रव्रजितां श्रमणीकादिकामुपैति त
स्य चतुर्विंशतिपणो दंडः चत्वारिंशत्पणो दम इति वा पाठे चत्वारिंशत्पणरूपः अंत्याभिगमने त्वंकः
वधेन प्रवासयेत् शूद्रस्तथांक्य एव स्यादंत्यस्यार्यागमे वधः अंत्या श्चंडालस्ताया गवलियः तदभिग
तारं द्विजातिं प्रायश्चित्तमकुर्वाणं कबंधेन शिरोरहितेन पुंसा ललाटे कृत्वा स्वराष्ट्रात्प्रवासयेत् शूद्रस्तु
प्रायश्चित्तं कुर्वाणोप्यंक्य एव अंत्यस्य चंडालादेस्तूत्तमवर्णागच्छतो वध एव स्त्रीसंग्रहणप्रमाणम् अ
थ नाम प्रकीर्णाख्यविवादपदं प्रस्तौति ऊनं वाप्यधिकं वापि यो लिखेद्राजशासनम् पारदारिकचौरौ वा मुंच
तो दंड उत्तमः दत्तस्य भूम्यादेरत्र निर्दिष्टपरिमाणाद्या सनेन लिखितिं किंतु ततोन्यूनमधिकं वा यः शास
नलेखने धिकृतः स लिखति यश्चौरादिचरणाधिकारी चौरं पारदारिकं मन्नं वा दंडनीयं गृहीत्वा राजाज्ञा
मंतरेणामुंचेत् स उत्तमसाहसं दंडनीयः शासलिखितो कूरशासन प्रयोगे राजशासन प्रतिषेधे स्ट्टतु

Indira Gandhi National
Centre for the Arts

लामानप्रतिमानव्यवहारे शारीरो दंडो वा कात्यायनः प्रमाणेन तुलाकूटेन मुद्रया वापि कूटया कारयेत्तु या
धयेद्यो विसहाय्योदममुत्तमम् मनुः कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् स्त्रीबालब्राह्मणघ्नांश्च
हन्यात् द्विट्सेविनस्तथा प्रकृतयः स्वाम्यादि राज्यांगानि द्विट्सेविनो राजद्विषि सेविनः विष्णुः कूटशासन
कर्तॄंश्च राजा हन्यात् कूटलेख्यकारांश्च द्विजमदव्याभक्ष्येण दंडानुत्तमसाहसं क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्र
मर्धिकम् अभक्ष्येण गलशुनादिना ब्राह्मणं दूषयित्वा उत्तमसाहसं दंड्यः क्षत्रियं दूषयित्वा मध्यमसाहसं
वैश्यं दूषयित्वा प्रथमसाहसं शूद्रं तु तदर्धम् दंड्य इत्यनुवृत्तौ विष्णुः अभक्ष्येण ब्राह्मणस्य दूषयिता
षड्शासुवर्णान् जात्यपहारेण शतम् सुरया वध्यः क्षत्रियं दूषयितुस्तदर्धम् शूद्रं दूषयितुः प्रथमसा
हसम् साहसम् जातिभ्रंशकारणाभक्ष्यस्य भक्षयिता विवास्यः कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी
अंगहीनस्तु कर्त्तव्यो दाप्यश्चोत्तमसाहसम् असुवर्णं सुवर्णं वृषदं स्वकृत्या धयो व्यवहरति यश्च वि
रुद्धं विक्रीणाति दारिमांसं समीचीनमांसबुद्धिमुत्पाद्य विक्रीणीते स क्रिमिरंगैर्नासाकर्णहस्तैर्हीनः का
र्यः उत्तमसाहसं च दंड्यः यत्तु मनुनोक्तम् सर्वकंटकपापिष्ठं हेमकारं तु पार्थिवः प्रवर्त्तमानमन्या ॥१६२॥

१८

येच्छेदयेत्खंडशः क्षुरैः तत्रास्वर्णस्य सुवर्णस्य हारी सुवर्णकारविषयम् विषयविशेषे दंडापवादमाह
चतुष्पाद्कृतो दोषो नापैहीति प्रजल्पतः काष्ठलोष्टेषु पाषाणबाहुयुग्यकृतस्तथा चतुष्पाद्दोर्गोगजा
श्वादिभिः कृतो मनुष्यमरणादिरूपोपघातः प्राहकस्य दंडनिमित्तं न भवति अपसरापसरेति परं प्रतिब्रू
यात् काष्ठादिव्यापारेण तथापैहीति प्रजल्पतः सारथेः काष्ठाधिकृतोपघातो दंडनिमित्तं न भवति नाष्टा
स्तिंदुः श्वसुवीणः युग्मेयानम् छिन्ननस्येन यानेन तथा भग्नयुगादिमत् सुश्चैवापसरेति हि सेने स्वामि
दोषभाक् बलीवर्द्दनासिकार्पिता रज्जुः नस्या सा छिन्ना यत्र यानेन छिन्ननस्येयानम् तथा भग्नयुगोयु
गादियस्य तत्तथोक्तम् आदिशब्देन चक्राक्षादीनि यानांगानि गृह्यंते तेनोक्तप्रकारेण यानेन पश्चा
दपसरेति कृते प्राणिहिंसने स्वामी न दोषभाग्भवति च कारात्यश्चादपसरणायेति विक्रोशयापि यानस्य गतेः
वः पीग्रहंते स्वाम्यग्रहणं प्रदर्शनार्थम् तेन सारथ्यादिरपि न दोषभाक् मनुः छिन्ननस्ये भग्नयुगे तिर्य
क्प्रतिमुखागते अक्षभंगे च यानस्य चक्रभंगे तथैव च छेदने चैव यंत्राणां योक्त्ररश्म्योस्तथैव च आ
क्रंदे वाप्यपैहीति न दंडं मनुरब्रवीत् यत्रापवर्तते युग्यं वैगुण्यात् प्राजकस्य च तत्र स्वामी भवेद्दंड्यो हिं

Indira Gandhi National
Centre for the Arts

सार्धं द्विशतं दमम् प्राजकः सारथिः स्वामी रथी प्राजकश्चेद्भवेदाप्तः प्राजको दंडमर्हति युग्यस्थाः प्राज
केनाप्ते सर्वे दंड्याः शतं शतम् आप्तो निवारणसमर्थः अनाप्ते तु तस्मिन्युग्यस्था यानस्थाः सर्वे प्रत्येकं
शतं दंड्याः स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा प्रमापयेत्प्राणभृतस्तत्र दंडो विचारितः मनुष्यमार
णे क्षिप्रं चौरवत्किल्बिषं भवेत् प्राणभृत्सु महत्स्वर्धं गोगजोष्ट्रहयादिषु क्षुद्रकाणां पशूनां तु हिंसायां
द्विशतो दमः पंचाशत्तु भवेद्दंडः शुभेषु मृगपक्षिषु गर्दभाजाविकानां तु दंडः स्यात्पंचमाषकः माषिकस्तु भवे
द्दंडः श्वसूकरनिपातने शक्तोप्यमोक्षयन्स्वामी दंष्ट्रिणां शृंगिणां तथा प्रथमसाहसं दद्याद्विक्रुष्टे द्विगु
णं तथा दंष्ट्रिणां व्याघ्रादीनां शृंगिणां बलीवर्दादीनां स्वामी प्राणिव्यापादने प्रवर्तमानानां तन्निवारणे शक्तः
सन्यो न निवारयति तस्य प्रथमसाहसो दंडः यस्तु व्यापाद्यमानेन त्रायस्वेति विक्रुष्टेपि न निवारयति तस्य
पूर्वोक्ताद्द्विगुणो दंडः चौरं चौरेत्यभिवदन्दाप्यः पंचशतं दमम् उपजीव्य धनं मुंचंस्तदेवाष्टगुणीकृत
म् यस्तु स्वकीयस्तेयदोषप्रच्छादयितुकामः तमचौरं चौरत्वेनाभिवदति तस्य पंचशतानि य ॥१६३॥
मपशतः यस्तु राजाज्ञया गृहीत्वा तेनान्यन्निवेद्य मुंचति स गृहीतधनमष्टगुणं दाप्यः किंच र

राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकारिणम् तन्मंत्रस्य च भेत्तारं जिह्वां छित्वा प्रवासयेत् राज्ञो जनपदादि
पालकस्य महानिष्टमप्रियं शत्रुप्रशंसादि तस्यातिशयेन वक्तारं तथा राजविषयस्याक्रोशस्य शापस्य
कर्त्तारं छिन्नजिह्वं कृत्वा प्रवासयेत् मनुः राज्ञः कोशापहर्तॄंश्च प्रतिकूलेषु चास्थितान् घातयेद्विवि
धैर्दंडैररीणां चोपजापकान् ॥ उपजापका उपोद्बलकाः विविधैर्दंडैरिति यथापराधं सर्वेपि दंड्याः प्रयो
क्तव्याः इत्यर्थः तत्र सर्वस्वापहारे जीविकासाधकं नापहार्यमित्याह नारदः आयुधान्यायुधीयानां
वाह्यादीन्वाह्यजीविनाम् वेश्यस्त्रीणामलंकारान्वाद्यातोद्यानि तद्विदाम् यच्च यस्योपकरणं येन
जीवंति कारवः सर्वस्वहरणेप्येतन्न राजा हर्तुमर्हति मृतांगलग्नविक्रेतुर्गुरोस्ताडयितुस्तथा राजया
नासनारोढुर्दंडो मध्यमसाहसः शवालंकरणाय तत्र लग्नवस्त्रादि विक्रीणानस्य गुरुं मुक्तलक्ष
णात्ताडयतः प्रहरतः राज्ञो यानासनयोस्तथा आरोढुः मध्यमसाहसो दंडः द्विनेत्रभेदिनो राजद्वि
ष्टादेशकृतस्तथा विप्रत्वेन तु शूद्रस्य जीवतोष्टशतो दमः यो द्वे नेत्रे अपि देव्यान्यस्य भिनत्ति यश्च रा
राजद्विष्टस्याज्ञाकारी यश्च शूद्रो विप्रलिंगेन जीवति तस्याष्टौ शतानि दंडः विप्रत्वेन जीवता शूद्रः

णा यदि द्विजातीभिः सह व्रात्यो यौनो जौ संबंधः आचरितः तदा सोपि वध्य एव तान्सर्वान्घातयेद्राजा शूद्रां
श्च द्विजलिंगिन इति मनुवचनम् यत्तु शूद्रस्य विप्रवेषधारिणस्तप्तशलाकया यज्ञोपवीतं दद्यात् व
पुष्यपि लिखेदिति स्मृत्यंतरवचनम् तत्प्रारब्धभोजनेन श्वदैवादिकं स्मार्त्तिकमेव यदर्थं कुर्वतो द्रष्टव्यमनुः
वालोभादेः धर्मो ज्यन्याजीवेदुत्कृष्टकर्मभिः तं राजा निर्धनं कृत्वा क्षिप्रमेव प्रवासयेत् क्षत्रियवैश्यवि
षयमेतत् सर्वव्यवहारप्रोषतण्याकिंविदाह सभ्यगृहष्ठानुदृष्ट्वा सन्व्यवहारान्दपेण तु सभ्यः सज
पिनोऽदंड्या विवादाद्द्विगुणं दयकयेदुरदृष्ट्वा लोभादिवशादयथाशास्त्रं दृष्टव्यवहारास्तान्पुनः स
भ्यगृहष्ठाराजा ररविरा भ्यास्तत्र वयोजयी वादीतेन सहिताः प्रत्येकं पराजितस्य यो दंडः ततो द्विगुणं दंडं दं
ड्यानीयाः सभ्याः पृथक् पृथक् स्याविवादाद्द्विगुणो दम इत्युक्तम् तद्धि विवादविषयम् दंडस्तु लक्ष्यति
रिक्तविषयमिति न योन क्लृप्तम् यदा तु साक्षिणो दोषाकुष्टदुष्टो व्यवहारः स्वन्नस्तदा सभ्यदंडः तेषां तत्रा
हेतुत्वात् यदा तु विवादादि सभ्यसभापति साक्षिवशाद समीचीनो व्यवहारः स्यात् तदा सर्वेषां तेषु शातः
प्रत्यवायसमवायः स्यात् तदुक्तम् पादो धर्मस्य कर्त्तारं पादः साक्षिणमृच्छति पादः सभासदः सर्वान्या ॥१९६४॥

दोराजानमृच्छति न्यायतः पराजितस्य वादिनोन्याय दर्शनोपायमाह यो मन्येताजितोस्मीति न्यायेनापि पराजितः तमा
यांतं पुनर्जित्वा दापयेद्द्विगुणं दमम् यो वादी शास्त्रतः पराजितोपि नाहं पराजितोस्मीति मन्यते तं पुनर्व्यवहारदर्शना
यांतं पुनर्जित्वा दापयेद्द्विगुणं दमम् यो वादी शास्त्रतः पराजितोपि नाहं पराजितोस्मीति मन्यते तं पुनर्व्यवहारदर्शना
यायांतं पुनर्व्यवहारदर्शनेन जित्वा द्विगुणं दमं दापयेत् द्विगुणदमांगीकारेणैव तदा व्यो व्यवहारः पुनर्द्
यायांतं पुनर्व्यवहारदर्शनेन जित्वा द्विगुणं दमं दापयेत् द्विगुणदंडमास्थायतत्कार्येन
द्रष्टव्यो नान्यथेति तात्पर्यार्थः अत एव नारदः तीरितं चानुशिष्टं च यो मन्येत विधर्मतः द्विगुणं दंडमास्थाय तत्कार्यं
पुनरुद्धरेत् अयमर्थः यत्र स्वपराजयहेतु लिखिते तीरिते यच्च तस्य दंडेन तदनुशिष्टं तदुभयं विधर्मशास्त्र
विरोधतो यातमिति यो मन्यते स द्विगुणं दंडमंगीकृत्य व्यवहारदर्शने पुनः कारयेदिति यदि पुनर्द्विगुणं दंडं योगो
कारो वादिनोस्ति न दापूर्वदर्शनेन वचालनीयमित्याह तीरितं चानुशिष्टं च यत्र क्वचन विद्यते कृतं तद्धर्मतो
ज्ञेयं न तत्प्राज्ञो निवर्तयेदिति राजान्यायेन पोऽदंडो गृहीतो वरुणाय तम् निवेदयेद्द्याद्विप्रेभ्यः स्वयं त्रिंशद्गुणि
कृतम् यदा तु प्रज्ञान्यायेन न्यायातिक्रमेण कुतोपि दंडो गृहीतः तद्दंडधनं तस्मै दत्वा तत्त्रिंशद्गुणं वरुणाय नि
वेद्यः वरुणमुद्दिश्य स्वयं त्यक्त्वा ब्राह्मणेभ्यो दद्यात् ब्राह्मणेभ्यः प्रतिपादयेदित्यर्थः ॥ इति श्री विद्याधरवंशप्रभ
वस्योपशिलाहानरेंद्रजीमूतवाहनाचयप्रसूतास्त्रीमत्परापरादित्यदेवविरचितेयाज्ञवल्कीयधर्मशास्त्रनिबंधे ॥१९६५॥
द्वितीयोध्यायः २

Indira Gandhi National
Centre for the Arts

नं ३२

याज्ञवल्क्यस्मृति

Indira Gandhi National
Centre for the Arts